THE

KAVYADARSHA

BY

SHRIDANDI

EDITED WITH A FULL COMMENTARY

BY

PANDIT JIBANANDA VIDYASAGARA B.A.

Superintendent Free Sanskrit College, Calcutta

SECOND EDITION.

CALCUTTA

PRINTED AT THE NARAYANA PRESS.

1890.

To be had from Pandit Jibananda Vidyasagara B.
Superintendent Free Sanskrit College,
No. 2 Ramanatha Majumdara's Street, Calc

एतानि मुद्रितसंस्कृतपुस्तकानि ।

१ आशुबोधव्याकरणम् २
१ धातुरूपादर्शः १॥०
३ श ...ब्दस्तोममहानिधिः ८
४ ... तकौमुदी सरलासहिता १०
५ सिद्धान्तवि...सार: (वेदान्त) ॥०
६ तुलादानादिपद्धति: (बङ्गाचरैः) ४
७ गयाश्राद्धादिपद्धति: १
८ शब्दार्थरत्नम् ॥।
९ वाक्यमञ्जरी (बङ्गाचरैः) ।०
१० सटीक छन्दोमञ्जरी वृत्तरत्नाकर ॥०
११ वेणीसंहारनाटक सटीक ॥।०
१२ मुद्राराचसनाटक सटीक १
१३ रत्नावलीनाटिका सटीक ॥०
१४ मालविकाग्निमित्रनाटक सटीक १
१५ धनञ्जयविजयनाटक सटीक ।०
१६ महावीरचरितनाटक सटीक १॥०
१७ महावीरचरितनाटक मूलमात्र ॥०
१८ वैयाकरणभूषणसार ॥।०
१९ लीलावती भास्कराचार्य्यरचित ॥०
२० वीजगणित भास्कराचार्य्यरचित ॥०
२१ शिशुपालवधकाव्य सटीक (माघ) २
२२ किरातार्जुनीयकाव्य सटीक १॥०
२३ कुमारसम्भवकाव्यपूर्वखण्ड सटीक ॥०
२४ कुमारसम्भवकाव्य उत्तरखण्डसटीक ॥
२५ अष्टकम् पाणिनीयम् ॥०
२६ वाचस्पत्यम् (बृहदभिधान) १००
२७ कादम्बरीविस्तृतव्याख्यासहिता ३
२८ राजप्रशस्ति सटीक ...
...९ अनुमानचिन्तामणि तथा
...प्रमानदीधिति न्यायशास्त्र १॥
... दर्शनसंग्रहः दर्शनशास्त्र

३१ भामिनीविलासकाव्य सटीक ॥...
३२ हितोपदेश सटीक ॥...
३३ भाषापरिच्छेदमुक्तावलीदिनकरी १...
३४ बहुविवाहवाद ।०
३५ दशकुमारचरितगद्यकाव्य सटीक ...
३६ परिभाषेन्दुशेखर ...
३७ कविकल्पद्रुम (धातुपाठ:) ।०
३८ चक्रदत्त (वैद्यक) १॥०
३९ उणादिसूत्र सटीक
४० मेदिनीकोष ...
४१ पञ्चतन्त्रम् सटीक विष्णुशर्म्मकृत ...
४२ विद्वन्मोदतरङ्गिणी (चम्पूकाव्य) ...
४३ माधवचम्पू काव्य ।०
४४ तर्कसंग्रह इं अनुवादसहित ...
४५ प्रसन्नराघवनाटक जयदेवकृत १
४६ विवेकचूडामणि वेदान्त ...
४७ काव्यसंग्रह मूलमात्र ...
४८ काव्यसंग्रह सटीक (संपूर्ण) ...
४९ ऋतुसंहार काव्य सटीक ...
५० विक्रमोर्वशी नाटक (सटीक) १
५१ वसन्ततिलक भाणनाटक ...
५२ गायत्री व्याख्या ...
५३ साङ्ख्यदर्शन (भाष्यसहित) २
५४ भोजप्रबन्ध ॥०
५५ नलोदय काव्य सटीक ...
५६ ईश केन कठ प्रश्न मुण्ड माण्डूक्य उपनिषद (सटीक सभाष्य) ...
५७ छान्दोग्य उपनिषद सटीक सभाष्य ...
५८ तैत्तिरीय ऐतरेय श्वेताश्वतर (उपनिषद) सभाष्य सटीक
५९ बृहदारण्यक सटीक सभाष्य

काव्यादर्शः।

महाकवि श्रीदण्ड्याचार्य्यविरचितः।

पण्डितकुलपतिना
वि, ए, उपाधिधारिणा
श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण
विरचितया विवृत्या समलङ्कृतः।

द्वितीयसंस्करणम्।

कलिकाताराजधान्याम्
नारायणयन्त्रे मुद्रितः।

इं १८९०।

काव्यादर्शस्य सूचीपत्रम् ।

प्रथमपरिच्छेदः ।

(१-५५पृष्ठा)

द्वितीयपरिच्छेदः ।

(५६-१९४पृष्ठा)

तृतीयः परिच्छेदः ।

(१९५-२८० पृष्ठा)

ग्रन्थसमाप्ति: ।

काव्यादर्शः।

प्रथमः परिच्छेदः।

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ॥ १ ॥

प्रणम्य कमलाकान्तं भक्ताभीष्टफलप्रदम्।
काव्यादर्शस्य विवृतिं वितनोमि सतां मुदे ॥

किंवदन्तीयं यत् महामहोपाध्यायः श्रीमान् दण्डीनाम कविः ग्रन्थमिमं स्वयं विरच्य कमपि राजपुत्रम् अध्यापयामास इति।

ग्रन्थारम्भे निर्विघ्नेन प्रारिप्सितपरिसमाप्तिकामनया कविर्ग्रन्थाधिष्ठातृतया वाग्देवतायाः स्मरणरूपमङ्गलमाचरन्नाह चतुर्मुखेति। चतुर्मुखस्य ब्रह्मणः मुखान्येव अम्भोजवनानि पद्मवृन्दानि तेषु हंसवधूः हंसीस्वरूपा सर्वतः सर्वावयवेन सर्वप्रकारेण च शुक्ला श्वेतवर्णा परिशुद्धा च सरस्वती वागधिष्ठात्री देवी नित्यं सततं मम मानसे चेतसि तदाख्यसरसि च रमतां विहरतु मानसे सरसि पद्मवनेषु हंसीव या ब्रह्मणो मुखकमलेषु श्रुतिरूपेण सततं विहरति सा सर्वशुद्धा वाग्देवी मम हृदये सततं वसतु इति निष्कर्षः। नित्यमित्यत्र दीर्घमिति पाठे दीर्घं सुचिरमित्यर्थः ॥ १ ॥

पूर्वशास्त्राणि संहृत्य प्रयोगानुपलभ्य च ।
यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणम् ॥२॥
इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा ।
वाचामेव प्रसादेन लोकयात्रा प्रवर्त्तते ॥ ३ ॥

सम्प्रति ग्रन्थस्य अभिधेयं निर्दिशन् प्रतिजानीते पूर्वशास्त्राणीति । पूर्वेषां कवीनां भरतादीनां शास्त्राणि काव्यग्रन्थान् संहृत्य संक्षेपेण तेभ्यः सारमाकृष्य प्रयोगान् महाकाव्यादिषु प्रयुक्तान् विषयान् उपलभ्य समालोच्य च अस्माभिः यथासमार्थ्यं यथाशक्ति-यथाज्ञानमिति यावत् काव्यस्य लक्षणं स्वरूपं लक्ष्यते ज्ञायते अनेनेति व्युत्पत्त्या लक्षणम् इतरव्यवच्छेदकः असामान्यधर्म इति यावत् क्रियते निर्णीयते । एतेन काव्यमेव ग्रन्थस्य अभिधेयं दर्शितम् ॥ २ ॥

इदानीं ग्रन्थस्य प्रयोजनकथनाय वाचां व्यवहारोपयोगित्वम् अन्वयव्यतिरेकाभ्यामाह इहेति इदमिति च । इह संसारे शिष्टैः धीरैः । तदुक्तं महाभारते—न पाणिपादचपलो न नेत्रचपलो मुनिः । न च वागङ्गचपल इति शिष्टस्य लक्षणम् ॥ इति । महेश्वरादिभिः अनुशिष्टानां साधितानां प्रकृतिप्रत्ययादिविभागेन संस्कृतानां तथा शिष्टानां जातिदेशादिविभागेन सिद्धानां प्रचलितानां प्राकृतदेशीयानां वाचामेव प्रसादेन अनुकम्पया साहाय्येनेति यावत् सर्वथा सर्वैः प्रकारैः लोकानाम् उत्तममध्यमाधमभेदेन त्रिविधानां यात्रा व्यवहारः प्रवर्त्तते प्रचलति तत्रोत्तमाः संस्कृतयैव वाचा व्यवहरन्ति मध्यमाः ततो निकृष्टया साधुभाषया, अधमा नीचभाषया इति । देशजातिभेदेन एवमेव भाषाव्यवहार इति फलितार्थः ॥ ३ ॥

इदमन्धं तमःकृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥ ४ ॥
आदिराजयशोबिम्बमादर्शं प्राप्य वाङ्मयम् ।
तेषामसन्निधानेऽपि न स्वयं पश्य नश्यति ॥ ५ ॥

इदमिति । यदि शब्दः आह्वयः अभिधानं यस्य तत् शब्दनामकं वाङ्मयमित्यर्थः ज्योतिः तेजःप्रकाशकस्वरूपधर्मबलेन वाङ्मये तथात्वारोपः । आसंसारं जगत् अभिव्याप्य न दीप्यते न विराजते तदा इदं कृत्स्नं सर्वं भुवनानां स्वर्गमर्त्त्यरसातलानां त्रयम् अन्धं तमः गाढ़ान्धकारव्याप्तमिति यावत् जायेत सूर्य्योदयाभावे इव वागभावे जगत् अन्धकारमयमेव स्यात् वाग्भिरेव सर्वेषां ज्ञानलाभादिति भावः । एतेन अस्य प्रयोजनं वाग्व्यवहाररूपमेव कथितम् । अभिधेयप्रयोजनयोश्च परस्परं ज्ञाप्यज्ञापकत्वादिरूपः सम्बन्धः यथायथमवगन्तव्यः । एषाञ्च ग्रन्थादौ अवश्यवक्तव्यतोक्ता यथा,—ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते । ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥ इति ॥ ४ ॥

इदानीं वाचामुपादेयत्वं दर्शयति, आदिराजेति । आदिराजानां मन्विच्छ्वाकुप्रभृतीनां यशोबिम्बं कीर्त्तिरूपं प्रतिबिम्बं कर्त्तृ वाङ्मयं कविगणनिबद्धं काव्यप्रबन्धरूपमादर्शं दर्पणं प्राप्य तेषाम् आदिराजानाम् असन्निधानेऽपि असत्तायामपि न नश्यति न विलीयते इति स्वयं पश्य अवलोकयेति राजपुत्रं प्रत्युक्तिः । दर्पणे बिम्बपतनं सन्निहितानामेव इह तु वाङ्मयरूपे दर्पणे असन्निहितानामपीति उपमेयाधिक्यवर्णनव्यति-

गौर्गौः कामदुघा सम्यक् प्रयुक्ता स्मर्य्यते बुधैः ।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति ॥ ६ ॥
तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन ।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम् ॥ ७ ॥

रेकालङ्कारः । इदञ्च पुरावृत्तवर्णितानां यशःकीर्त्तनं प्रयोजनान्तरमनुसन्धेयम् ॥ ५ ॥

वाचामुपादेयत्वं सामान्येनोक्त्वा वाग्विशेषस्य कविप्रणीतप्रबन्धस्य विशेषोपादेयत्वं कीर्त्तयन्नाह गौरिति । सम्यक् प्रयुक्ता गुणालङ्कारादिवत्वेन दोषराहित्येन सुनिबद्धा गौः वाक् स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रघृणिभूजले । लक्ष्यदृष्ट्यां स्त्रियां पुंसि गौरित्यमरः । बुधैः विद्वद्भिः सहृदयैः सुधीभिरित्यर्थः कामदुघा कामदोहिनी यथाभिलषितपूरणी गौः धेनुः स्मर्य्यते मन्यते । एकः शब्दः सुप्रयुक्तः सम्यक् ज्ञातः स्वर्गे लोके च कामधुक् भवति इति श्रुतेः । अपरञ्च, धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च । करोति कीर्त्तिं प्रीतिञ्च साधुकाव्यनिषेवणम् ॥ इति । पुनः किन्तु सा एव गौः दुष्प्रयुक्ता सदोषत्वेन गुणालङ्कारादिराहित्येन च प्रयुक्ता निबद्धा सती प्रयोक्तुः प्रयोगं कुर्वतः कवेरिति यावत् गोत्वं वृषत्वमज्ञत्वमिति भावः शंसति सूचयति ॥ ६ ॥

तत् तस्मात् प्रयोजकस्य गोत्वख्यापनात् काव्ये अल्पमपि दुष्टं दोषः भावे क्तप्रत्ययः । कथञ्चन केनापि प्रकारेण न उपेक्ष्यं न क्षन्तव्यं सर्वथा दोषः परित्याज्य इत्यर्थः । ननु गुणालङ्कारादिसद्भावे सामान्यदोषेण का क्षतिरिति चेत् तत्राह स्यादिति । वपुः शरीरं सुन्दरमपि स्वभावतः गुणादिवत्तया वा

गुणदोषान् अशास्त्रज्ञः कथं विभजते जनः ।
किमन्धस्याधिकारोऽस्ति रूपभेदोपलब्धिषु ॥ ८ ॥
अतः प्रजानां व्युत्पत्तिमभिसन्धाय सूरयः ।
वाचां विचित्रमार्गाणां निबबन्धुः क्रियाविधिम् ॥ ९ ॥

सुदर्शनमपि एकेन एकाङ्गवर्त्तिना क्षुद्रेणापि श्वित्रेण धवलरोगेण दुर्भगं घृणितं स्यात् अत्र दृष्टान्तालङ्कारः। तदुक्तं साहित्यदर्पणे, दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिविम्बनम् इति ॥ ७ ॥

अशास्त्रज्ञः अविद्वान् जनः गुणदोषान् काव्यस्य उपादेयत्वव्यञ्जका धर्मा गुणाः तान् हेयत्वव्यञ्जका धर्मा दोषाः तांश्च कथं विभजते विशेषेण बुध्यते नैवेत्यर्थः ओजःप्रसादादिगुणानां श्रुतिकट्वादिदोषाणाञ्च काव्यपाठश्रवणमात्रेण सामान्यतः परिज्ञानेऽपि शास्त्राविज्ञाने विशेषज्ञानासम्भवादिति भावः। तथाहि रूपाणां सौन्दर्य्यादीनां भेदोपलब्धिषु विशेषज्ञानेषु अन्धस्य अधिकारः शक्तिः किम् अस्ति नैवेत्यर्थः। अत्रापि दृष्टान्तालङ्कारः ॥ ८ ॥

अतः कारणात् गुणदोषाणां विभागादेः शास्त्रगम्यत्वात् हेतोः सूरयः पूर्वपण्डिताः भरतादयः प्रजानां लोकानां व्युत्पत्तिं वाग्वैचित्रज्ञानम् अभिसन्धाय अभिप्रेत्य उद्दिश्य इत्यर्थः विचित्रमार्गाणां विचित्रा विविधा मार्गाः पन्थानः रीतयः गौड़ीप्रभृतयः यासां तथाभूतानां वाचां काव्यप्रबन्धानाम् इत्यर्थः क्रियाविधिं रचनाविधानं निबबन्धुः चक्रुः इत्यर्थः काव्यग्रन्थान् रचयामासुः इति यावत् ॥ ९ ॥

तैः शरीरञ्च काव्यानामलङ्काराश्च दर्शिताः ।
शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली ॥ १० ॥
गद्यं पद्यञ्च मिश्रञ्च तत् त्रिधैव व्यवस्थितम् ।
पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ॥११॥
छन्दोविचित्यां सकलस्तत्प्रपञ्चो निदर्शितः ।
सा विद्या नौस्तितीर्षूणां गम्भीरं काव्यसागरम् ॥१२॥

इदानीं प्राचीनसंवादनिर्देशपुरःसरं काव्यशरीरं निरूपयति तैरिति । तैः पूर्वपण्डितैः काव्यानां शरीरम् अलङ्काराश्च अलङ्क्रियते एभिरिति व्युत्पत्त्या अलङ्काराः काव्यशरीरशोभका गुणालङ्कारादयश्च दर्शिताः । काव्यानामिति बहुत्वं प्रकारभेदविवक्षयोक्तमवगन्तव्यम् । किं तत्शरीरमित्याकाङ्क्षायां स्वमतमुद्घाटयति शरीरमिति तावच्छब्दो वाक्यालङ्कारार्थः । इष्टाः हृद्याः रसाद्यनुगमेन मनोहरा इत्यर्थः ये वाच्यलक्ष्यव्यङ्ग्यभेदेन विविधा अर्थाः तैः व्यवच्छिन्ना विभूषिता पदावली पदसमष्टिः काव्यस्य शरीरमिति वर्त्तुलार्थः ॥ १० ॥

इदानीं काव्यभेदान् दर्शयति गद्यमिति । तत् काव्यं त्रिधैव त्रिप्रकारेणैव व्यवस्थितं सिद्धान्तितं प्राचीनैरिति शेषः । गद्यं छन्दोरहितं पद्यं छन्दोबद्धं, मिश्रं गद्यपद्योभयात्मकम् इत्यर्थः । तत्र पद्यं चतुश्चरणनिबद्धं तदपि वृत्तं जातिरिति द्विविधम् अक्षरसंख्यया निबद्धं वृत्तं मात्रया निबद्धा जातिरिति ज्ञेयम् ॥ ११ ॥

छन्दांसि विचीयन्ते विज्ञायन्ते अनयेति छन्दोविचित्यां पिङ्गलादिकृतच्छन्दोग्रन्थे तेषां वृत्तजातिप्रभृतीनां प्रपञ्चः

मुक्तकं कुलकं कोषः सङ्घात इति तादृशः ।
सर्गबन्धाङ्गरूपत्वादनुक्तः पद्यविस्तरः ॥ १३ ॥
सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम् ।
आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम् ॥१४॥

विस्तारः निदर्शितः निरूपितः सा विद्या छन्दोज्ञानमित्यर्थः गम्भीरम् अगाधं दुर्गममित्यर्थः काव्यसागरं काव्यरूपमर्णवं तितीर्षूणां तरितुमिच्छूनां नौः तरणिस्वरूपा इत्यर्थः काव्यानां प्रायेण छन्दोबद्धतया तत्पाठार्थिभिः छन्दोज्ञाने अवश्यमेव यतितव्यमिति भावः ॥ १२ ॥

इदानीं महाकाव्यं निरूपयिष्यन् तदवान्तरभेदकथनस्य तदन्तःपातित्वादनुपयोगित्वं दर्शयति, मुक्तकमिति । अत्र इति-पदम् एवमर्थकम् । मुक्तकं श्लोकान्तरनिरपेक्षमेकमेव पद्यम् । तदुक्तम् अग्निपुराणे, मुक्तकं श्लोक एवैकश्चमत्कारक्षमः सताम् इति । कुलकं पञ्चश्लोकात्मकं पद्यम् । तदुक्तं, द्वाभ्यान्तु युग्मकं ज्ञेयं त्रिभिः श्लोकैः विशेषकम् । चतुर्भिस्तु कलापं स्यात् पञ्चभिः कुलकं मतम् ॥ इति । कोषः अन्योन्यनिरपेक्षः पद्यसमूहः । उक्तञ्च, कोषः श्लोकसमूहस्तु स्यादन्योन्यानवेक्षक इति । सङ्घातः प्रत्येकपरिसमाप्तार्थकपद्यैः कथासमाप्तिः । तदुक्तं, यत्र कविरेकमर्थं वृत्तेनैकेन वर्णयति काव्ये । सङ्घातः स निगदितो वृन्दावनमेघदूतादिरिति एवं तादृशः तथाविधः युग्मकादिश्च पद्यविस्तरः पद्यानां विस्तारः सर्गबन्धस्य महा-काव्यस्य अङ्गरूपत्वात् अवयवस्वरूपत्वात् अनुक्तः न प्रदर्शित इत्यर्थः ग्रन्थविस्तारभिया इति भावः ॥ १३ ॥

सम्प्रति महाकाव्यं निरूपयति सर्गबन्ध इत्यादिना । सर्गेण

इतिहासकथोद्भूतमितरद्वा सदाश्रयम् ।
चतुर्वर्गफलोपेतं चतुरोदात्तनायकम् ॥ १५ ॥
नगरार्णवशैलर्त्तु चन्द्रार्कोदयवर्णनैः ।
उद्यानसलिलक्रीड़ामधुपानरतोत्सवैः ॥ १६ ॥

बन्धो यस्य स श्लोकसङ्घातः महाकाव्यं तस्य महाकाव्यस्य लक्षणं स्वरूपम् उच्यते आशीः शुभाशंसनं नमस्क्रिया नमस्कारः स्वापकर्षबोधकवचनं वापि अथवा वस्तुनः प्रकृतस्य तदंशस्य वा निर्देशः कथनं तस्य महाकाव्यस्य मुखम् आदि आशीः-प्रभृतीनामन्यतमं प्रथमं वर्णनीयमिति निष्कर्षः । तत्र कीचक-बधादावाशीः रघुवंशादौ नमस्कारः शिशुपालबधादौ वस्तु-निर्देश इति ॥ १४ ॥

इतिहासेति। इतिहासानां रामायणभारतादीनां कथया उद्भूतं निबद्धं भवेत् महाकाव्यमिति शेषः सदृत्त वा अथवा सन् सत्यभूतः वृत्तान्तः आश्रयो यस्य तादृशम् इतरत् रामा-यणमहाभारतादिव्यतिरिक्तमपि एतेन असत्यवृत्तं महाकाव्ये न वर्णनीयमिति प्रदर्शितम्। चतुर्णां धर्मार्थकाममोक्षाणां वर्गः चतुर्वर्गः स एव फलं तेन उपेतं युक्तम्। चतुरः कार्य्य-कुशलः उदात्तः महान् नायकः प्रधानपुरुषः यस्मिन् तथा-भूतम्। नायकलक्षणमुक्तं दर्पणे यथा त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही। दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्य-शीलवान् नेता इति ॥ १५ ॥

केवलं नायकवर्णनेन कवीनां न चरितार्थता इतिहासादेः एव तज्ज्ञानस्य सिद्धत्वात् अतः नायकवर्णनमाश्रित्य तदानु-षङ्गिकनगरादिकमपि वर्णनीयं तथात्वे काव्यशोभाजननात्

विप्रलम्भै विवाहैश्च कुमारोदयवर्णनैः ।
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि ॥ १७ ॥
अलङ्कृतमसंक्षिप्तं रसभावनिरन्तरम् ।
सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः ॥ १८ ॥

श्रोतॄणामुन्मुखीकरणं स्यादित्याशयेनाह नगरेत्यादि। नगरं बहुसमृद्धजनाकीर्णः प्रदेशः अर्णवः समुद्रः शैलः पर्वतः चन्द्रार्कोदयः चन्द्रसूर्य्ययोरुदयः उपलक्षणमेतत् अस्तमनमपि, एतेषां वर्णनैः उद्यानसलिलयोः क्रीड़ा मधुपानं रतोत्सवः सम्भोगशृङ्गारः तैः विप्रलम्भैः सम्भोगशृङ्गारात् पूर्ववर्त्तिभिः पूर्वरागप्रभृतिभिः चतुर्विधभावैः विवाहैः परिणयव्यापारैः कुमारोदयस्य पुत्रोत्पत्तेर्वर्णनैः तथा मन्त्रः परामर्शः दूतप्रयाणम् आजिः युद्धं नायकस्य अभ्युदयः जयलाभः तैः अलङ्कृतं शोभितं नगरादयो महाकाव्ये वर्णनीया इत्यर्थः। उक्तञ्च। सन्ध्यासूर्य्येन्दुरजनीप्रदोषध्वान्तवासराः। प्रातर्मध्याह्नमृगया शैलर्त्तुवनसागराः। सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः। रणप्रयाणोपयममन्त्रपुत्रोदयादयः। वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह ॥ १६ ॥ १७ ॥

असंक्षिप्तं संक्षेपेण न वर्णनीयं सविस्तरमित्यर्थः तथा सति सहृदयहृदयङ्गमं भवतीति भावः। रसैः शृङ्गारादिभिः भावैः प्राधान्येनाभिव्यक्तैः व्यभिचारिभिः उद्बुद्धमात्रैः स्थायिभिः रत्यादिभिः तथा देवादिविषयकैः अनुरागैश्च निरन्तरं सङ्कुलं पूर्णम् इति यावत्। अनतिविस्तीर्णैः शास्त्रनियमिताष्टादिभिः तदुक्तमीशानसंहितायाम्। अष्टसर्गान्न तु न्यूनं त्रिंशत्सर्गाच्च नाधिकम्। महाकाव्यं प्रयोक्तव्यं महापुरुषकीर्त्तियुगिति।

सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम् ।
काव्यं कल्पान्तरस्थायि जायेत सदलङ्कृति ॥१९॥
न्यूनमप्यत्र यैः कैश्चिदङ्गैः काव्यं न दुष्यति ।
यद्युपात्तेषु सम्पत्तिराराधयति तद्विदः ॥ २० ॥

एतच्च प्रायिकम् आधिक्यस्यापि तत्रैव कीर्त्तनात् यथा, नात्यन्तविस्तरः सर्गस्त्रिंशतो वा न चोनता। द्विशत्या नाधिकं कार्य्यमेतत् पद्यस्य लक्षणमिति। अव्यवृत्तैः दोषपरिहारिण गुणालङ्कारसंयोगेन च श्रुतिसुखावहपद्यैरित्यर्थः। सुसन्धिभिः परस्परसापेक्षैरित्यर्थः यच्च कैश्चित् "सन्धयो नाटकलक्षणोक्ता मुखप्रतिमुखगर्भविमर्शनिर्वहणाख्याः पञ्च" इति व्याख्यातं तद्भ्रान्तं महाकाव्यलक्षणे नाटकीयलक्षणयोगस्य असम्भवात् इति ॥ १८ ॥

सर्वत्रेति। सर्वत्र भिन्नाः वृत्तान्ता येषु तैः सर्वेषु एव सर्गेषु वर्णनीयविषयाणां प्रभेदादिति भावः। अथवा भिन्नं पृथक्-छन्दसा रचितं वृत्तं पद्यम् अन्ते येषां तैः प्रत्येकं सर्गान्ते प्रायशस्तथा दर्शनात् एकवृत्तमयैः पद्यैः अवसानेऽन्यवृत्तकैरिति वचनाच्च यद्वा भिन्नानि पृथक्छन्दोभिर्बद्धानि तैः अन्ताः रम्याः तादृशैः। तदुक्तं, नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यत इति। उपेतं युक्तम्। सदलङ्कृति सत्यः विद्यमानाः अथवा शोभनाः अलङ्कृतयः अनुप्रासोपमादयः यस्मिन् तादृशं काव्यं लोकानां रञ्जकं सहृदयमनोहरं सत् कल्पान्तरस्थायि चिर-स्थायि चिरकीर्त्तिकरमिति भावः जायेत भवेत् ॥ १९ ॥

इत्थं महाकाव्यलक्षणमुक्त्वा खण्डकाव्यमपि निरूपयति, न्यूनमिति। अत्र महाकाव्ये उक्तेष्विति शेषः यैः कैश्चित् अङ्गैः

गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम् ।
निराकरणमित्येष मार्गः प्रकृतिसुन्दरः ॥ २१ ॥
वंशवीर्य्यश्रुतादीनि वर्णयित्वा रिपोरपि ।
तज्जयान्नायकोत्कर्षवर्णनञ्च धिनोति नः ॥ २२ ॥
अपादः पदसन्तानो गद्यमाख्यायिका कथा ।
इति तस्य प्रभेदौ द्वौ तयोराख्यायिका किल ॥२३॥

न्यूनं हीनमपि काव्यं न दुष्यति यदि उपात्तेषु वर्णितेषु विषयेषु सम्पत्तिः रचनामाधुर्य्यं तद्विदः काव्याभिज्ञान् आराधयति रसादिसद्भावेन प्रीणाति। तदुक्तं, नावर्णनं नगर्य्यादेर्दोषाय विदुषां मनः। यदि शैलर्त्तु रात्र्यादेर्वर्णनेनैव तुष्यति ॥ इति यद्युपात्तार्थसम्पत्तिरिति पाठे स एवार्थः ॥ २० ॥

सम्प्रति काव्ये नायकप्रतिनायकयोर्वर्णनप्रकारमाह, गुणत इति वंशेति द्वाभ्याम्। प्राक् प्रथमं नायकं गुणतः उपन्यस्य गुणवत्त्वेन कीर्त्तयित्वा तेन नायकेन विद्विषां शत्रूणां प्रतिनायकानामित्यर्थः निराकरणं पराजयः, इत्येषः मार्गः वर्णनरीतिः प्रकृतिसुन्दरः स्वभावरम्यः यथा रामायणे, रामरावणयोर्गुणदोषान् वर्णयित्वा रावणबधवर्णनम् ॥ २१ ॥

रिपोः शत्रोरपि वंशः कौलीन्यं वीर्य्यं पराक्रमः श्रुतं शास्त्रज्ञानम् आदिना दयादाक्षिण्यादि यथायथमवगन्तव्यम्। एतानि वर्णयित्वा कीर्त्तयित्वा तज्जयात् तस्य रिपोः जयात् नायकस्य उत्कर्षवर्णनं नः अस्मान् धिनोति तोषयति। यथा किराते दुर्य्योधनस्य प्रजारञ्जनम् ॥ २२ ॥

पद्यं निरूप्य गद्यमाह अपाद इति। अपादः पादः छन्दोबद्धः

नायकेनैव वाच्यान्या नायकेनेतरेण वा ।
स्वगुणाविष्क्रियादोषो नात्र भूतार्थशंसिनः ॥२४॥
अपि त्वनियमो दृष्टस्तत्राप्यन्यैरुदीरणात् ।
अन्यो वक्ता स्वयं वेति कीदृग्वा भेदलक्षणम् ॥२५॥

श्लोकचतुर्थांशः तद्रहितः पदसन्तानः पदसमूहः गद्यं तस्य गद्यस्य द्वौ प्रभेदौ आख्यायिका कथा च। तदुक्तं, कथायां सरसं वस्तु गद्यैरेव विनिर्मितम्। क्वचिदत्र भवेदार्य्या क्वचिद्वक्त्रापवक्त्रके। आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्त्तनम्॥ इति। यथा कादम्बर्य्यादिः। आख्यायिका कथावत् स्यात् कवेर्वंशादिकीर्त्तनम्। अस्यामन्यकवीनाञ्च वृत्तं गद्यं क्वचित् क्वचित्॥ इति। तयोर्मध्ये आख्यायिका नायकेनैव वाच्या नायक एव अस्या वक्ता इत्यर्थः एवकारादन्यव्यवच्छेदः। उक्तञ्च, वृत्तमाख्यायते यस्यां नायकेन स्वचेष्टितम् इति। अन्या कथा नायकेन तदितरेण वा वाच्या यथा कादम्बर्य्यां चन्द्रापीड़स्य नायकस्य महाश्वेतया संलापः। ननु नायकस्य वक्तृत्वे तस्य स्वगुणाविष्करणं दोषायेति शङ्कां वारयन्नाह स्वगुणेति भूतार्थशंसिन यथार्थवादिनः नायकस्य अत्र वक्तृत्वे स्वगुणाविष्क्रिया निजगुणख्यापनं दोषः न भवतीति शेषः। असत्यकथनस्यैव दोषत्वात् इति भावः॥ २३ ॥ २४ ॥

पूर्वोक्तं प्राचीनमतं दूषयन्नाह, अपीति। अपितु किन्तु तत्रापि आख्यायिकायामपि अन्यैः नायकभिन्नैः उदीरणात् कथनात् नायकादन्येषामपि वक्तृत्वादिति यावत् अनियमः पूर्वमतेन विरोधः दृष्टः। कथायाञ्च अन्यः नायकभिन्नः स्वयं नायको वा वक्ता इति भेदलक्षणम् आख्यायिकाया भेदकरणं

वक्त्रञ्चापरवक्त्रञ्च सोच्छ्वासत्वञ्च भेदकम् ।
चिह्नमाख्यायिकायाश्चेत् प्रसङ्गेन कथास्वपि ॥२६॥
आर्य्यादिवत् प्रवेशः किं न वक्त्रापरवक्त्रयोः ।
भेदश्च दृष्टो लम्भादिरुच्छ्वासो वास्तु किं ततः ॥२७॥

वा कीदृक् अकिञ्चित्करमिति भावः । आख्यायिकाया वक्ता नायकः अस्याश्च यदा स एव वक्ता तदानयोः अभेदत्वस्य दुर्वारत्वादित्यनुसन्धेयम् ॥ २५ ॥

अपरञ्च भेदकरणं दूषयति वक्त्रमिति । वक्त्रम् अपरवक्त्रञ्च छन्दसी, तदुक्तं वक्त्रं नाद्यान्नसौ स्यातामब्धेर्योऽनुष्टुभि ख्यातमिति अयुजि ननरला गुरुः समे तदपरवक्त्रमिदं नजौ जरौ इति । वैतालीयं पुष्पिताग्राञ्चेच्छन्त्यपरवक्त्रकमिति च । उच्छ्वासः कथांशव्यवच्छेदः आश्वासापरपर्य्यायः तदुक्तं कथांशानां व्यवच्छेद आश्वास इति कथ्यते । तत्साहित्यञ्च भेदकं कथाया इति शेषः । एतत् त्रयम् आख्यायिकायाः चिह्नं लक्षणं चेत् कथासु अपि प्रसङ्गेन प्रस्तावक्रमेण आर्य्यादिवत् वक्त्रापरवक्त्रयोः छन्दसोः प्रवेशः किं न भवेत् इति शेषः । अपितु भवेदेव । उक्तञ्च कथालक्षणाधिकारे आर्य्यावक्त्रापवक्त्राणां छन्दसा येन केनचिदिति । तस्मादुक्तभेदकरणं भ्रमविजृम्भितमेवेति भावः । लम्भः कथापरिच्छेदस्य संज्ञाभेदः आदिपदेन उल्लासादीनां ग्रहणं लम्भादि उच्छ्वासो वा भेदश्च दृष्टः कुत्रचित् कथायां लम्भपदेन परिच्छेदः कृतः आख्यायिकायामुच्छ्वासपदेन वा उल्लासपदेन कृत इत्यनयोर्भेदः वा अस्तु ततः किं संज्ञामात्रभेदो न किञ्चित्कर इत्यर्थः स्वरूपवैलक्षण्यस्यैव भेदकत्वेन कीर्त्तनात् ॥ २६ ॥ २७ ॥

तत् कथाख्यायिकेत्येका जातिः संज्ञाद्वयाङ्किता ।
अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः ॥ २८ ॥
कन्याहरणसंग्रामविप्रलम्भोदयादयः ।
सर्गबन्धसमा एव नैते वैशेषिका गुणाः ॥ २९ ॥

इदानीं स्वमतमाविष्करोति तदिति । तस्मात् कथा आख्यायिका च इति संज्ञाद्वयेन नामभ्याम् अङ्किता न तु स्वरूपत इति भावः । एका अभिन्ना जातिः उभयोरपि गद्यमयत्वात् इति भावः । अत्रैव कथाख्यायिकयोः इत्यर्थः शेषाः अवशिष्टाः आख्यानजातयः खण्डकथादयश्च अन्तर्भविष्यन्ति एतयोः प्रकारभेदा इति भावः । तदुक्तम् आग्नेये, आख्यायिका कथा खण्डकथा परिकथा तथा । कथालिकेति मन्यन्ते गद्यकाव्यञ्च पञ्चधा ॥ इति ॥ २८ ॥

कथाख्यायिकयोर्भेदान्तरमपि दूषयति कन्येति । कन्याया हरणं युद्धादिना बलात् ग्रहणं राक्षसोद्वाह इत्यर्थः । तदुक्तं, हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात् । प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते ॥ इति । संग्रामो युद्धं विप्रलम्भः सम्भोगशृङ्गारस्य पूर्वभावः स च पूर्वरागमानप्रवासकरुणात्मकश्चतुर्विध इति दर्पणकारः । उदयः सूर्य्यचन्द्रयोः अभ्युन्नतिर्वा नायकस्य, आदिना उद्याननगरादयो गृह्यन्ते । एते गुणाः आख्यायिकाया इति शेषः यथा आख्यायिकामुपक्रम्य कन्याहरणसंग्रामविप्रलम्भोदयान्वितेति सर्गबन्धसमाः महाकाव्यसामान्या एव कथायां किमु वक्तव्यमिति भावः अतः एते वैशेषिकाः भेदकाः धर्मा न । उक्तञ्च अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यास इति ॥ २९ ॥

कविभावकृतं चिह्नमन्यत्रापि न दुष्यति ।
सुखमिष्टार्थसंसिद्धै किं हि न स्यात् कृतात्मनाम्॥३०॥
मिश्राणि नाटकादीनि तेषामन्यत्र विस्तरः ।
गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयते ॥ ३१ ॥

ननु कथायां कवेर्भावविशेषो लक्ष्यते आख्यायिकायान्तु न तथेत्याशङ्क्य तदपि निरस्यति कवीति। कविभावकृतं कवेः भावकृतम् अभिप्रायरचितं चिह्नं लक्षणम् अन्यत्रापि कथायाम् इति शेषः न दुष्यति यथा शिशुपालबधे सर्गशेषश्लोकेषु श्रीशब्दः किराते च लक्ष्मीशब्दः प्रयुक्तः। एवम् आख्यायिकायां प्रयुक्तं तत् न दूष्यं भवति तथाहि इष्टार्थसंसिद्धैर अभिप्रेतार्थसाधनाय कृतात्मनां सुधियां किं हि सुखं प्रारब्धः न स्यात् अपितु सर्वमेव तेषाम् इच्छाधीनत्वात् निरङ्कुशाः कवय इति भावः ॥ ३० ॥

सम्प्रति मिश्रकाव्यमाह मिश्राणीति। नाटकादीनि दृश्यकाव्यानि मिश्राणि गद्यपद्योभयमिश्रितानि आदिपदेन प्रकरणादीनां परिग्रहः। उक्तञ्च नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः। ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश। तथा। नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकं प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खनं रासकं तथा। संलापकं श्रीगदितं शिल्पकञ्च विलासिका। दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेत्यपि। अष्टादश प्राहुरुपरूपकाणि मनीषिणः॥ इति। तेषां नाटकादीनाम् अन्यत्र भरतादिग्रन्थे विस्तरः बाहुल्येन प्रकाशः तद्विजिज्ञासुभिस्तत्रैव यतितव्यं ग्रन्थबाहुल्यभिया न ममात्र प्रयास इति भावः। न केवलं दृश्यकाव्यस्य मिश्रत्वं

तदेतद्वाङ्मयं भूयः संस्कृतं प्राकृतं तथा ।
अपभ्रंशश्च मिश्रञ्चेत्याहुरार्य्याश्चतुर्विधम् ॥ ३२ ॥
संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः ।
तद्भवस्तत्समो देशीत्यनेकः प्राकृतक्रमः ॥ ३३ ॥

श्रव्यकाव्यस्यापि कदाचित् मिश्रत्वमस्तीत्याह गद्येति । गद्यपद्यमयी काचित् वाणी इति शेषः चम्पूरिति अभिधीयते आख्यायिकादौ गद्यस्यैवाधिक्यं पद्यमल्पमेव इह तु उभयोरेव प्राधान्यमित्यनयोर्भेदः । काचित् इत्यनेन विरुदाख्यकाव्यव्यवच्छेदः तस्य राजस्तुतिविषयत्वेन विभिन्नविषयत्वात् तदुक्तं गद्यपद्यमयी राजस्तुतिर्विरुदमुच्यते इति ॥ ३१ ॥

तत् तस्मात् एतत् वाङ्मयं वागात्मकं काव्यशास्त्रं संस्कृतं देवभाषया रचितं प्राकृतं तदाख्यभाषया रचितम् अपभ्रंशः वक्ष्यमाणोक्तभाषाविशेषनिबद्धं तथा मिश्रञ्च नानाभाषामयमित्यर्थः इति एवंरूपेण आर्य्याः विद्वांसः चतुर्विधम् आहुः वर्णयन्ति । उक्तञ्च भोजेन, संस्कृतेनैव कोऽप्यर्थः प्राकृतेनैव चापरः । शक्यो वाचयितुं कश्चित् अपभ्रंशेन वा पुनः ॥ पैशाच्या शौरसेन्या च मागध्यान्यो निबध्यते । द्वित्राभिः कोऽपि भाषाभिः सर्वाभिरपि कश्चन ॥ इति ॥ ३२ ॥

संस्कृतादिकं विवृणोति संस्कृतमिति । दैवी देवसम्बन्धिनी देवव्यवहार्य्या वा वाक् महर्षिभिः संस्कृतम् अन्वाख्याता कथिता, प्राकृतानां नीचानामिदं प्राकृतं तस्य क्रमः नियमः अनेकः बहुविधः तथा तद्भवः तस्मात् संस्कृतात् भवः उत्पन्नः तत्समः संस्कृतसदृशः तथा देशी तत्तद्देशप्रचलित इत्यर्थः ।

महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः ।
सागरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम् ॥३४॥
शौरसेनी च गौड़ी च लाटी चान्या च तादृशी ।
याति प्राकृतमित्येवं व्यवहारेषु सन्निधिम् ॥३५॥
आभीरादिगिरः काव्येष्वपभ्रंश इति स्मृताः ।
शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितम् ॥ ३६ ॥

देशीनामपि संस्कृतसादृश्यात् द्वावेव भेदाविति केचित् । उक्तञ्च, आर्षोत्थमार्षतुल्यञ्च द्विविधं प्राकृतं विदुः इति ॥ ३३ ॥

महाराष्ट्राश्रयां महाराष्ट्रो नाम दक्षिणापथवर्त्ती जनपद-विशेषः तदाश्रयां तत्सम्बन्धिनीं तत्रत्यैर्व्यवहृतामित्यर्थः भाषां प्रकृष्टम् उत्कृष्टं प्राकृतं विदुः जानन्ति बुधा इति शेषः । सूक्ति-रत्नानां सूक्तयः सुवचनानि एव रत्नानि सहृदयानन्दजननात् रत्नस्वरूपाणि तेषां सागरः सेतुबन्धादि सेतुबन्धः तदाख्यकाव्य-ग्रन्थविशेषः आदिपदेन दशमुखबधादीनां परिग्रहः यन्मयः यदात्मकः महाराष्ट्रीयभाषया रचित इत्यर्थः ॥ ३४ ॥

शूरसेनो नाम मथुरासन्निहितजनपदभेदः गौड़ः देश-विशेषः लाटीव कश्चित् देशभेदः तत्तद्देशप्रचलिता तथा तादृशी तत्सदृशी अन्या च देशीया भाषा प्राकृतमिति एवं व्यवहारेषु प्राकृतनामव्याहारेषु सन्निधिं याति प्राप्नोति अन्या च तादृशी-त्यनेन सर्वदेशीया एव प्राकृतनाम्ना कविभिर्निबध्यन्ते इत्यपि सूचितम् ॥ ३५ ॥

काव्येषु आभीरो गोपजातिविशेषः आदिपदेन कैवर्त्त-चाण्डालादीनां ग्रहणं तेषां गिरः वाचः अपभ्रंश इति स्मृताः

संस्कृतं सर्गबन्धादि प्राकृतं स्कन्धकादिकम्।
आसारादीन्यपभ्रंशो नाटकादि तु मिश्रकम्॥३७॥

अपभ्रंशनाम्ना कथिताः शास्त्रेषु काव्यातिरिक्तेषु वेदादिषु तु संस्कृतात् अन्यत् सर्वं प्राकृतम् उल्लिखितमाभीरादिवचनञ्च इत्यर्थः अपभ्रंशतया उदितं कथितम्॥ ३६॥

संस्कृतादिकं निरूप्य तत्तल्लक्ष्याणि निरूपयति संस्कृतमिति। सर्गबन्धः पूर्वमुक्तः प्रबन्धविशेषः महाकाव्यमित्यर्थः आदिपदेन खण्डकाव्यादीनां परिग्रहः संस्कृतं संस्कृतभाषया रचितम्। तथाच अग्निपुराणम्, सर्गबन्धो महाकाव्यमारब्धं संस्कृतेन यत्। तद्भवं न विशेत्तत्र तत्समं नापि किञ्चन॥ इति। स्कन्धकादिकं स्कन्धकं छन्दोभेदः आदिपदेन गलितकादीनां ग्रहणम्। तदुक्तं, छन्दसा स्कन्धकेनैव तथा गलितकैरपि इति। स्कन्धकादिच्छन्दोरचितं काव्यं प्राकृतं प्राकृतभाषामयमित्यर्थः। आसारादीनि आसारादिभिः छन्दोभिः निबद्धमित्यर्थः काव्यम् अपभ्रंशः। नाटकादि तु नाटकम् आदि यस्य तत् आदिना प्रकरणनाटिकादिपरिग्रहः मिश्रकं नानाभाषामयमित्यर्थः। तथाचोक्तं नाटकादिप्रस्तावे, पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम्। शौरसेनी प्रयोक्तव्या तादृशीनाञ्च योषिताम्॥ आसामेव तु गाथासु महाराष्ट्रीं प्रयोजयेत्। अत्रोक्ता मागधी भाषा राजान्तःपुरचारिणाम्॥ चेटानां राजपुत्राणां श्रेष्ठिनाञ्चार्द्धमागधी। प्राच्या विदूषकादीनां धूर्त्तानां स्यादवन्तिका॥ योधनागरिकादीनां दाक्षिणात्याहि दीव्यताम्। शकाराणां शकादीनां शाकारीं संप्रयोजयेत्॥ इति॥ ३७॥

कथाहि सर्वभाषाभिः संस्कृतेन च बध्यते।
भूतभाषामयीं प्राहुरद्भुतार्थां वृहत्कथाम् ॥ ३८॥
लास्यच्छलितशल्यादि प्रेच्यार्थमितरत् पुनः।
श्रव्यमेवेति सैषापि द्वयी गतिरुदाहृता ॥ ३९ ॥

कथा पूर्वोक्तः काव्यभेदः सर्वभाषाभिः संस्कृतेन च बध्यते विरच्यते हिशब्दोऽवधारणे तथाहि कथा द्विविधा मिश्रभाषामयी संस्कृतमयी च इति भावः। वृहत्कथां तदाख्यकाव्यन्तु भूतभाषा पैशाची भाषा तन्मयीं तद्रचिताम् अद्भुतार्थां विस्मय-रसपूर्णां प्राहुः विद्वांस इति शेषः ॥ ३८ ॥

सम्प्रति दृश्यश्रव्यत्वभेदेन काव्यस्य द्वैविध्यमाह लास्येति। लास्यं शृङ्गाररसाविद्धस्त्रीजननृत्यम्। तदुक्तं, लासः स्त्रीपुंसयो-र्भावस्तदर्हं तत्र साधु वा। लास्यं मनसिजोल्लासकरं मृदङ्ग-हाववत्। देव्यै देवीपदिष्टत्वात् प्रायः स्त्रीभिः प्रयुज्यते ॥ इति। अन्यच्च, कोमलं मधुरं लास्यं शृङ्गाररससंयुतम्। गौरीतोष-करञ्चापि स्त्रीनृत्यन्तु तदुच्यते ॥ इति। छलितं पुरुषनर्त्तनम्। तदुक्तं, पुंनृत्यं छलितं विदुः इति। शल्या कपालदेशे कर-विन्यासपूर्वकं नृत्यं तदाह, भाले हस्तं समावेश्य नृत्यं शल्येति कीर्त्तितम् इति। शल्येत्यत्र साम्येति क्वचित् पाठः तथात्वे साम्यं गीतवादित्रादिसमन्वितं नृत्यं रासापरपर्य्यायमभिहितम्। आदिपदेन ताण्डवादिपरिग्रहः। तथोक्तं, तल्लास्यं ताण्डवञ्चेति छलितं शल्यया सह। हल्लीशकञ्च रासञ्च षट्प्रकारं विदुर्बुधा ॥ इति ताण्डवमुद्धतनृत्यं यथा, उद्धतन्तु महेशस्य शासनात् तण्डुनोदितम्। भरताय ततः ख्यातं लोके ताण्डवसंज्ञया ॥ इति। हल्लीशं स्त्रीणां मण्डलाकारेण नृत्यम्। यदुक्तं, मण्ड-

अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम् ।
तत्र वैदर्भगौड़ीयौ वर्ण्येते प्रस्फुटान्तरौ ॥ ४० ॥
श्लेषः प्रसादः समता माधुर्य्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ॥ ४१ ॥

लेन तु यत् स्त्रीणां नृत्यं हल्लीशकं विदुः । तत्र नेता भवेदेको गोपस्त्रीणां यथा हरिः ॥ तदेवं लास्यादिसङ्घटितं काव्यं प्रेक्ष्यार्थं प्रेक्ष्यः दृश्यः अर्थः प्रतिपाद्यं वस्तु यस्मिन् तत् नटैः रामाद्यवस्थानुकरणस्य दर्शनविषयत्वात् इतरत् अन्यत् दृश्य-काव्याद् भिन्नं मुक्तकादिश्रव्यमेव श्रवणमात्रविषयत्वात् । उक्तञ्च भोजराजेन, श्रव्यं तत् काव्यमाहुर्यन्नेक्ष्यते नाभिधीयते । श्रोत्रयोरेव सुखदं भवेत्तदपि षड्विधम् ॥ इति । इत्थं सा प्रसिद्धा एषा उक्तरूपा द्वयी द्विविधा गतिः काव्यभेदप्रवर्त्तकः पन्थाः उदाहृता प्राचीनैरिति शेषः ॥ ३९ ॥

एवं काव्यभेदं निरूप्य तस्य रीतिर्निरूपयति अस्तीति । अनेकः विविधः गिरां वाचां मार्गः रचनापद्धतिः रीतिः इति यावत् अस्ति । तथाच, गौड़ी वैदर्भी पाञ्चाली इति वामनः । अतिरिक्ता लाटीति दर्पणकारः । वैदर्भी चाथ पाञ्चाली गौड़ी चावन्तिका तथा । लाटीया मागधी चेति षोढ़ा रीतिर्निगद्यत इति भोजराजादयः । स च परस्परं सूक्ष्मभेदः स्वल्पमात्रभेदः अतः तन्निरूपणेन ग्रन्थबाहुल्यकरणं वृथेति भावः । तत्र विवि-धेषु मार्गेषु मध्ये वैदर्भगौड़ीयौ वर्ण्येते यतः तौ प्रस्फुटम् अन्तरं ययोः तादृशौ एकस्य सुकुमारत्वेन अपरस्य उत्कटत्वेन अत्यन्त-वैसादृश्यात् इति भावः ॥ ४० ॥

के ते भैदर्भीगौड़ग्रौ इत्याह श्लेष इति । श्लेषादयः दश

इति वैदर्भमार्गस्य प्राणा दशगुणाः स्मृताः ।
एषां विपर्य्ययः प्रायो दृश्यते गौड़वर्त्मनि ॥४२॥
श्लिष्टमस्पृष्टशैथिल्यमल्पप्राणाक्षरोत्तरम् ।
शिथिलं मालतीमाला लोलालिकलिला यथा ॥४३॥

गुणाः शब्दार्थोत्कर्षविधायिनो धर्मविशेषाः वदर्भमार्गस्य वैदर्भीयरीत्याः प्राणाः जीवनानि एतेन श्लेषादिमत्पदरचनावत्त्वं वैदर्भीत्वमित्युक्तम् । स्मृताः पण्डितैः इति शेषः । दर्पणकारादयस्तु आत्मनः शौर्य्यादय इव रसस्य काव्यात्मभूतस्य धर्मा माधुर्य्यौजःप्रसादादय एव गुणा इत्याहुः । गौड़ीवर्त्मनि तु गौड़ीयरीत्यान्तु एषां श्लेषादीनां प्रायः बाहुल्येन विपर्य्ययः वैपरीत्यं दृश्यते विपर्य्ययश्च क्वचित् सर्वथा, क्वचित् केनचित् अंशेनेति बोध्यम् । उक्तञ्च, असमस्तैकसमस्ता युक्ता दशभिर्गुणैश्च वैदर्भी । वर्गद्वितीयबहुला स्वल्पप्राणाक्षरा च सुविधेया इति बहुतरसमासयुक्ता सुमहाप्राणाक्षरा च गौड़ीया । रीतिरनुप्रासमहिमपरतन्त्रा स्तोभवाक्या च इति ॥ ४१ ॥ ४२ ॥

इदानीं श्लेषादीनां लक्षणानि निरूपयति श्लिष्टमित्यादि । अल्पः प्राणः सारः उच्चारणप्रयासः येषां तानि अक्षराणि उत्तराणि प्रधानानि प्रचुराणि यस्मिन् तादृशम् अल्पप्राणाक्षराश्च ह्रस्वस्वरा वर्गीया विषमवर्णा यरलवाश्चेति । शिथिलम् अपिरत्राध्याहार्य्यः अतीव्रमपीत्यर्थः अस्पृष्टं शैथिल्यं येन तत् विन्यासवशात् शिथिलत्वेन अलक्ष्यमाणं वाक्यं श्लिष्टं श्लेषगुणयुक्तमित्यर्थः । तथाच, तादृशाक्षरघटितरचना श्लेष इति फलितम् । दृष्टान्तमाह मालतीति यथा लोलैः चपलैः अलिभिः

अनुप्रासधिया गौड़ैस्तदिष्टं बन्धगौरवात् ।
वैदर्भैर्मालतीदाम लङ्घितं भ्रमरैरिति ॥ ४४ ॥

भ्रमरैः कलिला व्याप्ता मालती माला। एतच्च मकारादिभिः अल्पप्राणाचरैर्घटितम् अनुप्रासवशात् गाढ़मिव प्रतिभासते इत्यत्र श्लेषाख्यगुणो बोद्धव्यः। केचित्तु यत्किञ्चनवर्णघटितानां पदानां बहूनां विन्यासमहिम्ना एकपदवत् अवभासनं श्लेष इति वदन्ति उदाहरन्ति च यथा। उन्मज्जत् जलकुञ्जरेन्द्र-रभसास्फालानुबन्धोद्धतः सर्वाः पर्वतकन्दरोदरभुवः कुर्वन् प्रतिध्वानिनीः। उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथायं तथा प्रायः प्रेङ्खदसङ्ख्यशङ्खधवला वेलेयमुद्गच्छति इति। वस्तु-तस्तु अल्पप्राणेषु वर्णेषु विन्यासोऽप्यन्तरान्तरा। महाप्राणस्य च श्लेषो यथायं भ्रमरध्वनिः। इति क्रमदीश्वरोक्तमेव समी-चीनम् अनुप्रासस्य लक्षणघटकत्वे तद्घटितमाधुर्य्यादौ अति-व्याप्तेरिति ज्ञेयम् ॥ ४३ ॥

गौड़ैः गौड़देशनिवासिभिः कविभिः अनुप्रासधिया अनु-प्रासो वर्णावृत्तिरूपः शब्दालङ्कारः तस्य धिया बोधेन तथा बन्धगौरवात् रचनाया गाढ़त्वात् तत् मालतीमालेत्यादि। श्लेषोदाहरणम् इष्टम् अभिलषितं ते तादृशीमेव रचनां प्रायश इच्छन्तीति भावः। वैदर्भैः विदर्भदेशीयैः कविभिः भ्रमरैः अत्र इवशब्दोऽध्याहार्य्यः मालतीदामेति वाक्यं मालतीमाले-त्यनभिधाय इति भावः। लङ्घितम् आक्रान्तं श्लेषघटितत्वेन अङ्गीकृतमिति यावत् तेषां कुत्रचित् अनुप्रासासद्भावेऽपि श्लेषत्वकीर्त्तनादिति भावः। अयञ्च श्लेषः शब्दमात्रगुणः। अर्थगुणस्तु दर्पणकारादिभिः उक्तास्तत्र तत्र द्रष्टव्यः ॥ ४४ ॥

प्रसादवत् प्रसिद्धार्थमिन्दोरिन्दीवरद्युति।
लक्ष्म लक्ष्मीं तनोतीति प्रतीतिसुभगं वचः ॥४५॥
व्युत्पन्नमिति गौड़ीयैर्नातिरूढ़मपीष्यते।
यथानत्यर्जुनाब्जन्म सदृक्षाङ्को वलक्षगुः ॥ ४६ ॥

प्रसादं निरूपयति प्रसादवदिति। प्रसिद्धः अर्थः प्रतिपाद्यवस्तु यस्य तत् उभयार्थकशब्दानाम् अप्रसिद्धार्थे प्रयोगो निहतार्थतारूपदोषः तद्रहितमित्यर्थः प्रतीत्याम् अर्थपरिज्ञाने सुभगं सरलं झटित्यर्थबोधकं वचः वचनं प्रसादवत् प्रसादगुणयुक्तं तथाच निर्दोषत्वे सति परिस्फुटार्थवत्त्वं प्रसाद इति भावः तत्र उदाहरणम् इन्दोरिति। इन्दीवरं नीलोत्पलं तद्वत् द्युतिर्यस्य तादृशं श्यामवर्णं लक्ष्म कलङ्कः इन्दोः चन्द्रस्य लक्ष्मीं श्रियं तनोति विस्तारयति। अत्र इन्द्वादिशब्दाः प्रसिद्धचन्द्राद्यर्थेषु प्रयुक्ता झटित्यर्थबोधकाश्चेति ज्ञेयम् ॥ ४५ ॥

गौड़ीयानां मतं दर्शयति व्युत्पन्नमिति। गौड़ीयैः तद्देशवासिभिः पण्डितैः न अतिरूढ़मपि अनतिप्रसिद्धमपि निहतार्थत्वदोषाकलितमपीत्यर्थः व्युत्पन्नं व्युत्पत्तियुक्तं योगार्थघटितमित्यर्थः वाक्यं प्रसादवदिति शेषः इष्यते बन्धगाढ़तावशात् वैचित्र्याधायत्वादिति भावः। उदाहरति यथेति अनत्यर्जुनाब्जन्मसदृक्षाङ्क अनत्यर्जुनं नातिधवलं यत् अब्जन्म उत्पलं तस्य सदृक्षः सदृशः अङ्कः कलङ्कः यस्य तथोक्तः वलक्षः धवलः गौः किरणो यस्य सः चन्द्र इति अत्र अर्जुनशब्दः कार्त्तवीर्य्यार्जुनपाण्डवयोः प्रसिद्धः श्वेतवर्णे अप्रसिद्ध इति निहतार्थत्वदोषदुष्टः अब्जन्मशब्दश्च अप्रसिद्धः सदृक्षशब्दश्च उपमागर्भबहु-

समं बन्धेष्वविषमं ते मृदुस्फुटमध्यमाः ।
बन्धामृदुस्फुटोन्मिश्रवर्णविन्यासयोनयः ॥ ४७ ॥

व्रीहिणैवार्थबोधनात् अधिकः प्रयुक्त इति अधिकपदतादोषदुष्ट एव तथा वलच्चशब्दोऽपि अप्रयुक्ततादोषकलितः । श्रुतिकटू च सदृक्षवलच्चशब्दौ । इत्यञ्च बहुदोषमपि काव्यं विन्यासस्य गाढ़त्वात् गौड़ाः काव्यत्वेनाद्रियन्ते । अयञ्च प्रसादाख्यगुणः अर्थगत एव शब्दगस्तु ओजोमिश्रितशैथिल्यात्मा इति दर्पणकारः । उदाहृतञ्च तेनैव यथा यो यः शस्त्रं बिभर्त्ति स्वभुजगुरुमदात् पाण्डवीनां चमूनाम् । यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा । यो यः तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहमिति ॥ ४६ ॥

समतां निरूपयति सममिति । बन्धेषु रचनासु अविषमम् अविलक्षणम् उपक्रमोपसंहारयोः सदृशमित्यर्थः समं समताख्यगुणयुक्तं तथाच उपक्रमेषु यादृशी रचना, उपसंहारेषु तादृश्येव एवं गुणः समता इत्यर्थः, ते बन्धाः त्रिविधाः मृदुः कोमलः, स्फुटः तीव्रः, मध्यमः उभयात्मक इति । बन्धानां मृदुत्वादेर्हेतुमाह, मृद्विति । मृदुवर्णानां ह्रस्वस्वरादीनां स्फुटानां दीर्घस्वरादीनां तथा उन्मिश्राणाम् उभयात्मकानां वर्णानां विन्यासः योनिः कारणं येषां तादृशाः । अयञ्च गुणः शब्दगत एव अर्थगुणस्तु समताप्रक्रान्तप्रकृतिप्रत्ययाद्यविपर्य्यासेन अर्थस्य अविसंवादिता स च प्रक्रमभङ्गदोषाभाव एव दर्पणकारेणोक्तः यथा उदेति सविता ताम्रस्ताम्र एवास्तमेति चेत्यादि ॥ ४७ ॥

कोकिलालापवाचालो मामेति मलयानिलः ।
उच्छलच्छीकराच्छाच्छनिर्झराम्भःकणोक्षितः ॥४८॥
चन्दनप्रणयोद्गन्धिर्मन्दो मलयमारुतः ।
स्पर्द्धते रुद्धमद्धैर्य्यो वररामामुखानिलैः ॥ ४९ ॥
इत्यनालोच्य वैषम्यमर्थालङ्कारडम्बरौ ।

उक्ताया समतायाः त्रैविध्यं दर्शयति कोकिलेत्यादि। कोकिलानाम् आलापेन वाचालः मुखरः मलयानिलः माम् एति पीड़यितुं सुखयितुं वा इति शेषः। अत्र मृदुनोपक्रान्तस्य तेनैव समापनमिति मृदुबन्धगा समता। उच्छलन्तः उद्गच्छन्तः शीकरा जलकणा यस्य तादृशम् अच्छाच्छम् अतिस्वच्छं यत् निर्झराम्भः तस्य कणैः विन्दुभिः उक्षितः अभिषिक्तः सुशीतल इति यावत् मलयानिलः मामेति। अत्र स्फुटबन्धेन उपक्रान्तस्य सन्दर्भस्य तेनैव उपसंहार इति स्फुटबन्धगता समता। चन्दनेन प्रणयः संसर्गः चन्दनप्रणयः तेन उद्गन्धिः उद्गतगन्धः मन्दः मृदुलः तथा रुद्धं निराकृतं मम धैर्य्यं येन तथाभूतः मम धैर्य्यं नाशयन्नित्यर्थः वररामाणाम् उत्तमाङ्गनानां मुखानिलैः मुखनिःसृतसुगन्धिमारुतैः स्पर्द्धते सादृश्यं लभते इति यावत् सौगन्ध्यसाम्यादिति भावः। अत्र उपक्रमोपसंहारयोर्मिश्रबन्धवशात् मध्यमबन्धगता समता ॥ ४८ ॥ ४९ ॥

उक्तायां समतायां गौड़ीयानामनादरं दर्शयति इतीति। इति उक्तप्रकारं वैषम्यं बन्धगतं मार्दवादिकम् अनालोच्य अविचार्य्य अर्थानां काव्यार्थानाम् अलङ्काराणाम् अनुप्रासोपमादीनाञ्च डम्बरौ आड़म्बरौ उत्कर्षौ इत्यर्थः अपेक्षमाणा अनुसरन्तीत्यर्थः पौरस्त्याः पूर्वदेशीयाः गौड़ीया इत्यर्थः काव्यानां

अपेक्षमाणा ववृधे पौरस्त्या काव्यपद्धतिः ॥ ५० ॥
मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः ।
येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः ॥ ५१ ॥

पद्धतिः ववृधे । ते हि अर्थानुसारेण अलङ्कारानुसारेण च कदाचित् बन्धस्य मार्दवं कदाचित् वैकट्यं कुत्रचिद्वा मिश्रीभावमाद्रियन्ते न तु गुणपक्षपातेन पूर्वोक्तरूपां समताम् । अयं भावः । यत्रार्थस्य मृदुत्वं तत्र मृदुलो बन्धः यत्र तु अर्थस्य वैकट्यं तत्र विकटो बन्धः यत्र च अर्थस्य मिश्रीभावः तत्र मध्यमो बन्धः न तु येनैवारब्धस्तेनैव समापनमिति । युक्तञ्चैतत् तथाहि, सारङ्गाः किमु वल्गितैः किमफलैराडम्बरैर्जम्बुका मातङ्गा महिषा मदं व्रजत किं शून्येऽत्र शूरा न के । कोपाटोपसमुद्भटोत्कटशटाकोटेरिभारेः शनैः सिन्धुध्वानिनि हुङ्कृते स्फुरति यत् तद्गर्जितं गर्जितम् ॥ इत्यत्रोत्तरार्द्धे कुपितसिंहवर्णनरूपार्थस्य वैकट्यात् उपक्रान्तमृदुबन्धत्यागो गुण एवेति अनुसन्धेयम् ॥ ५० ॥

माधुर्य्यं निरूपयति मधुरमिति । रसवत् रसाः शृङ्गारादयः तद्गुणयोगात् भावतदाभासा अपि रसशब्दवाच्याः ते विद्यन्ते यत्रेति तत् वाक्यं मधुरं माधुर्य्यगुणयुक्तम् । तर्हि रस एव माधुर्य्यमित्यर्थत एव आयातं परं गुणानां साक्षात् परम्परया वा रसोपकारकत्वं सर्वैरेव कविभिः अङ्गीकृतमित्याशङ्क्याह वाचीति । वाचि तादृशगुणयुक्तवाक्ये वस्तुन्यपि प्रतिपाद्यभूते अर्थेऽपि रसस्थितिः शृङ्गाराद्यवस्थानम् । येन रसेन धीमन्तः सामाजिका न तु कुधिय इत्यर्थः मधुव्रता भ्रमरा मधुनेव माद्यन्ति मत्ता भवन्ति तथाच सुधियां मादहेतुः

यया कयाचित् श्रुत्या यत् समानमनुभूयते।
तद्रूपा हि पदासत्तिः सानुप्रासा रसावहा॥ ५२॥
एष राजा यदा लक्ष्मीं प्राप्तवान् ब्राह्मणप्रियः।

तादृशकाव्यार्थानुशीलनजन्मा भावविशेष एव रसः। माधुर्य्यादि-गुणास्तु तद्व्यञ्जकवर्णादिमत्वेन विन्यासमहिम्ना च तत्पोषका एवेति विभावनीयम्। केचित्तु पृथक्पदत्वं माधुर्य्यं शब्दगुण एव उक्तिवैचित्रमात्रन्तु अर्थगुण इति वदन्ति उदाहरन्ति च क्रमेण यथा श्वासान् मुञ्चति भूतले विलुठति त्वन्मार्गमालोकते इत्यादि। भानुः सकृद्युक्ततुरङ्ग एव रात्रिन्दिवं गन्धवहः प्रयाति इत्यादि वस्तुतस्तु उभयमेव एकरूपं न तु कश्चित् प्रभेदो लक्ष्यते उदाहरणयोरिति चिन्तनीयम्॥ ५१॥

श्रुत्यनुप्रासवर्णसंहतिः रसव्यञ्जकतां दर्शयति ययेति। यया कयाचित् कण्ठताल्वादिरूपया इत्यर्थः श्रुत्या श्रवणसाधनीभूतेन उच्चारणेन यत् समानम् अनुभूयते तद्रूपा तादृशानुभवविषयिणी सानुप्रासा रसव्यञ्जकप्रकृष्टविन्यासवती पदासत्तिः पदानाम् आसत्तिः अव्यवधानेन अवस्थितिः रसम् आवहतीति रसवहा हिरवधारणार्थः निश्चितमेव रसपोषिकेत्यर्थः। एतेन कण्ठताल्वादिस्थानैक्येन व्यञ्जनवर्णानां सादृश्यं श्रुत्यनुप्रास इत्यर्थात् आयातम्। उक्तञ्च दर्पणकारेण यथा, उच्चार्य्यत्वात् यदैकत्र स्थाने तालुरदादिके। सादृश्यं व्यञ्जनस्यैष श्रुत्यनुप्रास उच्यते॥ इति अस्य च अलङ्कारप्रकरणीयत्वेऽपि इह गुण-प्रसङ्गात् लक्षणमुक्तं वक्ष्यते च काश्चिन्मार्गविभागार्थयुक्ताः प्राग-प्यलङ्क्रिया इति॥ ५२॥

उदाहरणं दर्शयति एष इति। ब्राह्मणाः प्रिया यस्य

ततः प्रभृति धर्मस्य लोकेऽस्मिन्नुत्सवोऽभवत् ॥५३॥

इतीदं नादृतं गौड़ैरनुप्रासस्तु तत्प्रियः ।

अनुप्रासादपि प्रायो वैदर्भैरिदमिष्यते ॥ ५४ ॥

वर्णावृत्तिरनुप्रासः पादेषु च पदेषु च ।

अथवा ब्राह्मणानां प्रिय एष राजा यदा लक्ष्मीं राजश्रियं प्राप्तवान् ततः प्रभृति लोके जगति धर्मस्य उत्सवः अभवत् । असौ धर्मेण प्रजाः पालयामास इत्यर्थः । इह षकारवकारयोः एकस्मात् मूर्द्धः जकारयकारयोस्तालुतः दकारलकारयोश्च दन्तादुच्चरितत्वेन सादृश्यमित्यतः श्रुत्यनुप्रासात् माधुर्य्यगुणपुष्टो राजविषयकरतिभाव इति विभावनीयम् ॥ ५३ ॥

अत्र वैदर्भीगौड़योर्मतभेदं दर्शयन्नाह इतीति । इतिपदं पूर्वोक्तद्योतकम् इति पूर्वोक्तमिदं पद्यं गौड़ैः गौड़वासिभिः कविभिः न आदृतं माधुर्य्यगुणवत्तया न स्वीकृतं विभिन्नवर्णानामेकस्थानोच्चरितत्वेऽपि रसानुगुण्यस्याननुभवादिति भावः । अनुप्रासस्तु वक्ष्यमाणवर्णावृत्तिरूपः तत्प्रियः तेषां गौड़ानां प्रियः रसानुकूल्यतया आदृतः । वैदर्भैस्तु अनुप्रासात् पूर्वोक्तात् श्रुत्यनुप्रासादपि प्रायः बाहुल्येन इदम् एष राजेत्यादि पद्यम् इष्यते आद्रियते इत्यश्च वैदर्भाणां श्रुत्यनुप्रास वर्णावृत्तिरूपानुप्रासयोरुभयोरेव प्रियता गौड़ानान्तु केवलं वर्णावृत्तिरूपे इति अनयोर्मतभेद इति दिक् ॥ ५४ ॥

अनुप्रासमाह, वर्णावृत्तिरिति । वर्णानां व्यञ्जनानाम् आवृत्तिः पुनरुच्चारणम् अनुप्रासः । उक्तञ्च प्रकाशकारेण वर्णसाम्यमनुप्रास इति । वर्णानामिति एकशेषद्वन्द्ववशात् वर्णस्य वर्णयोरपीति बोध्यम् । स च द्विविधः पादेषु पदेषु च पादाः

पूर्वानुभवसंस्कारबोधिनी यद्यदूरता ॥ ५५ ॥
चन्द्रे शरन्निशोत्तंसे कुन्दस्तवकसन्निभे ।
इन्द्रनीलनिभं लक्ष्म सन्दधात्यलिनः श्रियम् ॥५६॥

पद्यचतुर्थभागाः तेषु पदेषु तत्तत्पादस्थसुप्तिङन्तेषु च पादगत पदगत इत्यर्थः । पादेषु चेति बहुवचनेन सर्वपादेषु अनुप्रासस्थितिर्विशेषेण मनोरमेति सूचितम् । आवृत्तिश्च स्वरवैषम्येऽपि वैचित्र्यमावहति । तथाचोक्तं दर्पणकारेण, अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् इति । आवृत्तिश्च अव्यवहिता मुख्या, व्यवधानेऽपि पूर्वसंस्कारस्थित्यवधिकेत्याह पूर्वेति । पूर्वमुच्चरितस्य वर्णस्य यः अनुभवः श्रावणज्ञानं तज्जनितः संस्कारः भावनाविशेषः तस्य बोधिनी पालनी अदूरता द्वितीयादिवर्णस्य सान्निध्यं यदि वर्त्तते इति शेषः तदैवानुप्रास इत्यन्वयः । अयं भावः संस्कारस्य प्रथमक्षणे उत्पत्तिः, द्वितीयक्षणे स्थितिः, तृतीयक्षणे निवृत्तिः इति नियमेन अव्यवधानेन किञ्चिद्व्यवधानेन वा सादृश्यप्रतीतिजननात् वैचित्र्यजनकतादृशवर्णावृत्तिरनुप्रास इति निष्कर्षः । अयञ्च द्विविधः छेकानुप्रासः वृत्त्यनुप्रासश्च तदुक्तं दर्पणकारेण, छेको व्यञ्जनसङ्घस्य सकृत्साम्यमनेकधा । अनेकस्यैकधा साम्यमसकृद्वाप्यनेकधा । एकस्य सकृदप्येष वृत्त्यनुप्रास उच्यते ॥ इति । अपरश्च दर्पणकृतोक्तः यथा, शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्य्यमात्रतः । लाटानुप्रास इत्युक्त इति । उदाहृतञ्च तेनैव यथा, स्मेरराजीवनयने ! नयने किं निमीलिते । पश्य निर्जितकन्दर्पं कन्दर्पवशगं प्रियम् ॥ इति ॥ ५५ ॥

उदाहरति चन्द्रे इति । शरन्निशायाः शारदीयरजन्या

चारु चान्द्रमसं भीरु ! बिम्बं पश्यैतदम्बरे ।
मन्मनो मन्मथाक्रान्तं निर्दयं हन्तुमुद्यतम् ॥५७॥

उत्तंसे शिरोभूषणरूपे कुन्दस्तवकसन्निभे माघ्यकुसुमगुच्छसदृशे चन्द्रे इन्द्रनीलनिभं श्यामलम् इत्यर्थः लक्ष्म: कलङ्क: अलिन: भ्रमरस्य श्रियं शोभां सन्दधाति धारयति। अत्र प्रथमद्वितीयतृतीयेषु पादेषु शकार-ककार-वकार-नकार-लकाराणां वर्णानां पुनरावृत्तिवशात् साम्यप्रतीतिरिति वृत्त्यनुप्रास:। चतुर्थे च दकार-धकार-तकार-नकाराणां दन्तरूपैकस्थानोच्चार्य्यत्वात् श्रुत्यनुप्रास इति अनेन च अलङ्कारद्वयेन व्यञ्जितं माधुर्य्यं शृङ्गाररसं पद्यनिष्ठं परिपुष्णाति। अत्र रूपकोपमाभ्यामनुप्राणिता निदर्शनानाम अलङ्कृति: सुधीभिर्विभावनीया ॥ ५६ ॥

स्वरवैषम्येण अनुप्रासो दर्शित: इदानीं तत्साद्दृश्येन दर्शयति चार्विति। हे भीरु ! भयशीले ! अम्बरे आकाशे एतत् परिदृश्यमानम् इत्यर्थ: चारु मनोज्ञं मन्मथाक्रान्तं कामार्त्तं मन्मन: मम मानसं निर्दयं यथा तथा हन्तुमुद्यतं चान्द्रमसं बिम्बं चन्द्रमण्डलं पश्येत्यन्वय:। मानिनीं कामिनीं प्रति कस्यचित् नायकस्य उक्तिरियम्। इह प्रथमे पादे चकाररकारयो: स्वरसहितयो: साद्दृश्यात् वृत्त्यनुप्रास:। द्वितीयतृतीययोश्च यथाक्रमं म्बकारयोर्मन्मन्मथयोश्च साम्यात् छेकानुप्रासोऽपि। तथा चतुर्थे दकारयोस्तकारयोश्च स्वरवैषम्येण साद्दृश्यात् अन्यविधो वृत्त्यनुप्रासश्च। माधुर्य्यगुणोऽप्यत्र शब्दार्थोभयनिष्ठत्वेन चमत्कारजननात् विप्रलम्भाख्यं शृङ्गारं परिपुष्णाति ॥ ५७ ॥

इत्यनुप्रासमिच्छन्ति नातिदूरान्तरश्रुतिम् ।
न तु रामामुखाम्भोजसदृशश्चन्द्रमा इति ॥ ५८ ॥
स्मरः खरः खलः कान्तः कायः कोपश्च नः कृशः ।
च्युतोमानोऽधिकोरागोमोहोजातोऽसवोगताः ॥ ५९ ॥

अदूरतैवानुप्रासस्य प्रयोजकमित्याह इतीति । अतिदूरं समधिकम् अन्तरं व्यवधानं यस्याः सा अतिदूरान्तरा न अति-दूरान्तरा नातिदूरान्तरा, तादृशी श्रुति' श्रवणं यस्य तादृशम् इति पूर्वोक्तप्रकारम् अनुप्रासम् इच्छन्ति कवय इति शेषः रामामुखाम्भोजसदृशः चन्द्रमा इति एवंविधं तृतीयचतुर्थयोः पादयोः माकारयोः साम्येऽपि अतिदूरान्तरश्रुतिम् अनुप्रास-मिति शेषः न तु इच्छन्तीति च शेषः ॥ ५८ ॥

अनुप्रासस्य रसावहत्वकीर्त्तनात् यत्र वाक्यस्य सदोषत्वेन रसस्य अपरिपुष्टता तत्र न माधुर्य्यसद्भाव इत्याह स्मर इति । स्मरः कामः खरः अतितीक्ष्णः, कान्तः प्रियः, खलः निष्ठुरः, नः अस्माकं कायः शरीरं कोपश्च कान्तं प्रतीति शेषः कृशः क्षीणः नष्टश्च, मानः गौरवं च्युतः विनष्टः, रागः कान्तप्राप्त्यभि-लाषः अधिकः, मोहः मूर्च्छा जातः क्षणे क्षणे इति शेषः, असवः प्राणा गताः प्रायेणेति शेषः । इदं नायकं निराकृत-वत्याः गलितमानायाः कस्याश्चित् कामिन्याः पश्चात्तापवचनम् । अत्र प्रथमे पादे रकारयोः खकारयोश्च द्वितीये ककाराणां साम्यात् वृत्त्यनुप्रासस्य तथा उत्तरार्द्धे तकारादिदन्त्यवर्णानां साम्यात् छेकानुप्रासस्य दोषाकुलतया तादृशविप्रलम्भशृङ्गारस्य न अतिपरिपोषकता इति बोध्यम् ॥ ५९ ॥

इत्यादि बन्धपारुष्यं शैथिल्यञ्च नियच्छति ।
अतो नैवमनुप्रासं दाक्षिणात्याः प्रयुञ्जते ॥ ६० ॥
आवृत्तिं वर्णसङ्घातगोचरां यमकं विदुः ।
तत्तु नैकान्तमधुरमतः पश्चात् विधास्यते ॥ ६१ ॥

पूर्वोक्ते पद्ये दोषमाह इत्यादीति। इत्यादि एवमादिकं सानुप्रासमपि पद्यं बन्धपारुष्यं बन्धे रचनायां पारुष्यं दुःश्रवत्वं शैथिल्यं पतत्प्रकर्षतादिकञ्च नियच्छति ज्ञापयति। अत्र पूर्वार्द्धे बहुविसर्गसत्तया पारुष्यम्। तदुक्तम्, अनुस्वारविसर्गौ तु पारुष्याय निरन्तरौ इति। पूर्वार्द्धे यादृशी तीव्ररचना उत्तरार्द्धे तथा नेति पतत्प्रकर्षता। अतः कारणात् एवं सदोषमित्यर्थः अनुप्रासं दाक्षिणात्याः पण्डिताः न प्रयुञ्जते न व्यवहरन्ति माधुर्य्यस्य असद्भावादिति भावः। यत्र तु पारुष्यादिके रसानुकूलतया माधुर्य्यमस्ति तत्र पारुष्यादिकं न दोषः प्रत्युत गुण एव। तथाचोक्तं, वक्तरि क्रोधसंयुक्ते तथा वाच्ये समुद्धते। रौद्रादौ च रसेऽत्यन्तं दुःश्रवत्वं गुणो भवेत् इति ॥ ६० ॥

ननु अनुप्रासवत् यमकमपि कथमत्र न निरूप्यत इत्याह आवृत्तिमिति। वर्णसङ्घातः वर्णसमूह एव गोचरः विषयो यस्याः तथोक्ताम् आवृत्तिं पुनरुच्चारणं यमकं विदुः जानन्ति कवय इति शेषः। तदुक्तं दर्पणकारेण यथा, सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः। क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ॥ इति। तत् तु सयमकं पद्यं न एकान्तमधुरं न अतिशयेन माधुर्य्यवत् तथाहि तथाविधे वाक्ये प्रथमम् अर्थानुसन्धानव्यग्रतया रसप्रतीतेर्व्यवहितत्वात् इति अनुप्रासे तु अर्थानुसन्धानव्यग्रताया अभावात् रसप्रतीतेः अव्यवहितत्वमिति

कामं सर्वोऽप्यलङ्कारो रसमर्थे निषिञ्चति ।
तथाप्यग्राम्यतैवैनं भारं वहति भूयसा ॥ ६२ ॥
कन्ये ! कामयमानं मां न त्वं कामयसे कथम् ।
इति ग्राम्योऽयमर्थात्मा वैरस्याय प्रकल्पते ॥६३॥

सानुप्रासे वाक्ये माधुर्य्यमस्तीति च भावः । एकान्तेति पदेन यमकेऽपि रसावहं माधुर्य्यमस्त्येव परम् अनुप्रासवत् सम्यक् न इति वक्तव्यम् अन्यथा अस्य अनलङ्कारत्वापत्तिरापद्येत शब्दार्थ-शोभाजननेन काव्यात्मभूतरसोपकारित्वस्य एव अलङ्कारत्वात् इति ध्येयम् । अतः पश्चात् अलङ्कारप्रस्तावे इत्यर्थः विधास्यते वच्यते यमकमिति शेषः ॥ ६१ ॥

शब्दगतं माधुर्य्यं दर्शितमिदानीम् अर्थगं माधुर्य्यं दर्शय-न्नाह काममिति । सर्वोऽपि शब्दगतः अर्थगतः उभयगतश्च अलङ्कारः अनुप्रासोपमा पुनरुक्तवत् आभासादिः अर्थे वाच्य-लक्ष्यव्यङ्गरूपे प्रतिपाद्ये कामं यथेष्टं यथा तथा रसं निषिञ्चति पुष्णाति उद्बोधयतीत्यर्थः तथापि अग्राम्यता ग्राम्यः इतरजन-व्यवहृतः शब्दोऽर्थश्च स न भवतीति अग्राम्यः तस्य भावः भूयसा बाहुल्येन एनं भारं रसनिषेकरूपं वहति तथाच अग्राम्यता-परिहृतानाम् एव अलङ्काराणां रसपोषकत्वं सालङ्कारस्य रसव्यञ्जकस्य एव अर्थस्य माधुर्य्यञ्चेति प्रतिपादितम् । भूयसा इति ग्रहणात् इतरजनकथनेषु ग्राम्यता न दोषः प्रत्युत गुण एव तदुक्तं गुण इत्यनुवृत्तौ ग्राम्यत्वमधमोक्तिषु इति ॥ ६२ ॥

ग्राम्यताया उदाहरणं दर्शयति कन्ये इति । विदग्धजनो-क्तिरियम् । हे कन्ये ! त्वं कामयमानं मां कथं न कामयसे इत्यत्र कन्ये इति सम्बोधनं दुहितृस्थानीयानामेव सम्भवति

कामं कन्दर्पचाण्डालो मयि वामाक्षि ! निर्दयः ।
त्वयि निर्मत्सरो दिष्ट्येत्यग्राम्योऽर्थो रसावहः ॥६४॥

नायिकासम्बोधने तु प्रिये सुन्दरि इत्यादि प्रयोग एव साधुः, तस्मादत्र अर्थस्य ग्राम्यता एव न तु कन्याशब्दस्य विदग्धानामपि भूरिशस्तत्प्रयोगदर्शनात् यथा कन्येयं कलधौतकोमलरुचिः कीर्त्तिस्तु नातःपरेत्यादि। प्राचीनैस्तु ग्राम्यजनमात्रव्यवहृतानां कन्यादिशब्दानामेव ग्राम्यत्वमुक्तम्। इत्ययं ग्राम्य अर्थस्य आत्मा प्रतिपाद्यवस्तु वैरस्याय रसोद्बोधव्याघाताय प्रकल्पते प्रभवति। अयं भावः कामो नाम कामिनां सुरतेच्छारूपः कामिनीकुचकलसवत् गूढ़मतिचमत्करोति, अगूढ़स्तु लज्जाजनकत्वेन वैरस्यमावहतीति न अत्र माधुर्य्यसद्भाव इति। अत्र च नायककामरूपकारणे सत्यपि नायिकाकामरूपस्य कार्य्यस्याभावात् विशेषोक्तिरलङ्कारः। तदुक्तं दर्पणकारेण, सति हेतौ फलाभावो विशेषोक्तिस्तथा द्विधा इति ॥ ६३ ॥

अग्राम्यतां दर्शयति काममिति। हे वामाक्षि ! वामे सुन्दरे कुटिले वा अक्षिणी यस्याः तत्सम्बुद्धौ। कन्दर्पचाण्डालः मयि निर्दयः, दिष्ट्या भाग्येन त्वयि निर्मत्सर इति अग्राम्यः अर्थः विदग्धजनवाक्यार्थः रसम् आवहति पुष्णातीति रसावहः। अयं भावः वामाक्षीति सम्बोधनपदं नायिकायाः सौन्दर्य्यं नायकस्य च तां प्रति चाटूक्तिं व्यञ्जयति, कन्दर्पो मयि निर्दयः त्वयि तु निर्मत्सर इत्यनेन अहं त्वां कामये त्वन्तु मां न कामयसे इति पूर्वोक्तपद्यार्थ एव भङ्ग्या सूचित इति अग्राम्यता सहृदयहृदयङ्गमतया रसं व्यञ्जयन्ती माधुर्य्यगुणम् आवहति इति ॥ ६४ ॥

शब्देऽपि ग्राम्यतास्त्येव सा सभ्येतरकीर्त्तनात् ।
यथा यकारादिपदं रत्युत्सवनिरूपणे ॥ ६५ ॥
पदसन्धानवृत्त्या वा वाक्यार्थत्वेन वा पुनः ।
दुष्प्रतीतिकरं ग्राम्यं यथा या भवतः प्रिया ॥६६॥

ग्राम्यतायाः शब्दगतत्वमपि दर्शयति शब्देऽपीति । शब्देऽपि ग्राम्यता अस्ति एव, सा सभ्यं साधु तदितरम् असभ्यं ग्रामीणहालिकादिप्रयोज्यं वचनं तस्य कीर्त्तनात् विदग्धजनैः इति शेषः कथनात् भवतीति शेषः। यथा रत्युत्सवस्य निरूपणे यकारादिपदं यकार आदिर्यस्य तत् पदं यभ मैथुने इत्यस्मात् निष्पन्नं पदं यभनादिकमित्यर्थः। तादृशपदप्रयोक्तुः ग्राम्यतया उपहसनीयत्वं श्रोतुश्च लज्जितत्वमेव जायते सुतरां रसास्वादस्य तिरोहितत्वात् न अत्र माधुर्य्यगुणप्रसर इति भावः ॥ ६५ ॥

अश्लीलताया ग्राम्यतायामन्तर्भावमाह पदेति। पदानां सन्धानं सम्प्रवेशो यस्मिन् तत् पदसन्धानं वाक्यसङ्घातेति पाठे स एवार्थः। तद्वृत्त्या तद्गतत्वेन वा अथवा वाक्यार्थत्वेन तदर्थगतत्वेन वा इत्यर्थः। दुर्दुष्टा प्रतीतिः दुष्प्रतीतिः तत्करं लज्जा जुगुप्सामङ्गलादिव्यञ्जकम् अश्लीलत्वमित्यर्थः अपि ग्राम्यं ग्राम्यतायामन्तर्भूतं तदपि माधुर्य्यव्याघातकमिति भावः यथा या भवतः प्रियेति अत्र या भवत इत्यंशे याभः मैथुने इत्यस्मात् घञि निष्पन्नः स विद्यते अस्येति याभवान् तस्येति प्रतीतौ व्रीड़ाव्यञ्जकत्वात् वाक्यमिदमश्लीलत्वदोषदूषितम् अतोऽत्र न माधुर्य्यसङ्गतिरिति भावः ॥ ६६ ॥

खरं प्रहृत्य विश्रान्तः पुरुषो वीर्य्यवानिति ।
एवमादि न शंशन्ति मार्गयोरुभयोरपि ॥ ६७ ॥
भगिनी भगवत्यादि सर्वत्रैवानुमन्यते ।
विभक्तमिति माधुर्य्यमुच्यते सुकुमारता ॥ ६८ ॥

वाक्यगतामश्लीलतामुक्त्वा तदर्थगतां निर्दिशति खरमिति। कश्चित् वीर्य्यवान् पराक्रमशाली पुरुषः खरम् अतितीक्ष्णं यथा तथा प्रहृत्य शत्रूनिति शेषः विश्रान्त इति प्रकरणसङ्गतोऽर्थः, परं वीर्य्यवान् शुक्रलः कश्चित् पुरुषः खरं गाढ़ं यथा तथा प्रहृत्य मैथुनं कृत्वा विश्रान्त इत्यपि असभ्यार्थो वक्त्रादिवलच्यत्वेन प्रतीयते। न च अत्र वाक्यगतमश्लीलत्वमिति मन्तव्यं शब्दपरिवृत्तिसहत्वासहत्वाभ्यां तद्व्यवस्थापनात् तथाहि यत्र शब्दपरिवृत्तावपि तदर्थप्रतीतिस्तत्र न शब्दगतत्वं यत्र तु तथात्वे न तदर्थसम्भवस्तत्रैव शब्दगतनियमः, अत्र तु खरमित्यादिवाक्यस्थपदानाम् एकार्थमात्रप्रतिपादकानां प्रकरणवलात् प्रथमेऽर्थे प्रतीतेऽपि वक्त्रादिवैशिष्ट्यात् अपरोऽपि अर्थो व्यञ्जनया वृत्त्या प्रतीयते। तथाचोक्तं दर्पणकारेण यथा, अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते। एकत्रार्थेऽन्यधीहेतुव्यञ्जना साभिधाश्रया॥ इति। न च अत्र वीर्य्यपदं विभिन्नयोर्बलशुक्रयोर्वाचकमिति वाच्यं बलस्य शुक्रजत्वेन एकमात्रपदार्थत्वात् इति। एवमादि दोषदूषितं काव्यम् उभयोरपि गौड़वैदर्भयोर्मार्गयोः न शंसन्ति न आद्रियन्ते विद्वांस इति शेषः॥ ६७॥

ग्राम्यतायाः प्रतिप्रसवमाह भगिनीति। भगिनी भगवती आदिपदग्राह्यं योनिलिङ्गादिकञ्च सर्वत्र काव्येषु व्यवहारेषु च

अनिष्ठुराक्षरप्रायं सुकुमारमिहेष्यते ।
बन्धशैथिल्यदोषस्तु दर्शितः सर्वकोमले ॥ ६९ ॥

अनुमन्यते अदुष्टतया लोकैः अङ्गीक्रियते तत्तच्छब्दप्रयोगे दोषानुसन्धानविरहेण साधारणानां वैरस्यानुदयात् इति भावः। उक्तञ्च, संवीतस्य हि लोकेऽस्मिन्न दोषान्वेषणं क्षमम्। शिवलिङ्गस्य संस्थाने कस्यासभ्यत्वभावनम्॥ इति। संवीतं हि अदुष्टतया सर्वजनव्यवहृतम्। अन्यच्च, ग्राम्यं घृणावदश्लीलामङ्गलार्थं यदीरितम्। तत् संवीतेषु गुप्तेषु लक्षितेषु न दुष्यति॥ इति। गुप्तेषु असभ्यार्थेषु असिद्धेषु अपि भावेन तदर्थबोधकेषु यथा, करिहस्तेन सम्बाधे प्रविश्यान्तर्विलोड़िते। उपसर्पन् ध्वजः पुंसः साधनान्तर्विराजते॥ इत्यत्र सम्बाधपदेन सङ्कटार्थप्रसिद्धेनापि भावेन अप्रसिद्धस्य स्त्रीलिङ्गस्य बोधनम्। लक्षितेषु लक्षणया असभ्यार्थप्रतिपादकेषु यथा जन्मभूमिपदेन कुत्रचित् भावेन योनिबोधनम्। इति उक्तप्रकारेण माधुर्य्यं विभक्तं विभज्य दर्शितम् अधुना सुकुमारता उच्यते ॥ ६८ ॥

अनिष्ठुराणि अपरुषाणि अक्षराणि प्रायो बाहुल्येन यत्र तादृशं पद्यं सुकुमारं सौकुमार्य्यगुणयुक्तमित्यर्थः प्रायःपदेन अन्तरान्तरा परुषाक्षराण्यपि निवेशनीयानीति सूचितम्। तुशब्दोऽत्र हेतुवाचकः। यतः सर्वकोमले केवलसुकुमाराक्षरप्रयोगे बन्धस्य रचनायाः शैथिल्यदोषः श्लथत्वरूपदोषः अगाढ़ता इति यावत् दर्शितः पूर्वोक्ते मयैव मालतीमालालोलालिकलिला यथा इति शेषः। तथाच कोमलाक्षराणां बहूनां मध्ये परुषाक्षरविन्यासेन बन्धस्य गाढ़तया यत् सहृदयहृद्यत्वं तदेव सौकुमार्य्यपदवाच्यं माणिक्यखचितमुक्तादामवत् इति सुधीभिर्विभाव्यम् ॥ ६९ ॥

मण्डलीकृत्य बर्हाणि कण्ठैर्मधुरगीतिभिः ।
कलापिनः प्रनृत्यन्ति काले जीमूतमालिनि ॥७०॥
इत्यनूर्जित एवार्थो नालङ्कारोऽपि तादृशः ।
सुकुमारतयैवैतदारोहति सतां मनः ॥ ७१ ॥

अस्य उदाहरणमाह मण्डलीति। कलापिनः मयूराः जीमूतमालिनि काले वर्षासु बर्हाणि पुच्छानि मण्डलीकृत्य विस्तार्य्य मधुरगीतिभिः मधुरगीतिसदृशस्वनैः इत्यर्थः कण्ठैः उपलक्षिताः सन्तः विशेषणे तृतीया। प्रनृत्यन्ति। अत्र मकारककारादीनां कोमलाक्षराणां मध्ये डकार-रकारादियुक्ताक्षराणां परुषाणां निवेशात् रचनेयं सौकुमार्य्यमाश्रयति। अत्र च कलापिषु नर्त्तकव्यवहारसमारोपात् समासोक्तिरलङ्कारः। तदुक्तं दर्पणकारेण, समासोक्तिः समैर्यत्र कार्य्यलिङ्गविशेषणैः। व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुन॥ इति ॥७०॥

उक्तरूपसौकुमार्य्यस्य गुणत्वमनङ्गीकुर्वतो नव्यान् प्रत्याह इतीति। इति उक्तविधः अर्थः मण्डलीकृत्येति पद्यप्रतिपाद्य इत्यर्थः न ऊर्जितः न तेजस्वल एव न अतिमनोरम इत्यर्थः, अलङ्कारश्च समासोक्तिरूपः तादृशः वैचित्र्यजनकः न, तथापि एतत् पद्यं सुकुमारतया तादृशसौकुमार्य्यगुणयुक्ताक्षरविन्यासेन सतां सामाजिकानां न तु साधारणानामिति ध्वनिः मनः आरोहति आश्रयति मोहयतीति यावत्। अयं भावः अर्थालङ्कारौ हि अन्यविधौ पदार्थौ गुणस्तु न तथा, यतः अर्थस्य अलङ्कारस्य च बोधनात् पूर्वमेव गुणकृतवैशिष्ट्यं प्रतीयते गुणस्य विन्यासविशेषरूपत्वात्। उक्तञ्च, तया कवितया किं वा तया वनितया तथा। पदविन्यासमात्रेण यया न क्रियते

दीप्तमित्यपरैर्भूम्ना कृच्छ्रोद्यमपि बध्यते ।
न्यक्षेण क्षयितः पक्षः क्षत्रियाणां क्षणादिति ॥७२॥
अर्थव्यक्तिरनेयत्वमर्थस्य हरिणोद्धृता ।

मनः ॥ इति । असति गुणवैचित्ये अर्थालङ्कारौ न शोभेते अत-एवोक्तं भोजराजेन, अलङ्कृतमपि श्रव्यं न काव्यं गुणवर्जितम् । अन्यच्च, यदि भवति वचश्च्युतं गुणेभ्यो वपुरिव यौवनबन्ध्य-मङ्गनायाः । अपि जनदयितानि दुर्भगत्वं नियतमलङ्करणानि संश्रयन्ते इति ॥ ७१ ॥

रसविशेषे सौकुमार्य्यमनङ्गीकुर्वतां मतं दर्शयति दीप्त-मिति । अपरैः गौड़ीयकविभिः वीरादिषु रसेषु दीप्तिरौज्ज्वल्यं तद्युक्तं तद्व्यञ्जकमित्यर्थः दीप्तं समुत्तेजनमिति यावत् पदं कृच्छ्रेण कष्टेन उद्यम् उच्चार्य्यमपि भूम्ना बाहुल्येन बध्यते विरच्यते । गौड़ीया हि वीररसादिध्वनौ परुषाक्षरविन्यासेन तद्व्यञ्जनस्य हृद्यतया सौकुमार्य्यं न अङ्गीकुर्वते इति भावः । यथा न्यक्षेण नेत्रहीनेन अन्धेनेत्यर्थः धृतराष्ट्रेण क्षणात् अल्पे-नैव कालेन क्षत्रियाणां पक्षः समूहः समग्रक्षत्रियकुलमित्यर्थः क्षयितः नाशितः कुरुक्षेत्रयुद्धे इति शेषः । अत्र वीररसवर्ण-नायां तादृशश्रुतिकटुपरुषवर्णप्रयोग एव चमत्कारमातनोती-त्येवंविधे प्रयोगे सौकुमार्य्यत्यागो गुण एवेति ध्येयम् । वैद-र्भास्तु ईदृशेऽपि प्रयोगे सौकुमार्य्यमाद्रियन्ते यथा कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुजपशुभिः निर्मर्य्यादैः भवद्भि-रुदायुधैः । नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिनामयमहृ-मसृङ्मांसैः करोमि दिशां बलिमिति । अत्र रौद्रेऽपि रसे न अतिपरुषाक्षराणि विन्यस्तानि ॥ ७२ ॥

भूः खुरक्षुण्णनागासृग्लोहितादुदधेरिति ॥ ७३ ॥
मही महावराहेण लोहितादुद्धृतोदधेः ।
इतीयत्येव निर्दिष्टे नेयत्वमुरगासृजः ॥ ७४ ॥
नेदृशं बहु मन्यन्ते मार्गयोरुभयोरपि ।

अर्थव्यक्तिं नाम गुणं सोदाहरणमाह अर्थव्यक्तिरिति। अर्थस्य अनेयत्वम् अध्याहारादिकष्टकल्पनामन्तरेण प्रयुक्तपदेभ्य एवोपस्थितिरित्यर्थः अर्थव्यक्तिः। उक्तञ्च क्रमदीश्वरेण, यावद्वाच्याभिधानं यत्तदर्थव्यक्तिलक्षणम् इति। इयञ्च शब्दमात्रगा अर्थगायास्तु स्वभावोक्त्यलङ्कारेण परिगृहीतत्वात् न पृथगुक्तिः। तदुक्तं दर्पणकारेण, अर्थव्यक्तिः स्वभावोक्त्यलङ्कारेण तथा पुनः इति। अपरे तु पदानां झटित्यर्थबोधकत्वं शाब्दीमर्थव्यक्तिमाहुः। यदुक्तम्, अर्थव्यक्तिः पदानां हि झटित्यर्थसमर्पणम् इति। यथा हरिणा वराहरूपिणा विष्णुना खुरैः स्वीयैः इति भावः क्षुण्णानां नागानां पन्नगानां रसातलवासिनाम् असृग्भिः शोणितैः लोहितात् रक्तात् उदधेः समुद्रात् भूः पृथ्वी उद्धृता ऊर्द्धं नीता। अत्र यावन्त एव शब्दास्तावतामेव अर्थाः विना कष्टकल्पनां प्रतीयन्ते इति ॥ ७३ ॥

अनेयत्वमर्थव्यक्तिमुक्त्वा तद्विपरीतं नेयत्वं दर्शयति महीति। महावराहेण उरगासृजः पन्नगशोणितात् हेतोः लोहितात् उदधेः मही उद्धृता, इतीयति एवंप्रकारे निर्दिष्टे प्रयुक्ते सति नेयत्वं भवति। तथाहि उरगासृज इत्युक्ते कथमिति हेतोः आकाङ्क्षणीयत्वात् खुरक्षुण्णेत्यंशस्य अध्याहारः कर्त्तव्यः अन्यथा अर्थस्य स्फुटता न स्यात् इति भावः ॥ ७४ ॥

अत्र उभयोरपि मार्गयोः वैमत्यं दर्शयति नेति। उभयो-

न हि प्रतीतिः सुभगा शब्दन्यायविलङ्घिनी ॥७५॥
उत्कर्षवान् गुणः कश्चित् यस्मिन्नुक्ते प्रतीयते ।
तदुदाराह्वयं तेन सनाथा काव्यपद्धतिः ॥ ७६ ॥
अर्थिनां कृपणा दृष्टिस्त्वन्मुखे पतिता सकृत् ।
तदवस्था पुनर्देव ! नान्यस्य मुखमीक्षते ॥ ७७ ॥

रपि वैदर्भीगौड्योः मार्गयोः रीतिविशेषयोः कवय इति शेषः ईदृशं पूर्वोक्तरूपं नेयत्वयुक्तं वाक्यं न बहु मन्यन्ते न आद्रियन्ते। हि यतः शब्दन्यायः शाब्दबोधनियमः तस्य विलङ्घिनी व्यतिक्रमसाधनी प्रतीतिः अध्याहारादिकष्टकल्पनेन ज्ञानमित्यर्थः न सुभगा न साध्वीत्यर्थः ॥ ७५ ॥

औदार्य्यं गुणं निरूपयति उत्कर्षेति। यस्मिन् वाक्ये उक्ते कथिते सति कश्चित् उत्कर्षवान् वर्णनीयस्य विषयस्य उत्कर्षप्रतिपादको लोकोत्तरचमत्कारकः गुणः धर्मविशेषः प्रतीयते बुध्यते तत् उदाराह्वयम्। औदार्य्यगुणयुक्तं तेन उदारत्वगुणेन काव्यपद्धतिः गौड़वैदर्भीया काव्यरीतिः सनाथा पूर्णा उत्कर्षवतीति भावः। इदञ्च अर्थगतम्। शब्दगतन्तु विकटत्वलक्षणं विकटत्वञ्च पदानां नृत्यत्प्रायत्वं यथा स्वचरणविनिविष्टैः नूपुरैः नर्त्तकीनां झणिति रणितमासीत् तत्र चित्रं कलञ्च इति विश्वनाथः ॥ ७६ ॥

उदारत्वस्य उदाहरणं दर्शयति अर्थिनामिति। हे देव ! अर्थिनां कृपणा दीना दृष्टिः त्वन्मुखे असकृत् वारंवारं पतिता पुनः किन्तु तदवस्था दीनेत्यर्थः अन्यस्य मुखं न ईक्षते। एतेन राज्ञः एतादृशी प्रभूतदानशक्तिर्यत् दात्रन्तरोपसर्पणमर्थिनां

इति त्यागस्य वाक्येऽस्मिन्नुत्कर्षः साधु लक्ष्यते ।
अनेनैव पथान्यत्र समानन्यायमूह्यताम् ॥ ७८ ॥
श्लाघ्यैर्विशेषणैर्युक्तमुदारं कैश्चिदिष्यते ।
यथा लीलाम्बुजक्रीड़ासरोहेमाङ्गदादयः ॥ ७९ ॥

नास्तीति सूचितं सहृदयानाम् अतिशयेन चमत्कारीति हृदयमिति ॥ ७७ ॥

इति उक्तरूपे त्यागस्य दानस्य अस्मिन् वाक्ये उत्कर्षः राजकीयदानस्य इति शेषः साधुः सम्यक् लक्ष्यते प्रतीयते। साधु इत्यत्र खल्विति पाठे खलु निश्चितमित्यर्थः। अन्यत्रापि पद्ये अनेन एव पथा रीत्या समानः सदृशः न्यायः नियमः यत्र तत् यथा तथा ऊह्यतां विभाव्यताम् एताम् एव रीतिमवलम्ब्य पद्यं विरच्यतामित्यर्थः ॥ ७८ ॥

मतभेदं दर्शयति श्लाघ्यैरिति। श्लाघ्यैः विशेष्यस्य उत्कर्षाधायकत्वेन सामाजिकमनोरमैः विशेषणैः बहुवचनात् एकस्य द्वयोः वा विशेषणयोः सद्भावे न अयं गुण इति सूचितम्। युक्तं समन्वितं वाक्यम् उदारम् औदार्य्यगुणयुक्तं कैश्चित् कविभिरिष्यते स्वमते तु अपुष्टार्थतादोषपरिहारेण परिकरालङ्कारस्य कीर्त्तनेन च अस्य ग्रहणात् न पृथगुक्तिरिति भावः। यथा लीलाम्बुजक्रीड़ासरो हेमाङ्गदादयः। लीलाम्बुज इत्यत्र लीलेति विशेषणेन तदुपयोगिनो वर्णाकारसौरभ्यातिशयस्य, क्रीड़ासर इति कथिते तत्र क्रीड़ार्थककमलकैरवादिजनितशोभादिकस्य तथा हेमाङ्गदेत्युक्ते अङ्गदस्य हेमनिर्मितत्वेन सुदृश्यत्वादिकस्य प्रतीतिः सहृदयमनोहारिणीति विभावनीया ॥ ७९ ॥

२२५ रसेन्द्रसारसंग्रहः (गोपालकृष्णकृतः) विस्तृतव्याख्या तथा यन्त्राणां प्रतिकृतिसहितः २)

२२६ राजनिघण्टुः (नरहरिपण्डितकृतः) सटीकः (द्रव्याणां महाराष्ट्रकर्णाटतैलङ्गतामिलादिभाषाप्रचलितनामसमेतः) २)

२२७ शार्ङ्गधरसंहिता १)

२२८ सुश्रुतसंहिता (डल्लनमिश्रकृतटीकासहिता) १०)

२२९ सुश्रुतसंहिता (सुश्रुताचार्य्यकृता, मूलमात्रम्) यन्त्रादीनां तथा शारीरकचित्रसम्बलिता ४)

२३० हारीतसंहिता (महर्षिहारीतेन सङ्कलिता) २)

ज्योतिषशास्त्रम् ।

२३१ गणिताध्यायः (भास्कराचार्य्यकृतः) १)

२३२ गोलाध्यायः (भास्कराचार्य्यकृतः) ॥०

२३३ बृहत्संहिता वा वाराहीसंहिता २)

२३४ भावकुतूहलम् (जीवनाथमिश्रकृतम्) ॥०

२३५ लीलावती (भास्कराचार्य्यरचिता) ॥०

२३६ वीजगणितम् (भास्कराचार्य्यरचितम्) ॥।०

२३७ सूर्य्यसिद्धान्तः (रङ्गनाथकृत टीकासहितः) २)

विविधशास्त्राणि ।

२३८ कविकल्पलतासटीका छन्दोऽलङ्कारसमस्यापूरणात्मिका २)

२३९ कविकल्पलता (मूलमात्रम्) १)

२४० English translation of Uttara-rama-charita. 10 Ans.

২৪১ সংক্ষিপ্তসারব্যাকরণস্য সন্ধি তথা সুবন্ত কড়চা ॥०

पण्डितकुलपतिः श्रीजीवानन्दविद्यासागर वि, ए,
संस्कृतविद्यामन्दिर, ह्यारिसन रोड पोष्ट आफिस,
कलिकाता !

Apply to :—

Pandita-Kulapati Jiba'nanda Vidya'sa'gara, B. A.
Superintendent, Free Sanskrit College,
Harrison-Road, P. O. Calcutta.

अस्माभिः कमिसनं न दीयते।
हम् लोक कमिसन् नही देते हैं।
} কমিসন দেওয়া যায় না।

ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम् ।
पद्येऽप्यदाक्षिणात्यानामिदमेकं परायणम् ॥ ८० ॥
तत् गुरूणां लघूनाञ्च बाहुल्याल्पत्वमिश्रणैः ।
उच्चावचप्रकारं तत् दृश्यमाख्यायिकादिषु ॥८१॥

ओजोगुणं निरूपयति ओज इति । समासः द्वयोर्बहूनां वा पदानाम् एकीकरणं तस्य भूयस्त्वं बाहुल्यं दीर्घता इत्यर्थः बहुभिः पदैः समास इति यावत् ओजः एतत् गद्यस्य पूर्वोक्तस्य प्रबन्धविशेषस्य जीवितं प्राणभूतम् । इदञ्च उभयोरपि मार्गयोः सामान्यम् । अदाक्षिणात्यानां दाक्षिणात्यव्यतिरिक्तानां गौड़ानाम् इत्यर्थः पद्येऽपि इदम् एकम् अद्वितीयं परायणं परमा गतिः तेषां बन्धगाढ़ताप्रियत्वादिति भावः । इदञ्च शब्दगतं समासस्य शब्दमात्रगतत्वात् । केचित्तु ओजः प्रौढ़िः सा च पञ्चविधा यथा पदार्थे वाक्यरचनं वाक्यार्थे च पदाभिधा । प्रौढ़िर्व्याससमासौ च साभिप्रायत्वमस्य चेति । तत्र पदार्थे वाक्यरचनं यथा चन्द्र इत्येकस्मिन् पदार्थे वक्तव्ये अत्रेर्नयनसमुत्थं ज्योतिरिति वाक्यरचनम् । वाक्यार्थे पदाभिया यथा निदाघशीतलहिमकालोष्णशरीरा सुकुमारी वरयोषिदिति वाक्यार्थे वक्तव्ये वरवर्णिनीति पदाभिधानम् । एवमेकस्य वाक्यार्थस्य किञ्चिद्विशेषाभिधित्सया बहुवाक्यैरभिधानं व्यासः बहुवाक्यप्रतिपाद्यस्य एकवाक्येन प्रतिपादनं समासः, एतत् चतुर्विधं प्रौढ़िरूपमोजः शब्दगुणः, साभिप्रायन्तु अर्थगुण इत्याहुः ॥ ८० ॥

तत् समासभूयस्त्वरूपम् ओजः गुरूणां महाप्राणाक्षराणां लघूनाम् अल्पप्राणाक्षराणाञ्च बाहुल्येन क्वचित् अल्पत्वेन

अस्तमस्तकपर्य्यस्तसमस्तार्कांशुसंस्तरा ।
पीनस्तनस्थिताताम्रकम्रवस्त्रेव वारुणी ॥ ८२ ॥
इति पद्येऽपि पौरस्त्या बध्नन्त्योजस्विनीर्गिरः ।
अन्ये त्वनाकुलं हृद्यमिच्छन्त्योजो गिरां यथा ॥८३

क्वचित् मिश्रणेन च क्वचित् उच्चावचप्रकारं बहुविधं तत् आख्यायिकादिषु गद्यग्रन्थेषु दृश्यं लक्षणीयम् । गौड़ीयानान्तु पद्यग्रन्थेऽपि सूर्य्यशतकादौ समासबाहुल्यं पूर्वमुक्तमवधेयम् इति ॥ ८१ ॥

गौड़ाभिमतं पद्येऽपि समासभूयस्त्वप्रकारं दर्शयति अस्तमिति । अस्तमस्तके अस्ताचलशृङ्गे पर्य्यस्ताः पतिताः समस्ता ये अर्कांशवः सूर्य्यकिरणाः तैः संस्तरः आच्छादनं यस्याः तादृशी वारुणी वरुणाधिष्ठिता दिगिति शेषः पीनस्तने स्थितम् आताम्रम् ईषत् लोहितं सायंकालीनसौरकिरणस्य तथात्वात् इति भावः कम्रं कमनीयं वस्त्रं यस्याः तथाभूता कामिनीव राजते इति शेषः । अत्र द्वयोः अप्यर्थयोः समासबाहुल्यम् ॥ ८२ ॥

पौरस्त्याः गौड़वासिनः इति पूर्वोक्तप्रकारे पद्येऽपि ओजस्विनीः समासबहुलाः गिरः बध्नन्ति । अन्ये तु पण्डिताः गिरां वाचाम् अनाकुलम् अत्र भावनिर्देशः, अनाकुलत्वमित्यर्थः दीर्घसमासादीनां झटिति प्रतीतेरन्तरायत्वात् तद्राहित्यरूपमिति यावत् हृद्यं सहृदयमनोहारि च ओजः इच्छन्ति तथा च समासस्य दीर्घत्वम् अल्पत्वम् अभावो वा तु श्रोतॄणां बुद्धेरनाकुलत्वसम्पादनेन तन्मनोहारित्वम् ओजःपदार्थ इति निष्कर्षः ॥ ८३ ॥

पयोधरतटोत्सङ्गलग्नसन्ध्यातपांशुका ।
कस्य कामातुरं चेतो वारुणी न करिष्यति ॥ ८४ ॥
कान्तं सर्वजगत्कान्तं लौकिकार्थानतिक्रमात् ।
तच्च वार्त्ताभिधानेषु वर्णनास्वपि दृश्यते ॥ ८५ ॥

अत्र उदाहरति यथेति। पयोधरो मेघ एव स्तनः स एव तटः प्रदेशः तस्य उत्सङ्गे लग्नं सन्ध्यातपः सायंकालीनसौर-किरण एवं अंशुकं यस्याः तादृशी वारुणी कस्य चेतः कामातुरं न करिष्यति इत्यन्वयः। अत्र पूर्वार्द्धे समासबाहुल्यमपि पूर्ववत् न श्रोतृबुद्धिमाकलयति परं श्रोत्रमनोहरत्वेन चमत्कारातिशयमुग्धां करोतीति विभावनीयम् ॥ ८४ ॥

कान्तिगुणं निरूपयति कान्तमिति। लौकिकस्य लोक-सिद्धस्य अर्थस्य अनतिक्रमात् अत्यागात् तन्मात्रस्यैव वर्णनात् इत्यर्थः सर्वजगतां कान्तं साधारणमनोरममित्यर्थः पद्यं कान्तं कान्तिगुणविशिष्टं तथाच सहृदयमनोरञ्जकलोकसिद्धवस्तु-वर्णनमेव कान्तिगुण इति। उक्तञ्च क्रमदीश्वरेण यथा, वर्ण-नात्युक्तिशून्या या सा कान्तिरभिधीयते इति। इयमर्थगा विना अर्थानुसन्धानमस्याः प्रतीतिविरहात्। तच्च कान्तिमत् वाक्यं वार्त्ता अनामयप्रियालापः अनामयप्रियालापो वर्त्तिर्वार्त्ता च कथ्यते इति वचनात् तस्या अभिधानेषु कथनेषु तथा वर्ण-नासु वस्तुस्वरूपमात्रनिरूपणेषु दृश्यते अनामयप्रियालापेषु वर्णनासु च यथावत् सत्यनिरूपणस्यैव औचित्यात् अयथावर्णने लौकिकव्यवहारविसंवादः स्यादिति भावः। केचित्तु वार्त्ताभि-धानेषु इतिहासवर्णनेषु, इतिहासानां यथावद्वर्णस्य एव औ-चित्यात् अयथावर्णने असत्यताप्रतिभासनेन विनेयानां प्रवृत्त्य-

गृहाणि नाम तान्येव तपोराशिर्भवादृशः ।
सम्भावयति यान्येव पावनैः पादपांशुभिः ॥८६॥
अनयोरनवद्याङ्गि ! स्तनयोर्जृम्भमाणयोः ।
अवकाशो न पर्य्याप्तस्तव बाहुलतान्तरे ॥ ८७ ॥
इति सम्भाव्यमेवैतत् विशेषाख्यानसंस्कृतम् ।
कान्तं भवति सर्वस्य लोकयात्रानुवर्त्तिनः ॥ ८८॥

सम्भवात् प्रबन्धस्य रामादिवत् प्रवर्त्तितव्यं न रावणादिवत् इत्युपदेशपर्य्यवसायित्वानुपपत्तेरित्याहुः ॥ ८५ ॥

वार्त्ताभिधाने कान्तिं दर्शयति गृहाणीति। तानि एव गृहाणि गृहपदवाच्यानि प्रशंसनीयानि गृहाणि इत्यर्थः, तपोराशिः भवादृशः पावनैः पादपांशुभिः चरणरजोभिः यानि सम्भावयति संशोधयति। अत्र गृहपदेन लक्षणया प्रशस्तगृहं महात्माजनपदस्पर्शेन च स्थानस्य प्राशस्त्यञ्च लोकसिद्धमेव प्रतीयत इति अवधेयम् ॥ ८६ ॥

वर्णनायां कान्तिं दर्शयति अनयोरिति। हे अनवद्याङ्गि सुन्दरि ! जृम्भमाणयोः वर्द्धमानयोः अनयोः स्तनयोः तव बाहुलतान्तरे वक्षसि अवकाशः स्थानं न पर्य्याप्तः न प्रभूतः स्तनयोरतिपीनोन्नततया वक्षसश्च क्षुद्रतया यथेष्टस्थानालाभात् इति भावः। अत्र स्तनयोरतिपीनत्ववर्णनं लोकसिद्धमिति विभावनीयम् ॥ ८७ ॥

उक्तयोः पद्ययोः कान्तिं सङ्घटयति इतीति। इति पूर्वोक्त-श्लोकद्वयप्रतिपाद्यं वस्तु सम्भाव्यमेव भवितुमर्हति एव न तु प्रौढ़ोक्त्या कल्पनीयम्। एतच्च विशेषाख्यानेन विशेषस्य

लोकातीत इवात्यर्थमध्यारोप्य विवक्षितः ।
योऽर्थस्तेनातितुष्यन्ति विदग्धा नेतरे जनाः ॥८९॥
देवधिष्ण्यमिवाराध्यमद्यप्रभृति नो गृहम् ।
युष्मत्पादरजःपातधौतनिःशेषकिल्बिषम् ॥ ९० ॥

उत्कर्षस्य आख्यानेन कथनेन संस्कृतं शोभितं सत् लोकयात्रानुवर्त्तिनः लौकिकाचारपरायणस्य सर्वस्य जनस्य कान्तं मनोरमं भवति। कान्तत्वमेव गुणपदार्थः न तु लोकसिद्धवस्तुवर्णनमात्रं कान्तिः तथात्वे सूर्य्योऽस्तं याति गौः शेते इत्यादेरपि कान्तिमत्त्वात् काव्यत्वापत्तिः गुणालङ्कारादिमत्त्वस्यैव काव्यत्वादिति सुधीभिर्विभाव्यम् ॥ ८८ ॥

निरुक्तकान्तौ गौड़ानां वैमत्यमाह लोकेति। इवशब्दोऽत्र अप्यर्थकः। अत्यर्थम् अतिशयेन लोकातीतः अलौकिकः अपि योऽत्यर्थः अध्यारोप्य कल्पयित्वा विवक्षितः वक्तुमिच्छया प्रयुक्त इत्यर्थः तेन विदग्धाः सहृदयाभिमानिन इति सोल्लुण्ठनोक्तिः। गौड़ीया इत्यर्थः अतितुष्यन्ति तेषां प्रौढ़ोक्तिप्रियत्वात् इति भावः। इतरे जनाः वैदर्भीयाः कवयः न तेषां यथावद्वर्णनप्रियत्वादिति भावः। सुतरामुक्तलक्षणा कान्तिर्गौड़ैः न अङ्गीक्रियते इति फलितार्थः ॥ ८९ ॥

वार्त्तायां निरुक्तकान्तेर्वैपरीत्यं वर्णयति। देवेति अद्यप्रभृति नोऽस्माकं गृहं युष्माकं पादरजःपातेन चरणरेणुपातेन धौतं निःशेषं समस्तं किल्बिषं पातकं यस्य तथाभूतं सत् देवधिष्ण्यं देवतास्थानमिव आराध्यं सेवनीयं भविष्यति इति शेषः। अत्र महात्मनां चरणरजःस्पर्शे गृहस्य पावनत्वं लोक-

अल्पं निर्मितमाकाशमनालोच्यैव वेधसा ।
इदमेवंविधं भावि भवत्याः स्तनजृम्भणम् ॥ ९१ ॥
इदमत्युक्तिरित्युक्तमेतत् गौड़ोपलालितम् ।
प्रस्थानं प्राक् प्रणीतन्तु सारमन्यस्य वर्त्मनः ॥९२॥
अन्यधर्मस्ततोऽन्यत्र लोकसीमानुरोधिना ।
सम्यगाधीयते यत्र स समाधिः स्मृतो यथा ॥९३॥

सिद्धमपि देवावासस्येव आराध्यकीर्त्तनमारोपितमिति कान्तिः विपर्य्ययोऽवगन्तव्यः ॥ ९० ॥

वर्णनायां निरुक्तकान्तेर्वैपरीत्यं वर्णयति अल्पमिति। भवत्याः स्तनयोर्जृम्भणं वृद्धिः एवंविधं व्यापकमित्यर्थः भावि भविष्यति इदम् अनालोच्यैव अविचार्य्यैव वेधसा विधात्रा आकाशम् अल्पं निर्मितम्। अत्र विधातुरनालोचनपूर्विका आकाशनिर्मितिरतिशयोक्तिविजृम्भितैव न तु लोकप्रसिद्धेति विभाव्यम् ॥ ९१ ॥

इदम् ईदृशं काव्यम् अत्युक्तिः इति उक्तं कथितं कविभिः इति शेषः। उक्तञ्च भोजराजेन यथा, लौकिकार्थमतिक्रम्य प्रस्थानं यत्र वर्ण्यते। तदत्युक्तिरिति प्रोक्तं गौड़ानां मनसो मुदे॥ इति। एतत् पद्यं गौड़ैः कविभिः उपलालितं हृद्यतया गृहीतम्। प्राक् पूर्वं कथितं प्रस्थानं लोकसिद्धवस्तुवर्णनरूपं प्रकृष्टं स्थानं स्थितिर्मर्य्यादा इति यावत् अन्यस्य वर्त्मनः वैदर्भीयस्य मार्गस्य सारं मनोहरम्। अयमेव गौड़वैदर्भयोर्भेद इति भावः ॥ ९२ ॥

समाधिं सोदाहरणं निरूपयति अन्यधर्म इत्यादि। लोक-

कुमुदानि निमीलन्ति कमलान्युन्मिषन्ति च ।
इति नेत्रक्रियाध्यासाल्लब्धा तद्वाचिनी श्रुतिः ॥९४॥

सीमानुरोधिना लोकस्थितिमनुवर्त्तमानेन जनेन अन्यस्य अपरस्य अप्रकृतस्य यो धर्मः गुणक्रियादिः ततः तस्मात् अन्यत्र तद्भिन्ने प्रकृते इत्यर्थः यत्रेति अव्ययं यत् इत्यर्थः सम्यक् आधीयते आरोप्यते स समाधिः सम्यगाधानरूपत्वात् तदाख्यो गुण इत्यन्वयः । तथाच प्रकृते वस्तुनि अप्रकृतस्य धर्मारोपो लोकसिद्धिः सहृदयचमत्कारको गुणः समाधिरिति फलितार्थः । धर्म इत्यनेन धर्मिणः समारोपे न अयं गुणस्तत्रातिशयोक्तिरलङ्कार एवेति सूच्यते ॥ ९३ ॥

यथा कुमुदानि उत्पलानि निमीलन्ति कमलानि उन्मिषन्ति विकाशन्ते च प्रभातवर्णनमिदं दिवाकुमुदनिमीलनस्य कमलोन्मेषस्य च कविसमयप्रसिद्धत्वात् । अत्र निमीलनोन्मेषौ अप्रकृतस्य नेत्रस्य धर्मौ कुसुदकमलयोः सङ्कोचविकाशतादात्म्येन आरोपितौ सादृश्यातिशयमहिम्ना लोकसिद्धौ च । एतदेव स्वयं निर्दिशति इतीति । इति उक्ताभ्यां नेत्रक्रियाभ्यां निमीलनोन्मेषाभ्यां सह अध्यासात् अभिन्नत्वे इति शेषः सङ्कोचविकाशाभ्यां तद्वाचिनी तयोः निमीलनोन्मेषयोः वाचिनी प्रतिपादिका श्रुतिः निमीलन्तीत्यादि तत्तत्क्रियावाचकः शब्द इत्यर्थः लब्धा प्राप्ता । अयञ्च अर्थगत एव प्रकृतेऽर्थे अप्रकृतस्यार्थस्यैव आरोपादिति । अन्ये तु समाधिरर्थदृष्टिरूपोऽर्थगुण एव स च द्विविधः अयोनिरन्यच्छायायोनिश्च । तत्र अयोनिरर्थः कविप्रसिद्धिमन्तरेणापि स्वकपोलकल्पितः यथा सद्योमुण्डितमत्तहूनचिवुकप्रस्पर्द्धिनारङ्गकमिति अत्र हूनचिवु-

निष्ठ्यूतोद्गीर्णवान्तादिगौणवृत्ति व्यपाश्रयम्।
अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते ॥ ९५ ॥

केन सह नारङ्गकस्य औपम्यभावः केनापि न प्रदर्शितः। केवलं स्वबुद्ध्या उद्भावितः। अन्यच्छायायोनिः कविसमय-प्रसिद्धोऽपि किञ्चित् वैचित्र्यभावेन रचितः। यथा निजनयन-प्रतिबिम्बैरम्बुनि बहुशः प्रतारिता कापि। नीलोत्पलेऽपि विमृशति करमर्पयितुं कुसुमलावी इति अत्र नयननीलोत्पलयोः साम्यं कविप्रसिद्धमपि किञ्चिद्वैचित्र्येण विरचितम् इत्याहुः। अन्यैस्तु शब्दगुणोऽपि समाधिरुक्तः स च आरोहाव-रोहक्रमरूप एव आरोहस्तु अनुप्रासादिना वाचामुत्कर्षः, अव-रोहस्तदसद्भावादपकर्षः तयोः क्रमः वैरस्यानावहो विन्यासः यथा चञ्चद्भुजभ्रमितचण्डगदाभिघातसंचूर्णितोरुयुगलस्य सुयो-धनस्य। स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचां-स्तव देवि! भीमः॥ इत्यत्र पादत्रये बन्धस्य गाढ़ता, चतुर्थ-पादे तु अपकर्षः सोऽपि तीव्रप्रयत्नोच्चार्यतया न वैरस्यमावह-तीति समाहितम्॥ ९४ ॥

समाधिं गौणलक्षणाक्रान्तं दर्शयति निष्ठ्यूतेति। निष्ठ्यूतम् उद्गीर्णं वान्तम् इत्यादिपदं गौणी या वृत्तिर्लक्षणा गुणयोगात् इति भावः, सैव व्यपाश्रयः विशिष्टः आश्रयो यस्य तत् मुख्यार्थ-सदृशेऽर्थे प्रयुक्तमित्यर्थः अतिसुन्दरम् अतिमनोरमं तदेव समाधिस्थानमिति भावः। अन्यत्र तदभावे गौणवृत्त्याश्रया-भावे इत्यर्थः ग्राम्यकक्षां ग्राम्यतादोषकालुष्यं विगाहते लभते, तथाच मुख्यार्थे प्रयुक्तं निष्ठ्यूतादिपदं ग्राम्यमेव लाक्षणिकेऽर्थे तु तादात्म्यारोपात् गुणवदिति फलितार्थः॥ ९५ ॥

पद्मान्यर्कांशुनिष्ठ्यूताः पीत्वा पावकविप्रुषः।
भूयो वमन्तीव मुखैरुद्गीर्णारुणरेणुभिः॥ ९६॥
इति हृद्यमहृद्यन्तु निष्ठीवति वधूरिति।
युगपन्नैकधर्माणामध्यासश्च स्मृतो यथा॥ ९७॥
गुरुगर्भभरक्लान्ताः स्तनन्त्यो मेघपङ्क्तयः।

उक्तमर्थमुदाहरति पद्मानीति। पद्मानि अर्कांशुनिष्ठ्यूताः सूर्य्यमयूखनिक्षिप्ताः पावकविप्रुषः अग्निस्फुलिङ्गान् पीत्वा उद्गीर्णा अरुणा रेणवः परागाः यैः तादृशैः मुखैः विशेषणे तृतीया। भूयः पुनःपुनः वमन्तीव। सायंकालीनपवनासङ्गेन स्खलत्परागाणां पद्मानां वर्णनमिदम्। अत्र निष्ठ्यूतोद्गीर्णशब्दौ दैहिककफादिनिक्षेपे शक्तौ अपि सामान्यनिक्षेपरूपेऽर्थे लाक्षणिकौ सन्तौ सहृदयहृदयङ्गमतां प्राप्ताविति समाधिरव्याहतः। वमन्ति इवेत्युत्प्रेक्षायामपि न ग्राम्यता प्रत्युत समाधिगुणयोगात् गुण एवेति पूर्वोक्तगौणवृत्तिपदस्य उत्प्रेक्षोपलक्षकत्वमवगन्तव्यम्॥ ९६॥

इति पूर्वोक्तं निष्ठ्यूतादिपदं हृद्यं गौणलक्षणयोगेन समाधिमत्त्वादिति भावः। वधूः निष्ठीवति कफादिकं त्यजतीति वाक्यन्तु अहृद्यं ग्राम्यतादोषकलुषिततया सहृदयानाम् अप्रियम्। तत्र नैकधर्माणां बहूनाम् अन्यधर्माणां युगपत् समकालमेव न तु कालभेदेन अन्यत्र अध्यासः समारोपश्च स्मृतः। तथाच एकस्य अन्यधर्मस्य अन्यस्मिन्, तथा बहूनामपि अन्यधर्माणामन्यत्र समारोपः समाधिरिति फलितार्थः॥ ९७॥

उक्तमर्थमुदाहरति गुर्विति। गुरवः महत्यः स्थूलकलेवरा

अचलाधित्यकोत्सङ्गमिमाः समधिशेरते ॥ ९८ ॥
उत्सङ्गशयनं सख्याः स्तननं गौरवं क्लमः ।
इतीमे गर्भिणीधर्मा बहवोऽप्यत्र दर्शिताः ॥ ९९ ॥

इत्यर्थः उभयत्र समानम् । तथा गर्भस्य अन्तर्वर्त्तिजलपूरस्य अन्यत्र कुक्षिस्थजीवस्य भरेण क्लान्ताः मन्थराः स्तनन्त्यः गर्जन्त्यः अन्यत्र क्लान्तिजनितशब्दविशेषं कुर्वत्यः इमा मेघ-पङ्क्तयः अचलस्य पर्वतस्य अधित्यका ऊर्द्ध्वभूमिः, उपत्यकाद्रे-रासन्ना भूमिरूर्द्ध्वमधित्यका इत्यमरः । तस्या उत्सङ्गं मध्य-भागम् अन्यत्र सख्याः क्रोड़ं समधिशेरते । अन्यत्र मेघपङ्क्ति-धर्मेषु गर्भिणीधर्माणां बहूनां युगपदध्यासात् वैचित्र्यातिशयः सहृदयहृदयहारीति भाव्यम् अलङ्कारश्च समासोक्तिरिति ॥ ९८ ॥

उक्तश्लोके गर्भिणीधर्मं दर्शयति उत्सङ्गेति । अत्र उक्ते श्लोके सख्या उत्सङ्गशयनं स्तननं गौरवं क्लम इति उक्तरूपा इमे बहवः गर्भिणीधर्माः दर्शिताः आरोपितत्वेनेति शेषः । यदि च स्तनितं गर्जितं मेघनिर्घोषे इत्याद्यमरोक्त्या स्तनन-शब्देन मेघगर्जितमेव बुध्यते तथापि शब्दमात्रार्थकस्तनधातु-निष्पन्नत्वेन स्तनन्त्य इति पदस्य गर्भिण्यास्तादृशेऽपि शब्द-प्रयोगो युज्यते । अन्यच्च मञ्जीरादिषु रणितप्रायं पक्षिषु च कूजितप्रभृति स्तनितमणितादि सुरते मेघादिषु गर्जितप्रमुख-मिति वचनान्तरेण स्तनितशब्दस्य सुरतवाचकत्वमपि सिद्धं तस्मात् स्तनधातोः केवलं मेघगर्जितमेवार्थो न अपितु सा-मान्यशब्दमात्रमपि । ननु शब्दमात्रार्थकतायां सिद्धायामपि कथं स्तनन्त्य इति पदेन गर्भिण्या असाधारणशब्दविशेषस्य उपपत्तिरिति चेन्न, गर्भिण्या अन्येषाम् असाधारणधर्माणाम्

तदेतत् काव्यसर्वस्वं समाधिर्नाम यो गुणः ।
कविसार्थः समग्रोऽपि तमेनमनुगच्छति ॥ १०० ॥
इति मार्गद्वयं भिन्नं तत्स्वरूपनिरूपणात् ।
तद्भेदास्तु न शक्यन्ते वक्तुं प्रतिकविस्थिताः ॥१०१॥

अन्तःपातात् अस्यापि गर्भिणीधर्मत्वस्य युक्तत्वात् वैचित्र्यजनकत्वेन अतीवहृद्यत्वात् इति विवेचनीयम् ॥ ९९ ॥

उपसंहरति तदिति । तत् तस्मात् उक्तप्रकारेण अतीव-वैचित्र्यावहत्वात् समाधिर्नाम यो गुणः एतत् काव्यस्य सर्वं स्वं धनं सारभूतमित्यर्थः समग्रः अपि सकलः कविसार्थः कवि-सम्प्रदायः गौड़ीयः वैदर्भीयो वा इत्यर्थः तं तथाभूतम् एनं समाधिम् अनुगच्छति एतदनुसारेण काव्ये प्रवर्त्तते इत्यर्थः । यदि च एतेषां गुणानां दशानां मध्ये केचित् तत्तद्दोषाभाव-रूपतया केचिच्च अलङ्कृतिरूपतया नव्यैः अनादृताः केवलं त्रय एव गुणा दर्शिताः यथा, माधुर्य्यौजःप्रसादाख्यास्त्रयस्ते न पुन-र्दश इति तथापि प्राचां मतमनुसृत्य ग्रन्थकृतोक्ता इति अव-धेयम् ॥ १०० ॥

इत्थं गौड़वैदर्भयोर्भेदं वर्णयित्वा उपसंहरति इतीति । इति उक्तप्रकारेण तयोः गौड़वैदर्भयोः स्वरूपनिरूपणात् लक्षणकीर्त्तनात् मार्गद्वयम् उल्लिखितरीतिद्वयं भिन्नं परस्पर-विलक्षणम् । तद्भेदाः ताभ्यां मार्गाभ्यां भेदाः भिन्ना इत्यर्थः कृदभिहितो भावो द्रव्यवत् प्रकाशते इति न्यायात् । लाट-पाञ्चालादयः प्रतिकवि तत्तद्देशीयकविषु स्थिताः तु किन्तु ते वक्तुं न शक्यन्ते अतिविस्तारादिति भावः । अथवा तद्भेदाः तयोः गौड़वैदर्भयोः भेदाः अन्तर्गतविशेषा इत्यर्थः ॥ १०१ ॥

इक्षुक्षीरगुड़ादीनां माधुर्य्यस्यान्तरं महत् ।
तथापि न तदाख्यातुं सरस्वत्यापि शक्यते ॥१०२॥
नैसर्गिकी च प्रतिभा श्रुतञ्च बहु निर्मलम् ।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः ॥१०३॥

उक्तमर्थं दृष्टान्तेन समर्थयति इक्ष्विति। इक्षुक्षीरगुड़ादीनामपि माधुर्य्यस्य अन्तरं भेदः तथा महत् अतिविस्तरमित्यर्थः यथा सरस्वत्यापि किमु वक्तव्यमन्येषामिति भावः वाग्देव्यापि तत् आख्यातुं कथयितुं न शक्यते। एवं काव्यमार्गाणां मधुरिम्णः आनन्त्यात् अनिर्वचनीयतया भेदद्वयमेव विशिष्य निरूपितमिति तात्पर्य्यार्थः ॥ १०२ ॥

इत्थं काव्यस्वरूपं निरूप्य तत्कारणमाह नैसर्गिकीति। नैसर्गिकी स्वभावसिद्धा प्रतिभा स्फुरन्ती मतिः बहु नानाविधं निर्मलं विशुद्धं श्रुतं शास्त्रज्ञानं लोकाचारादिज्ञानञ्च तथा अमन्दः प्रगाढ़ः अभियोगः अभिनिवेशश्च एतत् त्रयम् अस्याः काव्यसम्पदः काव्यरूपायाः सम्पत्तेः कारणं हेतुः, कारणमिति एकवचननिर्देशेन समस्तस्यैव कारणता न तु प्रत्येकस्य इति सूचितम्। उक्तञ्च प्रकाशकारेण, शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्। काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे॥ इति त्रयः समुदिता न तु व्यस्ताः तस्य काव्यस्य उद्भवे निर्माणे समुल्लासे च हेतु र्न तु हेतव इति। केचित् तु प्रतिभा एव काव्यकरणं व्युत्पत्तिस्तु तस्य चारुत्वे हेतुः, अभ्यासो वृद्धिहेतुश्च प्रतिभा च क्वचित् स्वतः प्रसरति क्वचित् वा देवानुग्रहात् भाविकवीनां बालानां सत्यामपि प्रतिभायां काव्यानुदयात् कालस्य तत्सहकारित्वमङ्गीकार्य्यमित्याहुः। उक्तञ्च, कवित्वं

न विद्यते यद्यपि पूर्ववासना
गुणानुबन्धि प्रतिभानमद्भुतम् ।
श्रुतेन यत्नेन च वागुपासिता
ध्रुवं करोत्येव कमप्यनुग्रहम् ॥ १०४ ॥

तदस्ततन्द्रैरनिशं सरस्वती
श्रमादुपास्या खलु कीर्त्तिमीप्सुभिः ।
कृशे कवित्वेऽपि जनाः कृतश्रमा
विदग्धगोष्ठीषु विहर्त्तुमीशते ॥ १०५ ॥

इति आचार्य्यदण्डिनः कृतौ काव्यादर्शे मार्ग-
विभागो नाम प्रथमः परिच्छेदः ।

जायते शक्तेर्वर्द्धतेऽभ्यासयोगतः । तस्य चारुत्वनिष्पत्तौ व्युत्-पत्तिस्तु गरीयसी ॥ इति सर्वमनवद्यम् ॥ १०३ ॥

उक्तकारणानां सर्वेषामभावेऽपि यत्नवतां शास्त्रानुशीलन-पराणां कथञ्चित् फलसिद्धिरित्याशयेनाह नेति । यद्यपि पूर्व-वासना प्राक्तनसंस्कारः स्वाभाविकी शक्तिरित्यर्थः तथा अद्भुतम् अलौकिकं गुणानुबन्धि वैचित्र्यावहं प्रतिभानं सुचिक्कणा बुद्धिः न विद्यते, तथापि श्रुतेन शास्त्रानुशीलनेन काव्यज्ञोपदेशेन वा यत्नेन अभिनिवेशेन उपासिता सेविता वाक् ध्रुवं निश्चितं कमपि अनुग्रहं करोति एव अवश्यमेव काव्यनिर्माणे किञ्चित् सामर्थ्यमातनोति इत्यर्थः । सम्यक् सामर्थ्ये तु उक्तत्रितयमेव हेतुरिति न परस्परं विरोध इति ॥ १०४ ॥

उपसंहरति तदिति । तत् तस्मात् अस्ततन्द्रैः अस्ता तन्द्रा

द्वितीयः परिच्छेदः ।

काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते ।
ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्न्येन वक्ष्यति ।

येषां तैः आलस्यरहितैः इत्यर्थः कीर्त्तिं कवित्वजनितयशः ईप्सुभिः जनैः इति शेषः श्रमात् परिश्रमेण अनिशं सरस्वती खलु निश्चयेन उपास्या सेव्या, अवश्यमेव शास्त्रं परिशीलितव्यमिति भावः कथमित्याह कृश इति । कवित्वे काव्यकरणसामर्थ्ये कृशे अल्पेऽपि कृतश्रमाः कृतशास्त्रपरिशीलनप्रयासा जनाः विदग्धगोष्ठीषु कविसमाजेषु विहर्त्तुम् ईशते प्रभवन्ति । अल्पस्यापि अस्य ज्ञाने करणे च ऐहिकामुत्रिकफलसिद्धिर्भवति, एकः शब्दः सुप्रयुक्तः सम्यक् ज्ञातः स्वर्गे लोके च कामधुग् भवतीति श्रुतेः ॥ १०५ ॥

इति श्रीजीवानन्दविद्यासागर-भट्टाचार्य्यविरचितायां
काव्यादर्शटीकायां प्रथमः परिच्छेदः ।

परिच्छेदेऽस्मिन् अलङ्कारान् निरूपयिष्यन् प्रथमं तेषां सामान्यलक्षणं निरूपयति काव्यशोभाकरानिति । काव्यस्य पूर्वोक्तलक्षणस्य शोभा सौन्दर्य्यं तत्तद्विशेषकृतचमत्कारजनकवैचित्र्यमित्यर्थः तत्करान् तत्साधनानि धर्मान् गुणविशेषान् अलङ्कारान् प्रचक्षते वदन्ति कवय इति शेषः । यथा हारकुण्डलादयः शरीरं शोभयन्ति तथा अनुप्रासोपमादयः काव्यशरीरभूतौ शब्दार्थौ शोभयन्तीति भावः । पूर्वोक्तगुणास्तु काव्यस्यान्तःशोभाधायकाः अलङ्कारास्तु वाह्यशोभाकरा इति

किन्तु वीजं विकल्पानां पूर्वाचार्य्यैः प्रदर्शितम्।
तदेव परिसंस्कर्त्तुमयमस्मत्परिश्रमः ॥ २ ॥
काश्चिन्मार्गविभागार्थमुक्ताः प्रागप्यलङ्क्रिया।
साधारणमलङ्कारजातमन्यत् प्रदर्श्यते ॥ ३ ॥
स्वभावाख्यानमुपमा रूपकं दीपकावृती।
आक्षेपोऽर्थान्तरन्यासो व्यतिरेको विभावना ॥ ४ ॥

गुणालङ्कारपदार्थयोर्भेद इति ध्येयम्। ते च अलङ्काराः अद्यापि विकल्प्यन्ते विविधरूपेण उद्भाव्यन्ते कविभिरिति शेषः, अतः कः पण्डितः तान् कात्स्न्र्येन साकल्येन वक्ष्यति निरूपयिष्यति न कोऽपि निरूपयितुं शक्ष्यतीत्यर्थः, उक्तिवैचित्र्यस्यैवालङ्कारत्वात् तस्य च कल्पनैकमूलत्वात् कल्पनायाश्च कदाप्यविरामात् इति भावः ॥ १॥

किन्तु विकल्पानां विविधकल्पनानां वीजं मूलं सादृश्यम् उपमेत्यादिसामान्यलक्षणं पूर्वाचार्य्यैः प्रदर्शितं निरूपितं यत् उपजीव्य नव्यानां वैचित्र्यभेदेन नाना कल्पना इति भावः। तदेव पूर्वाचार्य्यप्रदर्शितवीजीभूतम् अलङ्कारलक्षणम् इत्यर्थः परिसंस्कर्त्तुं सम्यक् स्फुटीकर्त्तुम् अयम् अस्माकं परिश्रमः प्रयासः ॥ २ ॥

काश्चित् अलङ्क्रियाः अलङ्काराः श्रुत्यनुप्रासादयः मार्गविभागार्थं रीतिविभेददर्शनार्थं प्रागपि पूर्वमेव उक्ताः, इदानीमन्यत् साधारणं सामान्यं सर्वसम्मतमित्यर्थः अलङ्कारजातं प्रदर्श्यते निरूप्यते ॥ ३ ॥

अलङ्कारान् निर्दिशति स्वभावेत्यादि। स्वभावाख्यानं

समासातिशयोत्प्रेक्षा हेतुः सूक्ष्मो लवः क्रमः ।
प्रेयो रसवदूर्जस्वि पर्य्यायोक्तं समाहितम् ॥ ५ ॥
उदात्तापह्नुतिश्लेषविशेषास्तुल्ययोगिता ।
विरोधाप्रस्तुतस्तोत्रे व्याजस्तुतिनिदर्शने ॥ ६ ॥
सहोक्तिः परिवृत्त्याशीः सङ्कीर्णमथ भाविकम् ।
इति वाचामलङ्कारा दर्शिताः पूर्वसूरिभिः ॥ ७ ॥
नानावस्थं पदार्थानां रूपं साक्षात् विवृण्वती ।
स्वभावोक्तिश्च जातिश्चेत्याद्या सालङ्कृतिर्यथा ॥८॥

स्वभावोक्तिः, दीपकञ्च आवृत्तिरावृत्तिश्च ते दीपकावृत्ती, समासः समासोक्तिः, अतिशयः अतिशयोक्तिः, समाहितं समाधिः, अप्रस्तुतस्तोत्रम् अप्रस्तुतप्रशंसा, इति उक्तप्रकारेण नामतो निर्दिष्टाः स्वभावोक्त्यादिभाविकपर्य्यन्ताः पञ्चत्रिंशत्संख्यकाः वाचां वाक्यानाम् अलङ्काराः पूर्वसूरिभिः प्राचीनकविभिः दर्शिताः, वाचाम् इत्यनेन वाक्यगता एवैते अलङ्कारा इति सूचितम् ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

स्वभावोक्तिं निरूपयति नानेति। स्वभावोक्तिश्च जातिश्च इति नामद्वयवती आद्या प्रथमा सर्वाग्रा वा यथार्थनिरूपणसारत्वादिति भावः। पदार्थानां जातिगुणक्रियाद्रव्याणां नाना अवस्था दशा यस्य तादृशं रूपं प्रकारं साक्षात् प्रत्यक्षमिव विवृण्वती प्रदर्शयन्ती सा प्रसिद्धा अलङ्कृतिः अलङ्कारः, तथाच पदार्थानां नानावस्थस्वरूपस्य वैचित्र्येण वर्णनं स्वभावोक्तिरिति निष्कर्षः। एकरूपाया अवस्थायाः कीर्त्तने न अयमलङ्कारः वैचित्र्याभावात् वैचित्र्यस्य एव अलङ्कारत्वात्

तुण्डैराताम्रकुटिलैः पक्षैर्हरितकोमलैः ।
त्रिवर्णराजिभिः कण्ठैरेते मञ्जुगिरः शुकाः ॥ ९ ॥
कलक्वणितगर्भेण कण्ठेनाघूर्णितेक्षणः ।
पारावतः परिभ्रम्य रिरंसुश्चुम्बति प्रियाम् ॥ १० ॥
बध्नन्नङ्गेषु रोमाञ्चं कुर्वन् मनसि निर्वृतिम् ।
नेत्रे चामीलयन्नेष प्रियास्पर्शः प्रवर्त्तते ॥ ११ ॥

इति सूच्यते। यथा अम्भोदमुदितं दृष्ट्वा मुदा नृत्यन्ति बर्हिण इत्यत्र वस्तुस्वरूपनिरूपणेऽपि वैचित्र्याभावात् न अलङ्कारता। उक्तञ्च प्रकाशकारेण यथा, स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम् इति। यथेति परोक्तस्य उदाहरणस्य सूचकम् ॥८॥

प्रथमं जातौ उदाहरति तुण्डैरिति। एते मञ्जुगिरः मधुरप्रलापिनः शुकाः आताम्राणि आलोहितानि कुटिलानि च तैः तुण्डैः मुखैः, हरिताः पालाशवर्णाः कोमलाश्च तैः पक्षैः तथा त्रयाणां वर्णानां हरितरक्तधूसराणां राजयः रेखाः येषु तादृशैः कण्ठैः सर्वत्र विशेषणे तृतीया। उपलक्षिता इत्यर्थः। अत्र शुकजातेः तादृशतुण्डत्वादिकम् असाधारणधर्मः वर्णनावैचित्र्येण साक्षादिव प्रतीयते इति जातिगता स्वभावोक्तिः ॥९॥

क्रियायामुदाहरति कलेति। कलं मधुरं क्वणितं गर्भे यस्य तादृशेन कण्ठेन विशेषणे तृतीया, पारावतः आघूर्णिते ईक्षणे नेत्रे यस्य तथाभूतः रिरंसुः रन्तुमिच्छुः सन् परिभ्रम्य प्रियां चुम्बति। पारावतानामुक्तविधचुम्बनं स्वाभाविकमिति क्रियागता स्वभावोक्तिरिति अवगन्तव्यम् ॥ १० ॥

गुणोदाहरणं दर्शयति बध्नन्निति। एष प्रियायाः स्पर्शः

कण्ठे कालः करस्थेन कपालेनेन्दुशेखरः ।
जटाभिः स्निग्धताम्राभिराविरासीत् वृषध्वजः ॥१२
जातिक्रियागुणद्रव्यस्वभावाख्यानमीदृशम् ।
शास्त्रेष्वस्यैव साम्राज्यं काव्येष्वप्येतदीप्सितम् ॥१३
यथा कथञ्चित् सादृश्यं यत्रोद्भूतं प्रतीयते ।

अङ्गेषु रोमाञ्चं बध्नन् जनयन् मनसि निर्वृतिं सातिशयानन्दं कुर्वन् तथा नेत्रे निमीलयन् मुद्रयंश्च प्रवर्त्तते प्रसरति। अत्र स्पर्शो गुणः ॥ ११ ॥

द्रव्योदाहरणं दर्शयति कण्ठे इति। कण्ठे कण्ठदेशे कालः नीलः कण्ठे कालशब्दः अलुक्तत्पुरुषनिष्पन्नः। करस्थेन कपालेन स्निग्धताम्राभिः जटाभिरिति च विशेषणे तृतीया। इन्दुशेखरः चन्द्रचूड़ः वृषध्वज आविरासीदित्यन्वयः। अत्र वृषध्वजशब्दो द्रव्यवाचकः संज्ञाशब्दस्य द्रव्यवाचकत्वात् इति वृषध्वजगतासाधारणधर्मस्य कीर्त्तनात् द्रव्यगता स्वभावोक्तिरिति ॥ १२ ॥

स्वभावोक्तिमुपसंहरन्नाह जातीति। अत्र द्रव्यपदेन संज्ञावाचकचैत्रमैत्रादीनां ग्रहणं न तु क्षित्यादेः तस्य जातिपदेन एव उपादानात्। जातिक्रियागुणद्रव्याणां स्वभावाख्यानं स्वभावोक्तिः ईदृशम् एवम्प्रकारम् अनयैव रीत्या स्वभावो वर्णनीय इति भावः। अस्यैव अलङ्कारस्य शास्त्रेषु काव्यतन्त्रेषु साम्राज्यम् आधिपत्यं काव्यशास्त्रेषु अस्यैव बहुलप्रचार इत्यर्थः एतच्च काव्येषु ईप्सितं प्रियं कवीनामिति शेषः, कवयः स्वभावोक्तिमेव विशेषेण आद्रियन्ते इति भावः ॥ १३ ॥

उपमां निरूपयति यथेति। यत्र काव्यधर्मे यथाकथञ्चित्

उपमा नाम सा, तस्याः प्रपञ्चोऽयं निदर्श्यते ॥१४॥
अम्भोरुहमिवाताम्रं मुग्धे ! करतलं तव ।
इति धर्मोपमा साक्षात् तुल्यधर्मप्रदर्शनात् ॥१५॥
राजीवमिव ते वक्त्रं नेत्रे नीलोत्पले इव ।
इयं प्रतीयमानैकधर्मा वस्तूपमैव सा ॥ १६ ॥

येन केनापि प्रकारेण उद्भूतं सादृश्यं प्रतीयते सा उपमा नाम, तथाच काव्यनिविष्टमलौकिकचमत्कारजनकं सादृश्यमुपमेति तात्पर्य्यं चमत्कारित्वासद्भावे नायमलङ्कारः यथा गौरिव गवय इत्यादि। उक्तञ्च रसगङ्गाधरे, सादृश्यं सुन्दरं वाक्यार्थोपस्कारकम् उपमालङ्कृतिरिति। व्याख्यातञ्च तत्रैव सुन्दरमिति सादृश्यविशेषणं सौन्दर्य्यचमत्कृत्याधायकत्वं चमत्कृतिश्च आनन्दविशेष इति। तस्याः प्रपञ्चः विस्तरः विविधभेदः अयं वक्ष्यमाणरूपः निदर्श्यते प्रदर्श्यते ॥ १४ ॥

धर्मोपमाख्यभेदमुदाहरति अम्भोरुहमिति। हे मुग्धे! तव करतलम् अम्भोरुहमिव कोकनदमिव आताम्रम् आलोहितम्। इति उक्तवाक्ये साक्षात् आताम्रमिति पदोपात्तस्य तुल्यधर्मस्य साधारणधर्मस्य आताम्रत्वस्य प्रदर्शनात् कीर्त्तनात् धर्मोपमा ॥ १५ ॥

वस्तूपमां लक्षयति राजीवमिति। ते तव वक्त्रं मुखं राजीवं पद्ममिव तथा नेत्रे नीलोत्पले इव। प्रतीयमानः गम्यमानः न तु अभिधीयमानः एकः सामान्यः धर्मः यस्यां सा तथाविधा इयम् अलङ्कृतिः वस्तूपमा एव वस्तुनोरुपमानोपमेययोः एवोपादानात्। एवञ्च सामान्यधर्माप्रयोगेऽपि स्फुट-

६

तवाननमिवोन्निद्रमरविन्दमभूदिति ।
सा प्रसिद्धिविपर्य्यासात् विपर्य्यासोपमेष्यते ॥१७॥
तवाननमिवाम्भोजमम्भोजमिव ते मुखम् ।
इत्यन्योन्योपमा सेयमन्योन्योत्कर्षशंसिनी ॥१८॥

मौपम्यप्रतीतौ एव इयमलङ्कृतिः न तु स्फुटप्रतीतौ इति बोद्धव्यम् ॥ १६ ॥

विपर्य्यासोपमां लक्षयति तवेति। उन्निद्रम् अरविन्दं तवाननमिव उन्निद्रं विकसितमभूत्। इत्यत्र प्रसिद्धेः विपर्य्यासात् वैपरीत्यात् सा प्रसिद्धा विपर्य्यासोपमा इष्यते कविभिरिति शेषः। तथाच प्रस्तुतानां मुखादीनाम् उपमेयत्वम् अप्रस्तुतानां चन्द्रादीनाम् उपमानत्वमेव प्रसिद्धिः। तां विहाय प्रस्तुतानां मुखादीनाम् अत्युत्कर्षप्रतिपादनाय उपमानत्वस्य चन्द्रादीनाञ्च उपमेयत्वस्य च कल्पनं विपर्य्यासोपमा इति बोद्धव्यम्। दर्पणकारस्तु इयं प्रतीपालङ्कार इत्याह। यथा, प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम्। निष्फलत्वाभिधानं वा प्रतीपमिति कथ्यते ॥ इति। उदाहृतञ्च तेनैव, यत्त्वन्नेत्रसमानकान्तिसलिले मग्नं तदिन्दीवरं मेघैरन्तरितः प्रिये! तव मुखच्छायानुकारी शशी। येऽपि त्वद्गमनानुकारिगतयस्ते राजहंसा गतास्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥ १७ ॥

अन्योन्योपमां निरूपयति तवेति। अम्भोजं तव आननमिव, ते मुखम् अम्भोजमिव। इत्यत्र अन्योन्यस्य परस्परस्य अम्भोजोपमानत्वेन मुखस्य मुखोपमानत्वेन अम्भोजस्य इत्यर्थः यः उत्कर्षः वैचित्र्य तस्य शंसिनी सूचयित्री सा प्रसिद्धा इयम्

त्वन्मुखं कमलेनैव तुल्यं नान्येन केनचित् ।
इत्यन्यसाम्यव्यावृत्तेरियं सा नियमोपमा ॥ १६ ॥
पद्मं तावत् तवान्वेति मुखमन्यच्च तादृशम् ।
अस्ति चेदस्तु तत्कारीत्यसावनियमोपमा ॥ २० ॥
समुच्चयोपमाप्यस्ति न कान्त्यैव मुखं तव ।
ह्लादनाख्येन चान्वेति कर्मणेन्दुमितीदृशी ॥२१॥

अन्योन्योपमा, एतेन पर्य्यायेण उपमानोपमेयभावस्य एव एतत् अलङ्कारविषयत्वमवधेयं तस्यैव वैचित्र्यजनकत्वात् मुखमम्भोजञ्च तुल्यमित्यादौ तथाप्रतीतौ अपि वैचित्र्याभावात् न अयमलङ्कारः। दर्पणकारस्तु एतामेव उपमेयोपमामाह । यथा, पर्य्यायेण द्वयोरेतत् उपमेयोपमा मता इति ॥ १८ ॥

नियमोपमां लक्षयति त्वदिति। तन्मुखं कमलेन एव तुल्यम् अन्येन केनापि नेति अत्र अन्यस्य साम्यं सादृश्यं तस्य व्यावृत्तिः निरासः तस्याः हेतोः इयं सा प्रसिद्धा नियमोपमा, उपमानबाहुल्यम् उपमेयस्यापकर्षं गमयति, तद्व्यावृत्त्या एकेन प्रकृष्टतमेन सादृश्यकल्पनात् उत्कर्षातिशयः समधिकवैचित्र्यम् आवहतीति ध्येयम् ॥ १६ ॥

अनियमोपमां निरूपयति पद्ममिति। पद्मं तावत् तव मुखम् अन्वेति अनुकरोति, अन्यच्च तादृशं पद्मवत् सुन्दरं वस्तु चन्द्रादि तत्कारि तव मुखानुकारि अस्ति चेत् अस्तु। इत्यत्र असौ अनियमोपमा पद्मस्य तदन्यस्य च यस्य कस्यचित् अपि उपमेयत्वकल्पनात् कल्पनायाश्च नियमाभावात् इति ॥ २० ॥

समुच्चयोपमामाह, समुच्चय इति। तव मुखं कान्त्यैव

त्वय्येव त्वन्मुखं दृष्टं दृश्यते दिवि चन्द्रमाः ।
इयत्येव भिदा नान्येत्यसावतिशयोपमा ॥ २२ ॥
मय्येवास्या मुखश्रीरित्यलमिन्दोर्विकत्थनैः ।
पद्मेऽपि सा यदस्त्येवेत्यसावुत्प्रेक्षितोपमा ॥ २३ ॥

केवलया कान्त्या न, ह्लादनाख्येन प्रह्लादनजनकेन कर्मणा च चकारः समुच्चयद्योतकः, इन्दुं चन्द्रम् अन्वेति अनुगच्छति अनुकरोतीत्यर्थः । इति ईदृशी एवम्प्रकारा समुच्चयोपमा अपि अस्ति, ईदृशीत्यनेन केवलगुणकेवलक्रियासमुच्चये वा साधारण-समुच्चयेऽपि वा अयमलङ्कारो बोद्धव्यः ॥ २१ ॥

अतिशयोपमां निरूपयति त्वयीति । तव मुखं त्वयि एव दृष्टं, चन्द्रमाः दिवि आकाशे दृश्यते, इयती आश्रयनिबन्धना एव भिदा प्रभेदः मुखचन्द्रमसोरिति शेषः, न अन्या न गुण-क्रियादिकृता इति भावः, असौ अतिशयोपमा, भिन्नाश्रयत्वेन औपम्यस्य सातिशयचमत्कारित्वात् । अत्र साम्यमिव आदि-शब्दाप्रयोगात् व्यङ्ग्यं न च अत्र रूपकध्वनिः आश्रयभेदेन अभेदप्रतीतेरभावादिति ध्येयम् ॥ २२ ॥

उत्प्रेक्षितोपमां लक्षयति मयीति । अस्या मुखश्रीः मुख-कान्तिः मुखसदृशकान्तिरित्यर्थः मयि एव न अन्यत्र, इन्दोः चन्द्रस्य इति एवं विकत्थनैः आत्मश्लाघनैः अलं, यत् यस्मात् सा कान्तिः पद्मेऽपि अस्ति पद्ममपि तत्सदृशकान्तीत्यर्थः असौ उत्प्रेक्षितोपमा, इन्दौ आत्मश्लाघाया अतात्त्विकत्वेन नायकस्य चाटूक्त्या तथा सम्भावितत्वात् सम्भावनायाश्च उत्प्रेक्षात्वात् इति । साम्यञ्च अत्र व्यङ्ग्यम् ॥ २३ ॥

यदि किञ्चित् भवेत् पद्मं सुभ्रु ! विभ्रान्तलोचनम् ।
तत् ते मुखश्रियं धत्तामित्यसावद्भुतोपमा ॥ २४ ॥
शशीत्युत्प्रेक्ष्य तन्वङ्गि ! त्वन्मुखं त्वन्मुखाशया ।
इन्दुमप्यनुधावामीत्येषा मोहोपमा स्मृता ॥२५॥
किं पद्ममन्तर्भ्रान्तालि किं ते लोलेक्षणं मुखम् ?

अद्भुतोपमामाह यदीति । हे सुभ्रु ! यदि पद्मं विभ्रान्तलोचनं विघूर्णितनयनं भवेत्, तत् तदा ते तव मुखश्रियं वदनकान्तिं धत्तां धारयतु । इत्यत्र असौ अद्भुतोपमा, यद्यर्थबलेन सादृश्यस्य समधिकचमत्कारद्योतनात् । उक्तञ्च, यत्रोपमेयधर्माः स्युरुपमानेऽधिरोपिताः । चमत्कारविधानार्थं तामाहुरद्भुतोपमाम् ॥ इति । प्रकाशकारस्तु एनामतिशयोक्तिमाह । यथा, निगीर्य्याध्यवसानन्तु प्रकृतस्य परेण यत् । प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम् ॥ इति । उदाहृतञ्च विश्वनाथेन यथा, यदि स्यान्मण्डले सक्तमिन्दोरिन्दीवरद्वयम् । तदोपमीयते तस्या वदनं चारुलोचनम् ॥ २४ ॥

मोहोपमां निरूपयति शशीति । हे तन्वङ्गि कृशाङ्गि ! तव मुखं शशीति उत्प्रेक्ष्य सम्भाव्य भ्रान्त्या अभिन्नं बुद्धा इत्यर्थः तव मुखाशया वदनस्पृहया इन्दुमपि अनुधावामि । इत्यत्र मोहोपमा स्मृता कविभिरिति शेषः, मोहेन इन्दोर्मुखत्वेन ज्ञानात् । तथाचोक्तं, प्रतियोगिनमारोप्य तदभेदेन कीर्त्तनम् । उपमेयस्य यन्मोहोपमासौ भ्रान्तिमद्वचः ॥ इति । दर्पणकारस्तु एनां भ्रान्तिमदलङ्कारमाह यथा, साम्यादतस्मिंस्तद्बुद्धिर्भ्रान्तिमान् प्रतिभोत्थितः इति । साम्यञ्चात्र व्यङ्ग्यम् ॥ २५ ॥

मम दोलायते चित्तमितीयं संशयोपमा ॥ २६ ॥
न पद्मस्येन्दुनिग्राह्यस्येन्दुलज्जाकरी द्युतिः ।
अतस्त्वन्मुखमेवेदमित्यसौ निर्णयोपमा ॥ २७ ॥
शिशिरांशुप्रतिस्पर्द्धि श्रीमत् सुरभिगन्धि च ।
अम्भोजमिव ते वक्त्रमिति श्लेषोपमा स्मृता ॥२८॥

संशयोपमां निरूपयति किमिति । अन्तर्भ्रान्ते अली यस्य तत् पद्मं किम् ? ते तव लोले चञ्चले ईक्षणे नेत्रे यस्मिन् तत् मुखं किम् ? मम चित्तम् इति इत्थं दोलायते संशेते । इयं संशयोपमा संशयस्य औपम्यपर्य्यवसायित्वात् । दर्पणकारस्तु एनां सन्देहालङ्कारमाह यथा, सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थित इति । अत्रापि साम्यं व्यञ्जनया गम्यते ॥ २६ ॥

निर्णयोपमां निरूपयति नेति । इन्दुना निग्राह्यस्य निगृहीतस्य तिरस्कृतस्य इत्यर्थः पद्मस्य द्युतिः इन्दुलज्जाकरी न पराजितस्य पराजेतृलज्जाजनकत्वादिति भावः । अतः इदं तव मुखमेव न पद्मं तव मुखस्यैव इन्दुपराजेतृत्वात् इति भावः । असौ निर्णयोपमा निर्णयेन उपमानोपमेययोः सादृश्यावगमात् । मुखं वा पद्मं वा इत्यादिसंशयात् परं निश्चयज्ञान एवायमलङ्कारो बोद्धव्यः । उक्तञ्च, उपमेयस्य संशय्य निश्चयान्निश्चयोपमा इति ॥ २७ ॥

श्लेषोपमां निरूपयति शिशिरेति । ते वक्त्रं वदनम् अम्भोजमिव शिशिरांशुप्रतिस्पर्द्धि शिशिरांशुः चन्द्रः प्रतिस्पर्द्धी विरोधी यस्य तत् श्रीमत् सुश्रीकं तथा सुरभिगन्धि च विशेषणत्रयम् उभयत्र समानम् । अथवा वक्त्रपक्षे शिशिरांशुप्रति-

सरूपशब्दवाच्यत्वात् सा समानोपमा यथा ।
बालेवोद्यानमालेयं सालकाननशोभिनी ॥ २९ ॥
पद्मं बहुरजश्चन्द्रः क्षयी ताभ्यां तवाननम् ।
समानमपि सोत्सेकमिति निन्दोपमा स्मृता ॥३०॥

स्पर्द्धिनी या श्रीः शोभा तद्वत् । इत्यत्र श्लेषोपमा स्मृता कविभिरिति शेषः । श्लेषेण उपमानोपमेयगततत्तत्साधर्म्यस्य द्योतनात् श्लेषस्य अत्र अर्थश्लेष एव समानोपमायाः शब्दश्लेषविषयत्वादिति ॥ २८ ॥

समानोपमां लक्षयति सरूपेति । सरूपशब्दैः समानरूपैः श्लेषात् भिन्नैरपि अभिन्नवत् प्रतीयमानैः शब्दैः वाच्यत्वात् साधर्म्यस्य प्रतिपाद्यत्वात् सा प्रसिद्धा समानोपमा, यथाशब्दः उदाहरणप्रदर्शनार्थः । इयम् उद्यानमाला उपवनराजिः बाला कामिनीव सालकाननशोभिनी सालानां वृक्षभेदानां काननेन वनेन सम्बन्धेन इत्यर्थः शोभते इति तथोक्ता, अन्यत्र सालकम् अलकालङ्कृतं यत् आननं तेन शोभते इति अत्र साधारणधर्मस्य सालकाननशोभित्वस्य शब्दश्लेषेण द्योतनात् शब्दश्लेषमूलैवेयं दोषगुणालङ्काराणां शब्दार्थगतत्वव्यवस्थितेः शब्दपरिवृत्तिसहत्वासहत्वमेव मूलम् अत्र सालकाननेत्यत्र सर्जकाननेति परिवृत्तौ न श्लेषः, पूर्वत्र शिशिरांशु इत्यत्र शीतगु इति परिवृत्तौ अपि न क्षतिरिति सुधीभिर्भाव्यम् ॥ २९ ॥

निन्दोपमां लक्षयति पद्ममिति । पद्मं बहुरजः परागपूर्णं रजोगुणबहुलञ्च, चन्द्रश्च क्षयी क्षयरोगी, पक्षान्तरे क्षयशीलश्च, अतः आननं समानमपि साधर्म्यान्तरेण तुल्यमपि ताभ्यामिति शेषः सोत्सेकं समधिकोत्कर्षशालि । इत्यत्र निन्दो-

ब्रह्मणोऽप्युद्भवः पद्मश्चन्द्रः शम्भुशिरोधृतः।
तौ तुल्यौ त्वन्मुखेनेति सा प्रशंसोपमोच्यते॥३१
चन्द्रेण त्वन्मुखं तुल्यमित्याचिख्यासु मे मनः।
स गुणो वास्तु दोषो वेत्याचिख्यासोपमां विदुः३२

पमा स्मृता, उपमाननिन्दया साम्यस्य कीर्त्तनात्। साम्यमात्रपर्य्यवसायित्वादस्या व्यतिरेकात् भेदः व्यतिरेके तु भेद एव पर्य्यवसानमिति बोद्धव्यम्॥ ३०॥

प्रशंसोपमां निरूपयति ब्राह्मण इति। पद्मः ब्रह्मणोऽपि उद्भवः उत्पत्तिस्थानं नारायणस्य नाभिकमलजातत्वात्, तथा चन्द्रः शम्भुशिरोधृतः तौ पद्मचन्द्रौ त्वन्मुखेन तुल्यौ इति पद्मचन्द्रयोः प्रशंसितयोरपि त्वन्मुखसादृश्येन प्रशंसातिशयात् मुखस्य च समधिकोत्कर्षव्यञ्जनात् प्रशंसोपमा उच्यते। अत्र मुखस्य उपमेयत्वप्रसिद्धावपि, उपमानत्वकल्पनात् प्रतीपालङ्कारोऽपि। यदुक्तं, प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम्। निष्फलत्वाभिधानं वा प्रतीपमिति कथ्यते॥ इत्यनयोः सङ्करः। स्वमते विपर्य्यासोपमा च मुखस्योपमानतया प्रसिद्धोपमेयखण्डनादिति तयोः सङ्कर इति, पद्म इति पुंस्त्वनिर्देशेन अप्रयुक्ततादोषश्चेति बोध्यम्॥ ३१॥

आचिख्यासोपमां लक्षयति चन्द्रेणेति। त्वन्मुखं चन्द्रेण तुल्यम् इति आचिख्यासु आख्यातुमिच्छु मे मनः। स आख्यानाभिलाषः गुणो वा दोषो वा अस्तु इत्यत्र आचिख्यासोपमां विदुः। आख्यानकामनाविषयत्वेन मुखस्य चन्द्रेण उपमितत्वेऽपि गुणो वा दोषो वा इति कथनम् अधिकचमत्कारित्वं द्योतयतीति बोध्यम्॥ ३२॥

शतपत्रं शरच्चन्द्रस्त्वदाननमिति त्रयम् ।
परस्परविरोधीति सा विरोधोपमा मता ॥ ३३ ॥
न जातु शक्तिरिन्दोस्ते मुखेन प्रतिगर्जितुम् ।
कलङ्किनो जडस्येति प्रतिषेधोपमैव सा ॥ ३४ ॥
मृगेक्षणाङ्कं ते वक्त्रं मृगेणैवाङ्कितः शशी ।
तथापि सम एवासौ नोत्कर्षीति चटूपमा ॥ ३५ ॥

विरोधोपमां निरूपयति शतपत्रमिति । शतपत्रं पद्मं शरच्चन्द्रः शारदीयचन्द्रः तव आननञ्च एतत् त्रयं परस्पर-विरोधि अन्योन्यस्पर्द्धि शतपत्रे शोभिते चन्द्रस्य मालिन्यं चन्द्रे च शोभिते शतपत्रस्य मालिन्यं प्रसिद्धं तवानने शोभिते च द्वयोरेव मालिन्यं स्यादिति वाग्वैचित्र्यशालिनी । सा प्रसिद्धा विरोधोपमा ॥ ३३ ॥

प्रतिषेधोपमामाह नेति । इन्दोः चन्द्रस्य ते तव मुखेन जातु कदाचित् प्रतिगर्जितुं प्रतिस्पर्द्धितुं सदृशीभवितुम् इत्यर्थः शक्तिः सामर्थ्यं नास्ति, यतः कलङ्किनः तथा जडस्य, इत्यत्र प्रतिषेधोपमा सादृश्यप्रतिषेधेन अधिकवैचित्र्यप्रकटनात् निन्दोपमायां निन्दया, इह तु प्रतिषेधेन इत्यनयोर्भेदः ॥ ३४ ॥

चटूपमां निरूपयति मृगेक्षणेति । ते वक्त्रं मृगस्य ईक्षणाभ्याम् अवयवविशेषाभ्याम् अङ्कं चिह्नितं, शशी तु मृगेण सर्वावयवसम्पन्नेनेति भावः अङ्कितः । तथापि अधिकसामग्री-सत्त्वेऽपि असौ सम एव तव मुखेनेति शेषः न उत्कर्षी नाधिक-वैचित्र्यजनकः । इत्यत्र चटुः प्रियोक्तिः तद्घटितत्वात् चटूपमा अत्र सत्यपि उत्कर्षकारणे न उत्कर्ष इति प्रतिपादनात् विशे-

न पद्मं मुखमेवेदं न भृङ्गौ चक्षुषी इमे ।
इति विस्पष्टसादृश्यात् तत्त्वाख्यानोपमैव सा ॥३६॥
चन्द्रारविन्दयोः कान्तिमतिक्रम्य मुखं तव ।
आत्मनैवाभवत्तुल्यमित्यसाधारणोपमा ॥ ३७ ॥
सर्वपद्मप्रभासारः समाहृत इव क्वचित् ।

षोक्तिः । तदुक्तं दर्पणकारेण, सति हेतौ फलाभावो विशे षोक्तिस्तथा द्विधा इति तन्मूला च इयं समधिकवैचित्र द्योतयति नान्यथा, सर्वत्रैवोपमाभेदेषु चाटूक्तिसद्भावादि ध्येयम् ॥ ३५ ॥

तत्त्वाख्यानोपमां लक्षयति नेति । इदं पद्मं न मुखमे भृङ्गौ भ्रमरौ न इमे चक्षुषी नेत्रे, इति इत्थं विशेषेण सादृश्यस स्पष्टत्वात् सुव्यक्तत्वात् सा प्रसिद्धा तत्त्वाख्यानोपमा इयमिति शेषः भ्रमनिरासेन तत्त्वस्य आख्यानात् निर्णयोपमायां तत्त्वा ख्यानस्य संशयपूर्वकत्वम् इह तु भ्रान्तिपूर्वकत्वम् इत्यनयो भेदः ॥ ३६ ॥

असाधारणोपमां लक्षयति चन्द्रेति । तव मुखं चन्द्रार विन्दयोः कान्तिं शोभाम् अतिक्रम्य आत्मनैव तुल्यम् अभव इति असाधारणोपमा, चन्द्रपद्मयोः कान्त्यतिक्रमेण प्रकृतस मुखस्य आत्मनैव साम्यकीर्त्तनेन च औपम्यस्य असाधार त्वात् । दर्पणकारस्तु एनामन्वयाख्यमलङ्कारमाह । यथा, उप मानोपमेयत्वमेकस्यैव त्वनन्वय इति । एवञ्च द्वयोः साम्यमुप न तु एकस्य इति बोद्धव्यम् ॥ ३७ ॥

अभूतोपमां निरूपयति सर्वेति । त्वदाननं क्वचित् सर्व पद्मानां प्रभासारः कान्तिपुञ्जः समाहृत इव विभाति, इत्य

त्वदाननं विभातीति तामभूतोपमां विदुः ॥ ३८॥
चन्द्रविम्बादिव विषं चन्दनादिव पावकः।
परुषा वागितो वक्त्रादित्यसम्भावितोपमा ॥ ३९॥
चन्दनोदकचन्द्रांशुचन्द्रकान्तादिशीतलः।
स्पर्शस्तवेत्यतिशयं बोधयन्ती बहूपमा ॥ ४० ॥

ताम् अभूतोपमां विदुः, प्रभासारसमाहरणस्य तत्त्वतः अभूतत्वात् सम्भावनया औपम्यस्य कीर्त्तनाच्च। दर्पणकारस्तु इमाम् उत्प्रेक्षालङ्कारमाह। यथा, भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना इति। प्राञ्चस्तु प्रकृते अप्रकृतस्य धर्मिणः सम्भावनमुत्प्रेक्षा, इह तु धर्मस्य सम्भावनया द्वयोः साम्यमित्यनयोः भेदः ॥ ३८ ॥

असम्भावितोपमां निरूपयति चन्द्रेति। इतः अस्मात् वक्त्रात् परुषा वाक् चन्द्रविम्बात् विषमिव, चन्दनात् पावक इव, इति अत्र उपमाभ्यां विषपावकनिःसरणमिव वदनात् परुषवाङ्निःसरणस्य असम्भावित्वात् असम्भावितोपमा ॥३९॥

बहूपमां लक्षयति चन्दनेति। तव स्पर्शः चन्दनवत् उदकवत् चन्द्रांशुवत् चन्द्रकान्तवत् आदिपदेन एवंविधपदार्थवत् शीतल इति अतिशयम् अधिकशैत्यम् अधिकवैचित्र्यं वा बोधयन्ती द्योतयन्ती बहूपमा। एकस्य उपमानबाहुल्यकीर्त्तनात् बहुपदेन द्वयोरप्युपमानयोः सद्भावे न इयमुपमा वैचित्र्याणाम् अबाहुल्यात् इति बोध्यम्। दर्पणकारस्तु इमां मालोपमामाह। यथा, मालोपमा यदेकस्योपमानं बहु दृश्यते इति ॥ ४० ॥

चन्द्रबिम्बादिवोत्कीर्णं पद्मगर्भादिवोद्धृतम् ।
तव तन्वङ्गि ! वदनमित्यसौ विक्रियोपमा ॥४१॥
पुष्ण्यातप इवाह्नीव पूषा व्योम्नीव वासरः ।
विक्रमस्त्वय्यधाल्लक्ष्मीमिति मालोपमा मता ॥४२॥
वाक्यार्थेनैव वाक्यार्थः कोऽपि यद्युपमीयते ।
एकानेकेवशब्दत्वात् सा वाक्यार्थोपमा द्विधा ॥४३॥

विक्रियोपमां लक्षयति चन्द्रेति । हे तन्वङ्गि ! तव वदनं चन्द्रबिम्बात् उत्कीर्णमिव, अथवा पद्मगर्भात् उद्धृतमिव इति अत्र चन्द्रबिम्बपद्मगर्भौ प्रकृतीभूतौ वदनस्य प्रस्तुतस्य ताभ्याम् उत्कीर्णत्वात् उद्धृतत्वात् वा विकृतिभावप्रतिपादनात् विक्रियोपमा। उक्तञ्च, उपमेयस्य यत्र स्यादुपमानविकारता। प्रकृतेर्विकृतेः साम्यात् तामाहुर्विक्रियोपमाम् ॥ इति । अत्र च उत्कीर्णत्वोद्धृतत्वयोः धर्मयोः उत्प्रेक्षणात् धर्मिणोश्च साम्यप्रतीतिरुपमैव न तु उत्प्रेक्षा तस्या धर्मिगतत्वेन कीर्त्तनात् इति बोध्यम् ॥ ४१ ॥

मालोपमां निरूपयति पुष्णीति । पुष्णि सूर्य्ये आतप इव, अह्नि दिवसे पूषा सूर्य्य इव, व्योम्नि आकाशे वासरः दिवसः इव विक्रमः त्वयि लक्ष्मीं अधात् । इत्यत्र मालायां यथा एकेन पुष्पेण अपरस्य पुष्पस्य योगः, तथा उपमानानां परस्परसम्बन्धात् मालोपमेयं, एवंविधवैचित्र्य एव अस्याः सत्त्वात्, बहूपमायाश्च केवलमुपमानबाहुल्यात् अनयोर्भेदः ॥ ४२ ॥

वाक्यार्थोपमां लक्षयति वाक्यार्थेनेति । वाक्यं पदसमुदायः तस्यार्थः वाक्यार्थः तेन कोऽपि अपरो वाक्यार्थः यदि अनु

त्वदाननमधीराक्षमाविर्दशनदीधिति ।
भ्रमद्भृङ्गमिवालक्ष्यकेसरं भाति पङ्कजम् ॥ ४४ ॥
नलिन्या इव तन्वङ्ग्यास्तस्याः पद्ममिवाननम् ।
मया मधुव्रतेनेव पायं पायमरम्यत ॥ ४५ ॥
वस्तु किञ्चिदुपन्यस्य न्यसनात् तत्सधर्मणः ।
साम्यप्रतीतिरस्तीति प्रतिवस्तूपमा यथा ॥ ४६ ॥

मीयते सा वाक्यार्थोपमा, वाक्यार्थयोरुपमानोपमेयत्वकीर्त्तनात्, सा द्विधा एकानेकेवशब्दत्वात् क्वचिदेकेवशब्दघटिता, क्वचिच्च अनेकेवशब्दघटिता इति ॥ ४३ ॥

एकेवशब्दां वाक्यार्थोपमाम् उदाहरति त्वदिति । अधीरे चञ्चले अक्षिणी यत्र तत्, आविर्भवन्त्यः दशनानां दीधितयो यत्र तादृशं तव आननं भ्रमन्तौ भृङ्गौ यत्र तत् तथा अलक्ष्या ईषल्लक्ष्याः केसराः किञ्जल्काः यस्य तादृशं पङ्कजमिव भाति । अत्र पूर्वार्द्धवाक्यं परार्द्धेन एकेवशब्दघटितेन वाक्येन उपमीयते ॥ ४४ ॥

अनेकेवशब्दम् उदाहरति नलिन्या इति । नलिन्या इव तस्याः तन्वङ्ग्याः पद्ममिव आननं मधुव्रतेनेव मया पायं पायं पुनः पुनः पीत्वा अरम्यत । अत्र नलिन्या पद्ममिव इति वाक्येन तन्वङ्ग्या आननमिवेति वाक्यार्थस्य उपमितत्वात् अनेकेवशब्दघटितत्वाच्च अनेकेवशब्दा वाक्यार्थोपमा इति बोध्यम् ॥ ४५ ॥

प्रतिवस्तूपमां निरूपयति वस्त्विति । किञ्चित् वस्तु किमपि प्रकृतम् उपन्यस्य तस्य सधर्मणः समानधर्मस्य कस्यचित्

नैकोऽपि त्वादृशोऽद्यापि जायमानेषु राजसु ।
ननु द्वितीयो नास्त्येव पारिजातस्य पादपः ॥४७॥
अधिकेन समीकृत्य हीनमेकक्रियाविधौ ।
यत् ब्रुवन्ति स्मृता सेयं तुल्ययोगोपमा यथा ॥४८॥

अप्रकृतस्य न्यसनात् प्रकृतस्य समर्थनाय उपादानात् साम्यप्रतीतिः सादृश्यावबोधो भवति इति इत्थं या साम्यप्रतीतिः प्रतिवस्तूपमा इत्यन्वयः। दर्पणकारस्तु इमाम् अलङ्कारान्तरमाह। यथा, प्रतिवस्तूपमा सा स्यात् वाक्ययोर्गम्यसाम्ययोः। एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथक्॥ इति। यथेति वक्ष्यमाणोदाहरणप्रदर्शनार्थम्॥ ४६ ॥

उदाहरणं दर्शयति नेति। जायमानेषु राजसु मध्ये अद्यापि त्वादृशः तव सदृशः एकोऽपि नास्ति, ननु भोः पारिजातस्य पादपः वृक्षः द्वितीयो नास्त्येव। अत्र सदृशो नास्ति द्वितीयो नास्तीति साधारणधर्म एव पुनरुक्तिभिया शब्दान्तरेण उपन्यस्तः, साम्यञ्चात्र गम्यमिति दर्पणकारेण अस्या वैधर्म्येणापि उदाहरणं दर्शितम्। यथा, चकोर्य्य एव चतुराश्चन्द्रिकापानकर्मणि। विनावन्तीर्न निपुणाः सुदृशो रतनर्मणि॥ अत्र चातुर्य्यनैपुण्याभ्यामपि वाक्यद्वयस्य साम्यप्रतीतिरस्तीति बोध्यम्॥ ४७ ॥

तुल्ययोगोपमां लक्षयति अधिकेनेति। एकक्रियाविधौ एकजातीयक्रियाविधाने हीनं न्यूनं वस्तु अधिकेन अधिकगुणेन समीकृत्य सदृशीकृत्य यत् ब्रुवन्ति सा इयं तुल्ययोगोपमा क्रियायामधिकहीनगुणयोः समीकरणादित्यर्थः। तथाच

दिवो जागर्त्ति रक्षायै पुलोमारिर्भवान् भुवः ।
असुरास्तेन हन्यन्ते सावलेपास्त्वया नृपाः ॥ ४९ ॥
कान्त्या चन्द्रमसं धाम्ना सूर्य्यं धैर्य्येण चार्णवम् ।
राजन्ननुकरोषीति सैषा हेतूपमा मता ॥ ५० ॥
न लिङ्गवचने भिन्ने न हीनाधिकतापि वा ।
उपमादूषणायालं यत्रोद्वेगो न धीमताम् ॥ ५१ ॥

एकजातीयक्रियया प्रस्तुताप्रस्तुतयोः साम्यकीर्त्तनं तुल्ययोगोपमा इति लक्षणम् । यथेति उदाहरणप्रदर्शनार्थम् ॥ ४८ ॥

तुल्ययोगोपमामाह दिव इति । पुलोमारिः इन्द्रः दिवः स्वर्गस्य रक्षायै, भवान् भुवः पृथिव्याः रक्षायै जागर्त्ति, तेन इन्द्रेण असुरा हन्यन्ते, त्वया सावलेपाः गर्विताः नृपाः हन्यन्ते । अत्र हीनस्य प्रस्तुतस्य राज्ञः गुणाधिकेन इन्द्रेण एकजातीयक्रियाकरणेन समीकरणात् तुल्ययोगोपमा इति ॥ ४९ ॥

हेतूपमाम् उदाहरति कान्त्येति । सुगमम् । अत्र राज्ञः चन्द्रादिभिः सादृश्यस्य कान्त्यादिहेतुकत्वात् एषा हेतूपमा इति ॥ ५० ॥

इत्थमुपमां तद्भेदांश्च निरूप्य प्रसङ्गतस्तद्गतान् दोषान् विवक्षुः तेषाञ्च कदाचित् अदूषकत्वमाह नेति । यत्र धीमतां सामाजिकानाम् उद्वेगः प्रतीतिविघातः न भवति तादृशे भिन्ने पृथग्भूते लिङ्गवचने तथा हीनाधिकता हीनपदत्वम् अधिकपदत्वं वा उपमादोषाय न अलं न प्रभवन्तीत्यर्थः । दोषाश्च प्राचीनैरुक्ताः । यथा हीनाधिकत्वं वचनलिङ्गभेदो

स्त्रीव गच्छति षण्डोऽयं वक्त्येषा स्त्री पुमानिव।
प्राणा इव प्रियोऽयं मे विद्या धनमिवार्जिता॥५२॥

विपर्य्ययः। असादृश्यासम्भवौ च दोषाः सप्तोपमा गता इति। हीनाधिकता च उपमानस्य उपमेयापेक्षया इति बोध्यम्। लिङ्गवचनव्यत्यासे साधर्म्यस्य उभयान्वयाभावेन साम्यस्य सम्यगप्रतीतिः, हीनतायाम् उपमानस्य अपकृष्टत्वाव-बोधात् प्रस्तुतस्य उपमेयस्य अनुत्कर्षः, अधिकपदत्वे च उप-मेयस्य निकृष्टत्वप्रतीतिरेतदेव दोषकारणं, यत्र तु एतानि कारणानि न सन्ति तत्र एतेषां न दोषावहत्वमिति भावः। केचित् तु कालपुरुषविध्यादिभेदानपि उपमादोषानाहुः उदाहरन्ति च क्रमेण। यथा, काप्यभिख्या तयोरासीत् व्रजतोः शुद्धवेशयोः। हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव॥ अत्र चित्राचन्द्रमसोरभिख्याया न अतीतत्वम् अपितु सार्व-कालिकत्वम्। लतेव राजसे तन्वि! अत्र लतापक्षे राजते इति योज्यम्। चिरं जीवतु ते सूनुर्मार्कण्डेयमुनिर्यथा इति। अत्र मार्कण्डेयमुनिर्यथा जीवतीति प्रयोज्यम्। एते दोषाश्च प्रायशः कविभिरगणिता इति बोध्यम्॥ ५१॥

लिङ्गवचनभेदस्य अदूषकत्वं दर्शयति स्त्रीति। अयं षण्डः स्त्रीव गच्छति, एषा स्त्री पुमानिव वक्ति। अत्र क्रियाद्वयस्य साधारणधर्मस्य उभयत्रान्वयात् लिङ्गभेदेऽपि न दोषः। अयं जनः मे प्राणा इव प्रियः, तथा विद्या धनमिव अर्जिता। इत्येतयोरुपमानयोः वचनभेदेऽपि साधारणधर्मद्वयस्य वचन-विपरिणामेन अन्वये धीमतां न प्रतीतिव्याघात इति न दोषा-वसरः। एवमुभयत्र अन्वययोग्यक्रियया वचनभेदेऽपि न

भवानिव महीपाल ! देवराजो विराजते ।
अलमंशुमतः कक्षामारोढुं तेजसा नृपः ॥ ५३ ॥
इत्येवमादौ सौभाग्यं न जहात्येव जातुचित् ।
अस्त्येव क्वचिदुद्वेगः प्रयोगे वाग्विदां यथा ॥५४॥

दोषः । यथा, तद्वेशोऽसदृशोऽन्याभिः स्त्रीभिर्मधुरताभृतः । दधते स्म परां शोभां तदीया विभ्रमा इव ॥ अत्र दधते इति क्रियापदं धाधातोर्बहुवचननिष्पन्नं तथा दधधातोरेकवचन-निष्पन्नञ्चेति उभयत्रान्वये न कश्चिद् बाधः । एवमन्यान्यपि महाकविप्रयुक्तानि सन्तीति अवधेयम् ॥ ५२ ॥

हीनतायामधिकतायाञ्च दोषाभावं दर्शयति भवानिति । हे महीपाल ! देवराजः भवानिव विराजते । अत्र उपमानस्य राज्ञः मनुष्यत्वात् उपमेयदेवराजापेक्षया न्यूनत्वं स्वतः सिद्ध-मपि राज्ञः लोकपालांशसम्भूतया न अत्यन्तं वैरस्यम् आवह-तीति न दोषः, राज्ञश्च लोकपालांशसम्भूतत्वे प्रमाणं यथा अष्टानां लोकपालानां वपुर्धारयते नृप इति । इयन्तु विप-र्य्यासोपमालङ्कृतिः अस्याञ्च प्रायशः एवं दोषः सम्भवतीति बोध्यम् । अपिच, उत्सङ्गितकुरङ्गोऽयमृक्षमण्डलमध्यगः । विधु-र्व्याघ्र इवाभाति हन्तुं विरहदुर्बलान् ॥ इति । अत्र श्लिष्ट-विशेषणेन निकृष्टस्यापि व्याघ्रस्य उपमानत्वं न दोषायेति । नृपः तेजसा अंशुमतः सूर्य्यस्य कक्षां सादृश्यमिति यावत् आरोढुम् अलं समर्थः । अत्र नृपस्य उपमानम् अंशुमान् देव-त्वादधिक इति । एवमन्यत्रापि द्रष्टव्यम् ॥ ५३ ॥

इत्येवमादौ उत्कर्षे एवमादिप्रयोगे जातुचित् कदाचित् सौभाग्यम् न जहाति त्यजति एव, क्वचित् प्रयोगे तु वाग्-

हंसीव धवलश्चन्द्रः सरांसीवामलं नभः ।
भर्त्तृभक्तो भटः श्वेव खद्योतो भाति भानुवत् ॥५५॥
ईदृशं वर्ज्यते सद्भिः कारणं तत्र चिन्त्यताम् ।
गुणदोषविचाराय स्वयमेव मनीषिभिः ॥ ५६ ॥
इववत् वा यथाशब्दाः समाननिभसन्निभाः ।
तुल्यसङ्काशनीकाशप्रकाशप्रतिरूपकाः ॥ ५७ ॥
प्रतिपक्षप्रतिद्वन्द्विप्रत्यनीकविरोधिनः ।
सदृक्सदृशसंवादिसजातीयानुवादिनः ॥ ५८ ॥

विदां विदुषाम् उद्वेगः प्रतीतिव्याघातः अस्ति । यथेति उदाहरणार्थम् ॥ ५४ ॥

उदाहरति हंसीवेति । चन्द्रः हंसीव धवलः, नभः सरांसीव अमलं, भटः सैनिकः श्वा इव भर्त्तृभक्तः, स्वाम्यनुरक्तः तथा खद्योतः भानुवत् भाति । अत्र यथाक्रमम् उपमानानां लिङ्गभेदः वचनभेदः न्यूनत्वम् अधिकत्वञ्च सामाजिकानां वैरस्यमावहतीति एतेषां दूषकत्वं नैयायिकमिति भावः ॥५५॥

उपसंहरति ईदृशमिति । सद्भिः सुधीभिः ईदृशं काव्यं वर्ज्यते त्यज्यते न प्रयुज्यते नाद्रियते च इति भावः । मनीषिभिः सहृदयैः स्वयमेव तत्र वर्जने गुणदोषविचाराय चिन्त्यताम् ॥ ५६ ॥

उपमाप्रतीतिरभिधया लक्षणया व्यञ्जनया च भवतीति तस्या वाचकादीनि निरूपयति इवेत्यादि । इवाद्युपमान्ताः शब्दाः वाचकाः, वदिति, कल्पदेश्यदेशीया इति च तद्धितप्रत्ययाश्च वाचकेषु अन्तर्भवन्ति । वा इत्यस्योपलक्षणत्वात् च-

प्रतिबिम्बप्रतिच्छन्दसरूपसमसम्मिताः ।
सलक्षणसदृक्षाभसपक्षोपमितोपमाः ॥ ५९ ॥
कल्पदेशीयदेश्यादिप्रख्यप्रतिनिधी अपि ।
सवर्णतुलितौ शब्दौ ये चान्यूनार्थवादिनः ॥ ६० ॥
समासश्च बहुव्रीहिः शशाङ्कवदनादिषु ।
स्पर्द्धते जयति द्वेष्टि द्रुह्यति प्रतिगर्जति ॥ ६१ ॥
आक्रोशत्यवजानाति कदर्थयति निन्दति ।
विडम्बयति सन्धत्ते हसतीर्ष्यत्यसूयति ॥ ६२ ॥
तस्य मुष्णाति सौभाग्यं तस्य कान्तिं विलुम्पति ।
तेन सार्द्धं विगृह्णाति तुलां तेनाधिरोहति ॥६३॥
तत्पदव्यां पदं धत्ते तस्य कक्षां विगाहते ।
तमन्वेत्यनुबध्नाति तच्छीलं तन्निषेधति ॥ ६४ ॥
तस्य चानुकरोतीति शब्दाः सादृश्यसूचकाः ।
उपमायामिमे प्रोक्ताः कवीनां बुद्धिसौख्यदाः ॥६५॥

इत्युपमाचक्रम् ।

शब्दोऽपि तस्यापि औपम्यवाचित्वात् । निभादयः शब्दाः समासान्तर्गता एव निर्दिश्यन्ते । अन्यूनार्थवादिनः अहीनार्थवाचकाः । समासश्च बहुव्रीहिः, कर्मधारयश्चेति वक्तव्यम्, यथा, पुरुषव्याघ्र इत्यादि । शशाङ्क इव वदनं यस्या इति बहुव्रीहौ मध्यपदलोपः । स्पर्द्धते इत्याद्यसूयतीत्यन्ताः शब्दाः लक्षकाः तस्या मुष्णातीत्यादिनिषेधतीत्यन्ताः व्यञ्जकाः ।

उपमैव तिरोभूतभेदा रूपकमुच्यते ।
यथा बाहुलता पाणिपद्मं चरणपल्लवः ॥ ६६ ॥

तच्छीलमिति, तस्य शीलं स्वभावमित्यर्थः अनुबध्नाति अनुकरोति इत्यर्थः । तत् तच्छीलमित्यर्थः निषेधति तद्वत् आचरितुं वारयति इत्यर्थः । इमे कवीनां बुद्धिसौख्यदा मनःसौख्यविधायिनः साद्दृश्यसूचकाः साद्दृश्यबोधकाः शब्दाः उपमायां प्रोक्ताः निर्दिष्टाः औपम्यद्योतनाय प्रयुज्यन्ते इत्यर्थः ॥५७—६५॥

इति उक्तरूपम् उपमायाश्चक्रं प्रकरणमित्यर्थः ।

सम्प्रति रूपकं निरूप्यते उपमेति । तिरोभूतः अन्तर्भूतः भेदः प्रकृताप्रकृतयोः विशेषज्ञानं यत्र तादृशी उपमा एव रूपकम् उच्यते कविभिः इति शेषः । तथाच उपमानोपमेययोः अभेदप्रतीतिपूर्वकसाम्यं रूपकमिति लक्षणम् उपमायान्तु अभेदप्रतीतिर्नास्तीत्यनयोर्भेदः । इह तु अभेदप्रतीतिः साध्यरूपा, अतिशयोक्तौ च सिद्धरूपेति अनयोर्भेदश्च बोद्धव्यः । यथा, बाहुलतेत्यादि बाहुरेव लता बाहुलता, पाणिरेव पद्मं पाणिपद्मं, चरण एव पल्लवः चरणपल्लवः । अत्र रूपककर्मधारयः व्यासे यथा, बाहुरेव लतेत्यादि । अत्र बाहौ लतात्वारोपः बाहुर्लता इवेत्याद्युपमापेक्षया समधिकं वैचित्र्यम् आवहति इति बोध्यम् । मुखचन्द्रं पश्यामीत्यादौ मुखं चन्द्र इव इत्युपमितसमासस्य तथा मुखमेव चन्द्र इति रूपकसमासस्यापि सम्भवात् उभयोः सङ्कर इति । यत्र तु साधर्म्यं उपमेये मुख्यतया, उपमाने तु उपचरितत्वेन स्थितं तत्र उपमायाः प्राधान्यं यत्र च उपमाने मुख्यतया, उपमेये च उपचारेण स्थितं तत्र रूपकस्य प्राधान्यं यथा, मुखचन्द्रं चुम्बतीत्यादौ

अङ्गुल्यः पल्लवान्यासन् कुसुमानि नखार्चिषः ।
बाहू लते वसन्तश्रीस्त्वं नः प्रत्यक्षचारिणी ॥६७॥
इत्येतदसमस्ताख्यं समस्तं पूर्वरूपकम् ।
स्मितं मुखेन्दोर्ज्योत्स्नेति समस्तव्यस्तरूपकम् ॥६८॥
ताम्राङ्गुलिदलश्रेणि नखदीधितिकेसरम् ।

उपमा एव तथा मुखचन्द्रः प्रकाशते इत्यादौ रूपकमेव न तु उभयोः सङ्कर इति बोध्यम् ॥ ६६ ॥

व्यस्तरूपकस्य उदाहरणमाह अङ्गुल्य इति। त्वं नः अस्माकं प्रत्यक्षचारिणी परिदृश्यमाना वसन्तश्रीः। तथाहि, ते अङ्गुल्यः पल्लवानि, नखार्चिषः कुसुमानि, बाहू लते। अत्र लिङ्गभेदप्रदर्शनेन। रूपके लिङ्गभेदो न दोषावह इति सूच्यते। कदाचित् वचनभेदोऽपि न दोषाय। यथा, शास्त्राणि चक्षुर्नवमित्यादि। अत्र शास्त्राणि इत्यनेन सर्वशास्त्रज्ञानस्य लाभात् ज्ञानस्य च एकजातीयत्वात् बहुवचनान्तमपि एकवचनान्तवत् भासते। अनीदृशस्थाने तु दोषाय। यथा, मुखं पद्मानीत्यादि ॥ ६७ ॥

इतीति। इति पूर्वोक्तमेतत् अङ्गुल्य इत्यादि असमस्ताख्यम् असमस्तरूपकम् इत्यर्थः, तत्पूर्वरूपकन्तु बाहू लतेत्यादि समस्तरूपकम्। स्मितं मृदुहास्यं मुखेन्दोः मुखमेव इन्दुः तस्य ज्योत्स्ना इति। समस्तव्यस्तरूपकम् उभयमिश्ररूपकम् इत्यर्थः। तथाच, स्मितं ज्योत्स्ना इति व्यस्तं मुखेन्दोरिति समस्तम् ॥ ६८ ॥

सकलरूपकं निरूपयति ताम्रेति। ताम्राङ्गुलय एव दलश्रेणयः यस्य, तथा नखानां दीधितयः किरणा एव केसरा यस्य

ध्रियते मूर्ध्नि भूपालैर्भवच्चरणपङ्कजम् ॥ ६९ ॥

अङ्गुल्यादौ दलादित्वं पादे चारोप्य पद्मताम् ।
तद्योग्यस्थानविन्यासादेतत् सकलरूपकम् ॥७०॥

अकस्मादेव ते चण्डि ! स्फुरिताधरपल्लवम् ।
मुखं मुक्तारुचो धत्ते घर्माम्भःकणमञ्जरीः ॥ ७१ ॥

तादृशं भवच्चरण एव पङ्कजं तत् भूपालैः मूर्ध्नि ध्रियते । अ
अङ्गुल्यादौ दलादित्वं दलश्रेणित्वं तथा पादे चरणे पद्म
पङ्कजत्वम् आरोप्य तस्य पङ्कजस्य योग्ये स्थाने शिरसि इत्य
विन्यासात् धारणात् एतत् सकलरूपकं सम्पूर्णरूपकं सव
वयवस्य रूपणात् । अत्र मूर्ध्नि धारणरूपस्य साधारणधर्म
उपमाने पङ्कज एव औचित्यात् रूपकसमासः न तु उपमित
समासः उपमेयस्य चरणस्य मूर्ध्नि धारणायोग्यत्वात् इत्युक्त
प्राक् । दर्पणकारस्तु इदं साङ्गरूपकमाह । यथा, अङ्गि
यदि साङ्गस्य रूपणं साङ्गमेव तत् । यथा, रावणावग्रहक्ला
मिति वागमृतेन सः । अभिवृष्य मरुच्छस्यं कृष्णमेघस्तिरोद
इति ॥ ६९ ॥ ७० ॥

अवयवरूपकं निरूपयति अकस्मादित्यादि । हे चण्डि
अतिकोपने ! चण्डस्त्वत्यन्तकोपन इत्यमरः । ते तव मुख
अकस्मादेव स्फुरितः कम्पितः अधर एव पल्लवः यत्र तादृशं
मुक्तानां रुच इव रुचः कान्तयो यासां तादृशीः घर्माम्भ
कणा एव मञ्जर्यः ताः धत्ते धारयति । अत्र घर्माम्भः मञ्ज
कृत्य मञ्जरीत्वेन आरोप्य तथा अधरं पल्लवीकृत्य पल्लवत्वं
आरोप्य आस्यं मुखं न अन्यथाकृतं पद्मत्वेन न आरोपितं
अतः अवयवमात्ररूपणात् अवयवरूपकम् । मुखे पद्मत्वा

मञ्जरीकृत्य घर्माम्भः पल्लवीकृत्य चाधरम्।
नान्यथाकृतमत्रास्यमतोऽवयवरूपकम् ॥७२॥

वल्गितभ्रु गलद्घर्मं जलमालोहितेक्षणम्।
विवृणोति मदावस्थामिदं वदनपङ्कजम् ॥ ७३ ॥

अविकृत्य मुखाङ्गानि मुखमेवारविन्दताम्।
आसीत् गमितमत्रेदमतोऽवयविरूपकम् ॥ ७४ ॥

मदपाटलगण्डेन रक्तनेत्रोत्पलेन ते।
मुखेन मुग्धः सोऽप्येष जनो रागमयः कृतः ॥७५॥

यस्तु अर्थवशात् उन्नेयः। दर्पणकारस्तु इदमेकदेशविवर्त्ति-रूपकमाह। यथा, यत्र कस्यचिदार्थत्वमेकदेशविवर्त्ति तत् इति ॥ ७१ ॥ ७२ ॥

अवयविरूपकं निरूपयति वल्गितेति। वल्गिते भ्रुवौ यत्र तत् चलितभ्रूयुगलं गलन्ति घर्मजलानि यस्मात् तादृशं तथा आलोहिते आरक्ते ईक्षणे यस्य तथाभूतम् इदं वदनमेव पङ्कजं मदावस्थां मद्यपानजनितां दशां विवृणोति। अत्र मुखानि अविकृत्य पङ्कजाङ्गत्वेन अनारोप्य मुखमेव अरविन्दतां गमितं पङ्कजत्वेन आरोपितम्, अतः अवयविमात्रस्य रूपणात् अवयविरूपकमिदम्। अत्र उपमा एव साधीयसी न रूपकं साधारणधर्मस्य भ्रूवल्गनादिकस्य उपमेये वदने एव मुख्यतया वर्त्तनात् पङ्कजे च उपचरितत्वात् अतः वदनमम्बुजम् इति पाठ एव साधीयानिति सुधीभिः विचार्य्यम्। दर्पणकारस्तु इदं निरङ्गरूपकमाह ॥ ७३ ॥ ७४ ॥

अवयवरूपकस्य विशेषान् दर्शयति मदेत्यादि। स एष

एकाङ्गरूपकञ्चैतदेवं द्विप्रभृतीन्यपि ।
अङ्गानि रूपयन्त्यत्र योगायोगौ भिदाकरौ ॥ ७६ ॥
स्मितपुष्पोज्ज्वलं लोलनेत्रभृङ्गमिदं मुखम् ।
इति पुष्पद्विरेफाणां सङ्गत्या युक्तरूपकम् ॥ ७७ ॥
इदमार्द्रस्मितज्योत्स्नं स्निग्धनेत्रोत्पलं मुखम् ।
इति ज्योत्स्नोत्पलायोगादयुक्तं नाम रूपकम् ॥ ७८ ॥

जनोऽपि ते तव मदेन पाटलौ गण्डौ यस्य तेन तथा रक्ते नेत्रे एव उत्पले यस्य तादृशेन मुखेन मुग्धः तथा रागमयः अनुरागपूर्ण इत्यर्थः कृत इत्यन्वयः । अत्र रक्तनेत्रोत्पलेनेति एकाङ्गमात्ररूपणात् एकाङ्गरूपकमिदम् । एवं यत्र अङ्गद्वयेन रूपणं तत्र द्व्यङ्गरूपकम् । एवं त्र्यङ्गरूपकादि । अत्र अवयवरूपके अङ्गानि रूपयन्ति अप्रस्तुतत्वेन आरोपयन्ति न तु अङ्गिनम् इति शेषः, अतः अङ्गस्य अङ्गयोः अङ्गानां वा योगः अयोगश्च भिदाकरौ भेदकौ ॥ ७५ ॥ ७६ ॥

अथ युक्तरूपकं निरूपयति स्मितेति । स्मितमेव पुष्पं स्मितपुष्पं तेन उज्ज्वलं लोले नेत्रे एव भृङ्गौ यत्र तादृशम् इदं मुखमित्यत्र पुष्पद्विरेफाणां सङ्गत्या योगेन स्मिते पुष्पत्वस्य नेत्रे भ्रमरस्य समारोपेणेत्यर्थः युक्तरूपकमिदम् ॥७७॥

अयुक्तरूपकमाह इदमिति । आर्द्रं स्मितमेव ज्योत्स्ना यत्र तत् तथा स्निग्धे नेत्रे एव उत्पले पद्मे यत्र तादृशं मुखम् इत्यत्र ज्योत्स्नोत्पलायोगात् ज्योत्स्नया उत्पलस्य अयोगात् भिन्नकालीनत्वादुभयोरिति भावः, अयुक्तं नाम रूपकम् ॥ ७८ ॥

रूपणादङ्गिनोऽङ्गानां रूपणारूपणाश्रयात् ।
रूपकं विषमं नाम ललितं जायते यथा ॥७९॥

मदरक्तकपोलेन मन्मथस्त्वन्मुखेन्दुना ।
नर्त्तितभ्रूलतेनालं मर्दितुं भुवनत्रयम् ॥ ८० ॥

हरिपादः शिरोलग्नजह्नुकन्याजलांशुकः ।
जयत्यसुरनिःशङ्कसुरानन्दोत्सवध्वजः ॥ ८१ ॥

विशेषणसमग्रस्य रूपं केतोर्यदीदृशम् ।
पादे तदर्पणादेतत् सविशेषणरूपकम् ॥ ८२ ॥

विषमरूपकमुदाहरति रूपणादिति। अङ्गिनः रूपणात् तथा अङ्गानां तदवयवानां रूपणारूपणात् कस्यचिदङ्गस्य रूपणात् कस्यचित् वा अरूपणात् ललितं सुन्दरं वैचित्र्यजनकमित्यर्थः विषमं नाम रूपणं जायते, यथा मदेन रक्तौ कपोलौ यस्य तेन तथा नर्त्तिते भ्रुवौ एव लते यत्र तादृशेन त्वन्मुखमेव इन्दुस्तेन मन्मथः भुवनत्रयं मर्दितुं जेतुम् अलं समर्थः। अङ्गिनि मुखे इन्दुत्वारोपः तथा तदङ्गीभूतयोर्भ्रुवोः लतात्वारोपः कपोलयोस्तु नारोप इति वैषम्यम् ॥ ७९ ॥ ८० ॥

सविशेषणरूपकं निर्दिशति हरीति। शिरसि अग्रभागे लग्नं जह्नुकन्याया गङ्गाया जलमेव अंशुकं श्वेतवसनाञ्चलं यस्य सः तथा असुरेभ्यः निःशङ्का ये सुराः देवाः बलिदमनात् इति भावः तेषामानन्दोत्सवस्य ध्वजः हरिपादः वामनचरणः जयति। विशेषणसमग्रस्य सविशेषणस्य केतोर्ध्वजस्य यत् ईदृशम् उक्तरूपं रूपं, पादे चरणे तस्य अर्पणात् आरोपात् सविशेषणरूपकमिदम् ॥ ८१ ॥ ८२ ॥

न मीलयति पद्मानि न नभोऽप्यवगाहते ।
त्वन्मुखेन्दुर्ममासूनां हरणायैव कल्पते ॥८३॥
अक्रिया चन्द्रकार्य्याणामन्यकार्य्यस्य च क्रिया ।
अत्र सन्दर्श्यते यस्माद् विरुद्धं नाम रूपकम्॥८४॥
गाम्भीर्य्येण समुद्रोऽसि गौरवेणासि पर्वतः ।
कामदत्वाच्च लोकानामसि त्वं कल्पपादपः॥८५॥
गाम्भीर्य्यप्रमुखैरत्र हेतुभिः सागरो गिरिः ।
कल्पद्रुमश्च क्रियते तदिदं हेतुरूपकम् ॥ ८६ ॥

विरुद्धरूपकं निरूपयति नेत्यादि। तव मुखमेव इन्दुः पद्मानि न मीलयति न सङ्कोचयति अप्रकाशादिति भावः, नभश्च आकाशञ्च न अवगाहते न उत्तिष्ठति अवनतत्वात् इति भावः। केवलं मम असूनां प्राणानां हरणाय एव कल्पते यतते। मानिनीं प्रत्युक्तिरियम्। अत्र चन्द्रस्य आरोप्यमाणस्य कार्य्याणां पद्मनिमीलनादीनामक्रिया अननुष्ठानं प्रत्युत अन्यस्य यमस्य कार्य्यस्य प्राणहरणरूपस्य क्रिया यस्मात् सन्दर्श्यते तस्मात् इदं विरुद्धं नाम रूपकम् उपमेयस्य मुखस्य उपमानाभिन्नतया उपमानकार्य्यकारित्वस्य एवौचित्यात् तदन्यकार्य्यकरणाच्च विरोधावभास इति बोध्यम् ॥ ८३ ॥ ८४ ॥

हेतुरूपकं निरूपयति गाम्भीर्य्येणेत्यादि। गाम्भीर्य्येण दुरवगाह्याशयत्वेन समुद्रः असि, गौरवेण सारवत्तया पर्वतः असि, तथा लोकानां कामदत्वात् कल्पपादपः असि, सर्वत्र हेतौ तृतीया। अत्र गाम्भीर्य्यप्रमुखैः हेतुभिः उपमेये सागरः

राजहंसोपभोगार्हं भ्रमरप्रार्थ्यसौरभम्।
सखि! वक्त्राम्बुजमिदं तवेति श्लिष्टरूपकम् ॥८७॥
इष्टं साधर्म्यवैधर्म्यदर्शनाद् गौणमुख्ययोः।
उपमाव्यतिरेकाख्यं रूपकद्वितयं यथा ॥ ८८ ॥
अयमालोहितच्छायो मदेन मुखचन्द्रमाः।
सन्नद्धोदयरागस्य चन्द्रस्य प्रतिगर्जति ॥ ८९ ॥

गिरिः तथा कल्पद्रुमः क्रियते आरोप्यते तत् तस्मात् हेतु-निबन्धनारोपणात् हेतुरूपकमिदम् ॥ ८५ ॥ ८६ ॥

श्लिष्टरूपकं निरूपयति राजेति। हे सखि! तव इदं वक्त्रमेव अम्बुजं राजहंसः राजश्रेष्ठः हंसविशेषश्च तस्य उपभोगार्हं सम्भोगयोग्यं भ्रमरः कामुकः षट्पदश्च तस्य प्रार्थ्यं स्पृहणीयं सौरभं यस्य तादृशं, राजहंसस्तु कादम्बे कलहंसे नृपोत्तमे। भ्रमरः कामुके भृङ्गे इति च मेदिनी। इत्यत्र श्लिष्ट-रूपकं साधारणधर्मस्य राजहंसोपभोगार्हत्वादिरूपस्य श्लेष-मूलकत्वात् इति ॥ ८७ ॥

उपमारूपकं व्यतिरेकरूपकञ्च निरूपयति इष्टमिति। गुणयोगात् आरोप्यमाणः चन्द्रादिर्गौणः आरोपविषयः मुखादिश्च मुख्यः तयोः साधर्म्यदर्शनात् साधारणधर्मयोगात् उपमा-रूपकं वैधर्म्ययोगात् व्यतिरेकरूपकम् इष्टं कविभिः इति शेषः। यथेति उदाहरणार्थम् ॥ ८८ ॥

उपमारूपकमुदाहरति अयमिति। मदेन मद्यपानेन आलोहिता आरक्ता छाया यस्य तादृशः अयं मुखमेव चन्द्रमाः सन्नद्धः समुज्ज्वलः उदयरागः उदयकालीनलौहित्यं यस्य तथा-

चन्द्रमाः पीयते देवैर्मया त्वन्मुखचन्द्रमाः ।
असमग्रोऽप्यसौ शश्वदयमापूर्णमण्डलः ॥ ९० ॥
मुखचन्द्रस्य चन्द्रत्वमित्थमन्योपतापिनः ।
न ते सुन्दरि ! संवादीत्येतदाक्षेपरूपकम् ॥९१॥
मुखेन्दुरपि ते चण्डि ! मां निर्दहति निर्दयम् ।

भूतस्य चन्द्रस्य प्रतिगर्जति, चन्द्रस्येति कर्मणि षष्ठी । तथा-भूतं चन्द्रं स्पर्द्धते न तु अनुकरोतीत्यर्थः । अत्र चन्द्राभिन्नतया आरोपविषयस्य मुखस्य औपम्यसूचकप्रतिगर्जनरूपसाधर्म्य-सम्बन्धात् उपमारूपकमिदम् ॥ ८९ ॥

व्यतिरेकरूपकमुदाहरति चन्द्रमा इति । देवैः असमग्रो-ऽपि असौ चन्द्रमाः शश्वत् पीयते, मया तु आपूर्णमण्डलः सम्पूर्णप्रकाशः अयं तव मुखमेव चन्द्रमाः पीयते । अत्र मुख्य-गौणयोर्मुखचन्द्रयोः सम्पूर्णत्वासम्पूर्णत्वरूपवैधर्म्ययोगात् व्यति-रेकरूपकमिदम् । अयञ्च व्यतिरेकः उपमेयस्य उपमानात् समधिकमुत्कर्षं व्यञ्जयति ॥ ९० ॥

आक्षेपरूपकं निरूपयति मुखेति । हे सुन्दरि ! अन्योप-तापिनः कमलसन्तापकस्य अथवा विरहिजनपीड़कस्य चन्द्रस्य इति शेषः, चन्द्रत्वं ते तव मुखमेव चन्द्रः तस्य न संवादि नानु-कारकं न सदृशमित्यर्थः । चन्द्रः परोपतापकरः त्वन्मुखन्तु सर्वाह्लादकमिति भावः । एतत् आक्षेपो निन्दा, चन्द्रस्य उपमानभूतस्य परपीड़कत्वेन निन्दाप्रकटनात् आक्षेपाख्यं रूपकम् ॥ ९१ ॥

समाधानरूपकं निर्दिशति मुखेन्दुरिति । हे चण्डि !

भाग्यदोषात् ममैवेति तत्समाधानरूपकम् ॥९२॥
मुखपङ्कजरङ्गेऽस्मिन् भ्रूलतानर्त्तकी तव ।
लीलानृत्यं करोतीति रम्यं रूपकरूपकम् ॥९३॥
नैतन्मुखमिदं पद्मं न नेत्रे भ्रमराविमौ ।
एतानि केसराण्येव नैता दन्तार्च्चिषस्तव ॥९४॥
मुखादित्वं निवर्त्त्यैव पद्मादित्वेन रूपणात् ।
उद्भावितगुणोत्कर्षं तत्त्वापह्नवरूपकम् ॥ ९५ ॥

कोपने ! ममैव भाग्यदोषात् ते मुखमेव इन्दुरपि मां निर्दयं निर्दहति तापयति। इति अत्र समाधानात् भाग्यदोषान्ममेति स्वयं हेतुवादप्रदर्शनात् एतत् समाधानरूपकम् ॥ ९२ ॥

रूपकरूपकं लक्षयति मुखेति। अस्मिन् तव मुखमेव पङ्कजं तदेव रङ्गः नृत्यशाला तस्मिन् भ्रूरेव लता सा एव नर्त्तकी लीलानृत्यं करोति एतत् रम्यम् अतिमनोहरं रूपकरूपकं रूपितस्यापि रूपणात्, तथाच प्रथमं मुखे पङ्कजत्वारोपः तदनन्तरञ्च मुखपङ्कजे रङ्गत्वारोपः एवं भ्रुवि लतात्वारोपः तदनन्तरं लतायां नर्त्तकीत्वारोप इति। इदञ्च समासे एव बोध्यम्, असमासे तु एकस्मिन् बहूनामारोपे हेतुमति हेतुरूपकम् अहेतुके मालावयविरूपकमिति ॥ ९३ ॥

तत्त्वापह्नवरूपकं निरूपयति नेत्यादि। एतत् तव मुखं न पद्मं, न नेत्रे इमौ भ्रमरौ, एतानि केसराणि किञ्जल्काः, एता दन्तार्च्चिषः न। अत्र मुखादित्वं मुखत्वादिकं निवर्त्त्य प्रतिषिध्य एव पद्मादित्वेन पद्मत्वादित्वेन रूपणात् मुखादिषु पद्मत्वादिभिरध्यासात् एतत् उद्भावितः व्यञ्जितः गुणस्य उप-

न पर्य्यन्तो विकल्पानां रूपकोपमयोरतः ।
दिङ्मात्रं दर्शितं धीरैरनुक्तमनुमीयताम् ॥ ९६ ॥

रूपकचक्रम् ।

जातिक्रियागुणद्रव्यवाचिनैकत्र वर्त्तिना ।
सर्व्ववाक्योपचारश्चेत् तमाहुर्दीपकं यथा ॥ ९७ ॥

मियगतस्य उत्कर्षः वैचित्र्यातिशयः यत्र तत् तत्त्वापह्नवरूपकं तत्त्वस्य याथार्थ्यस्य मुखत्वादिकस्य अपह्नवमूलकत्वादित्यर्थः। दर्पणकारस्तु इदमपह्नुतिमिवाह। यथा प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिरिति। रूपकलक्षणाच्च निरपह्नुतिरेवाह। यथा, रूपकं रूपितारोपो विषये निरपह्नवे इति ॥ ९४ ॥ ९५ ॥

रूपकं संहरति नेति। रूपकस्य उपमायाश्च विकल्पानां विशेषाणां पर्य्यन्तः शेषः न अस्तीति शेषः, अतः दिङ्मात्रं प्रदर्शनमात्रं दर्शितं मया इति शेषः, अनुक्तम् अकथितं धीरैः धीमद्भिः अनुमीयताम् अनुमानेन ज्ञायताम् ॥ ९६ ॥

रूपकाणां चक्रं संहतिः इदमिति शेषः ।

अथ दीपकमाह जातीति। एकत्र प्रबन्धस्य यस्मिन् कस्मिंश्चित् अंशे आदावन्ते मध्ये वा इत्यर्थः। वर्त्तिना स्थितेन जातिवाचकेन क्रियावाचकेन गुणवाचकेन वा द्रव्यवाचकेन एकेन पदेन यदि सर्व्वस्य वाक्यस्य प्रबन्धघटकस्य उपचारः उपकारः अन्वयोपपत्तिरित्यर्थः। यदि भवति तं दीपकम् आहुः दीपस्य एकदेशस्थितस्य अपि देशान्तरीयपदार्थप्रकाशनवत् अस्य सर्व्वोपकारकपदमूलकत्वात् इति भावः। दर्पणकारस्तु अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते। अथ कारकमेकं स्यादनेकासु क्रियासु चेति लक्षणमाह ॥ ९७ ॥

पवनो दक्षिण: पर्णं जीर्णं हरति वीरुधाम् ।
स एवावनताङ्गीनां मानभङ्गाय कल्पते ॥९८॥
चरन्ति चतुरम्भोधिवेलोद्यानेषु दन्तिन: ।
चक्रवाकाद्रिकुञ्जेषु कुन्दभासो गुणाश्च ते ॥९९॥
श्यामला: प्रावृषेण्याभिर्दिशो जीमूतपङ्क्तिभि: ।
भुवश्च सुकुमाराभिर्नवशाद्वलराजिभि: ॥१००॥

तत्र जातिगतदीपकमुदाहरति पवन इति। दक्षिण: पवन: वीरुधां लतानां जीर्णं पर्णं पत्रं हरति। स एव पवन: अवनताङ्गीनां मानभङ्गाय कल्पते प्रभवति तस्य अतीवोद्दीपकत्वात् इति भाव:। अत्र पूर्वार्द्धवाक्ये पवन इति जातिवाचकं पदम् उत्तरार्द्धवाक्ये च स एवेति तच्छब्दपरामर्शात् पवन एव अवगम्यते अत: एकेन पवनेन पद्यस्थसर्वपादैरेव समन्वयात् जातिगतं दीपकमिदम् ॥ ९८ ॥

क्रियादीपकमाह चरन्तीति। दन्तिन: दिग्गजा: ते तव कुन्दभास: शुभ्रा: गुणाश्च चतुरम्भोधिवेलोद्यानेषु तथा चक्रवाकाद्रिकुञ्जेषु चरन्ति, तव यशांसि विश्वव्यापकानीति भाव:। अत्र एकेन चरन्तीति क्रियापदेन चकारबलयोगात् उभयार्द्धयो: वाक्यान्वयोपपत्ते: क्रियादीपकमिदम् ॥ ९९ ॥

गुणदीपकमाह श्यामला इति। दिश: प्रावृषेण्याभि: वार्षिकीभि: जीमूतपङ्क्तिभि: मेघराजिभि: भुवश्च सुकुमाराभि: कोमलाभि: नवशाद्वलराजिभि: श्यामला:। अत्र श्यामला इति गुणवाचकेन दिश इति पदस्य तथा चकारबलयोगात् भुव इति पदस्य समन्वयात् गुणदीपकमिदम् ॥१००

विष्णुना विक्रमस्थेन दानवानां विभूतयः ।
क्वापि नीताः कुतोऽप्यासन्नानीता दैवतर्द्धयः ॥१०१॥

इत्यादिदीपकान्युक्तान्येवं मध्यान्तयोरपि ।
वाक्ययोर्दर्शयिष्यामः कानिचित्तानि तद्यथा ॥१०२॥

नृत्यन्ति निचुलोत्सङ्गे गायन्ति च कलापिनः ।
बध्नन्ति च पयोदेषु दृशो हर्षाश्रुगर्भिणीः ॥१०३॥

द्रव्यदीपकमाह विष्णुनेति। विक्रमस्थेन त्रिविक्रमेण विष्णुना दानवानां बलिप्रभृतीनां विभूतयः क्वापि नीताः, तथा दैवतानाम् इन्द्रादीनाम् ऋद्धयः कुतोऽपि आनीता आसन्निति। अत्र विष्णुनेति एकव्यक्तिवाचितया द्रव्येण पूर्ववाक्ये अन्वितेऽपि पुनरुत्तरवाक्येन अन्वयात् द्रव्यरूपकमिदम् ॥ १०१ ॥

इत्थमादिदीपकान्युक्त्वा मध्यान्तयोरपि दीपकानि वक्तुं प्रतिजानीते इतीति। इति उक्तप्रकारेण आदिदीपकानि आदिपदगतानि जात्यादिदीपकानि उक्तानि, एवं आदिदीपकवत् मध्यान्तयोरपि वाक्ययोः कानिचित् तानि दीपकानि दर्शयिष्यामः यथेति वक्ष्यमाणोदाहरणार्थम् ॥ १०२ ॥

जातिगतमध्यदीपकमाह नृत्यन्तीति। कलापिनः मयूराः निचुलस्य स्थलवेतसस्य उत्सङ्गे अधोभागे नृत्यन्ति, गायन्ति केकाध्वनिं कुर्वन्ति तथा पयोदेषु मेघेषु हर्षाश्रुगर्भिणीः आनन्दवाष्पवाहिनीः दृशः चक्षूंषि बध्नन्ति। अत्र मध्यवाक्यगतेन कलापिन इति पदेन चकारबलात् वाक्यान्तरान्वयात् कलापिन इत्यस्य जातिवाचकत्वाच्च जातिगतमध्यदीपकमिदम् ॥ १०३ ॥

मन्दो गन्धवहः चारो वह्निरिन्दुश्च जायते ।
चर्च्चाचन्दनपातश्च शस्त्रपातः प्रवासिनाम् ॥१०४॥
जलं जलधरोद्गीर्णं कुलं गृहशिखण्डिनाम् ।
चलञ्च तड़ितां दाम बलं कुसुमधन्वनः ॥१०५॥
त्वया नीलोत्पलं कर्णे स्मरेणास्त्रं शरासने ।
मयापि मरणे चेतस्त्रयमेतत् समं कृतम् ॥ १०६ ॥

क्रियागतमध्यदीपकमाह मन्द इति । मन्दः मृदुः गन्धवहः वायुः चारः तीक्ष्णः असह्य इत्यर्थः, इन्दुश्च वह्निः अग्निः चर्चा शैत्यक्रिया, तद्रूपः चन्दनपातः चन्दनानुलेपनञ्च शस्त्रपातः जायते, प्रवासिनां विरहिणामिति सर्वत्र योज्यम् । अत्र मध्यवाक्यगतेन जायते इति क्रियापदेन सर्ववाक्यान्वयात् क्रियागतमध्यदीपकमिदम् । गुणद्रव्यगते मध्यदीपके यथायथमूहनीये इति ॥ १०४ ॥

जातिगतमन्तदीपकमाह जलमिति । जलधरोद्गीर्णं जलं वृष्टिरित्यर्थः, गृहशिखण्डिनां गृहमयूराणां कुलं तथा चलं चञ्चलं तड़ितां दाम एतत् त्रयं कुसुमधन्वनः कामस्य बलं सैन्यम् उद्दीपकत्वात् एतेषाम् इति भावः । अत्र बलमिति जातिवाचकेन अन्तवाक्यस्थेन पदेन सर्ववाक्यसमन्वयात् जातिगतान्तदीपकमिदम् ॥ १०५ ॥

क्रियागतान्तदीपकमाह त्वयेति । त्वया कर्णे नीलोत्पलं स्मरेण कामेन शरासने अस्त्रं, मयापि मरणे चेतः चित्तम् एतत् त्रयं समं युगपत् कृतम् । मानिनीं प्रति नायकस्य उक्तिरियम् । अन्तवाक्यस्थेन कृतमिति क्रियापदेन सर्ववाक्यसम-

शुक्लः श्वेतार्चिषो वृद्धै पक्षः पञ्चशरस्य सः ।
स च रागस्य रागोऽपि यूनां रत्युत्सवश्रियः १०७

इत्यादिदीपकत्वेऽपि पूर्वपूर्वव्यपेक्षिणी ।
वाक्यमाला प्रयुक्तेति तन्मालादीपकं मतम्॥१०८

अवलेपमनङ्गस्य वर्द्धयन्ति बलाहकाः ।
कर्शयन्ति तु घर्मस्य मारुतोद्धूतशीकराः ॥१०९॥

न्वयात् क्रियागतान्तदीपकमिदम्। गुणद्रव्यगते अन्तदीपके तु स्वयमूहनीये ॥ १०६ ॥

अथ मालादीपकमाह शुक्ल इत्यादि। शुक्लः पक्षः श्वेतार्चिषः श्वेतकिरणस्य चन्द्रस्य वृद्ध्यै भवति, सः पक्षः पञ्चशरस्य कामस्य वृद्धै, स च कामः रागस्य अनुरागस्य वृद्धै रागोऽपि यूनां तरुणानां रत्युत्सवे श्रियः वृद्धै। इति अत्र आदिदीपकत्वेऽपि आदिवाक्यस्थेन शुक्लः पक्षः इति जातिगुणवाचकेन सर्ववाक्यान्वयेऽपीत्यर्थः पूर्वपूर्वव्यपेक्षिणी पूर्वपूर्ववाक्यमपेक्षमाणा वाक्यमाला वाक्यसमूहः प्रयुक्ता इति वैचित्र्यातिशयात् इति भावः मालादीपकं मतम्। तथाच उक्तदीपकस्य पूर्वपूर्वसापेक्षोत्तरोत्तरवाक्यगतत्वं मालादीपकमिति तात्पर्य्यम्॥ १०७ ॥ १०८ ॥

विरुद्धार्थदीपकं निरूपयति अवलेपमिति। बलाहकाः मेघाः अनङ्गस्य कामस्य अवलेपं वर्द्धयन्ति, घर्मस्य ग्रीष्मस्य तु अवलेपं कर्शयन्ति ग्रीष्मं कृशीकुर्वन्तीत्यर्थः। मारुतोद्धूतशीकरा इति बलाहका इति पदस्य विशेषणम्। अत्र अवलेपपदेन बलाहकपदेन च वर्द्धनकर्शनरूपक्रिययोः कर्मभूतेन कर्त्तृभूतेन

अवलेपपदेनात्र बलाहकपदेन च ।
क्रिये विरुद्धे संयुक्ते तद्विरुद्धार्थदीपकम् ॥११०॥
हरत्याभोगमाशानां गृह्णाति ज्योतिषां गणम् ।
आदत्ते चाद्य मे प्राणानसौ जलधरावली ॥१११॥
अनेकशब्दोपादानात् क्रियैकैवात्र दीप्यते ।
यतो जलधरावल्या तस्मादेकार्थदीपकम् ॥११२॥
हृद्यगन्धवहा स्तुङ्गा स्तमालश्यामलत्विषः ।
दिवि भ्रमन्ति जीमूता भुवि चैते मतङ्गजाः ११३

च विरुद्धे वर्द्धनकर्षनरूपे क्रिये संयुक्ते अन्विते, तत् तस्मात् विरुद्धार्थदीपकमिदम् । एतच्च आदिवाक्येन अवलेपमिति पदेन बलाहका इति पदेन च सर्ववाक्यान्वयात् बलाहकस्य जातिवाचकत्वात् अवलेपस्य च गुणवाचित्वात् आदिगत-जातिदीपकगुणदीपकयोः सङ्कर इति ध्येयम् ॥ १०९ ॥ ११० ॥

एकार्थदीपकमुदाहरति हरतीत्यादि । असौ जलधरावली आशानां दिशाम् आभोगं विस्तारं हरति, ज्योतिषां गणं गृह्णाति, अद्य मे मम प्राणांश्च आदत्ते । अत्र अनेकेषां शब्दानां हरति गृह्णाति आदत्ते इति क्रियावाचकानाम् उपादानात् ग्रहणात् अपिरत्र ऊहनीयः । यतः जलधरावल्याः एका एव क्रिया एकार्थकत्वात् त्रयाणामिव क्रियावाचकपदानामिति भावः दीप्यते, तस्मात् एकार्थदीपकमिदम् ॥१११॥११२॥

श्लिष्टार्थदीपकमुदाहरति हृद्येति । हृद्यः शीतलत्वात् मनोरमः गन्धवहो येषु ते, इति जीमूतविशेषणम् । हृद्यं गन्धं मदजनितं वहन्तीति तथोक्ता इति मतङ्गजविशेषणम् ।

अत्र धर्मैरभिन्नानामभ्राणां दन्तिनां तथा ।
भ्रमणेनैव सम्बन्ध इति श्लिष्टार्थदीपकम् ॥११४॥
अनेनैव प्रकारेण शेषाणामपि दीपके ।
विकल्पानामवगतिर्विधातव्या विचक्षणैः ॥११५॥

इति दीपकचक्रम् ।

अर्थावृत्तिः पदावृत्तिरुभयावृत्तिरेव च ।
दीपकस्थान एवेष्टमलङ्कारत्रयं यथा ॥११६॥

छद्यगन्धवहाः तमालवत् श्यामलाः त्विषः कान्तयः येष ताद्दशाः जीमूताः दिवि आकाशे, एते मतङ्गजाश्च भुवि भ्रमन्ति । अत्र धर्मैः साधारणैः छद्यगन्धवहत्वादभिः अभिन्नानाम् अभ्राणां तथा दन्तिनाम् एकया भ्रमणक्रियया एव वाक्यद्वये सम्बन्ध इति श्लिष्टार्थदीपकं छद्यगन्धवहत्वरूप श्लिष्टार्थस्य प्रकटनात् इति भावः ॥ ११३ ॥ ११४ ॥

दीपकं संहरति अनेनेति । अनेन एव प्रकारेण वैचित्र्य विशेषवशेन दीपके शेषाणाम् उक्तावशिष्टानां विकल्पानां भेदानाम् अवगतिः ज्ञानं विचक्षणैः सुधीरैः विधातव्या ॥११५॥

इति उक्तविधं दीपकानां चक्रं समूहः ।

अथ आवृत्तिं निरूपयति अर्थावृत्तिरिति । दीपकस्थाने दीपकस्य सम्भवे अर्थावृत्तिः पदावृत्तिः उभयावृत्तिश्च इदम् अलङ्कारत्रयम् इष्टं कविभिरिति शेषः । अर्थस्य एकस्य वाक्यांशस्य आवृत्तिः वाक्यान्तरे पुनरुपस्थितिः, पदावृत्तिः वाक्यान्तरीयपदस्य वाक्यान्तरे पुनरुपस्थितिः, उभयावृत्तिः वाक्यांशस्य पदस्य च वाक्यान्तरे पुनरुपस्थितिः । दीपके तु वाक्य

विकसन्ति कदम्बानि स्फुटन्ति कुटजद्रुमाः ।
उन्मीलन्तिच कन्दल्यो दलन्ति ककुभानिच ११७
उत्कण्ठयति मेघानां माला वृन्दं कलापिनाम् ।
यूनाञ्चोत्कण्ठयत्येष: मानसं मकरध्वजः ॥११८॥
जित्वा विश्वं भवानत्र विहरत्यवरोधनैः ।

न्तरे तत्पदस्यानुपादानेऽपि वाक्यान्तरीयपदस्य अनुषङ्गादिना अन्वयनिर्वाह इह तु तदर्थकपदान्तरस्य तत्पदस्यैव वा पुनरुपादानमित्यनयोर्भेदः। भोजराजेन तु आवृत्तित्रयं दीपकस्यैव भेद इत्युक्तम्। यथा दीपकनिरूपणे, अर्थावृत्तिः पदावृत्तिरुभयावृत्तिरावली। सम्पुटं रसना माला चक्रवालञ्च तद्भिदा ॥ इति ॥ ११६ ॥

अर्थावृत्तिमुदाहरति विकसन्तीति। कदम्बानि विकसन्ति कुटजद्रुमाः स्फुटन्ति, कन्दल्यः उन्मीलन्ति ककुभानि दलन्ति। वर्षावर्णनमिदम्। अत्र विकसन्तीत्यादिपदं भिन्नप्रकृतिकमपि एकार्थत्वेनेति अर्थस्य पुनरावर्त्तनात् अर्थावृत्तिरियम् ॥ ११७ ॥

पदावृत्तिमाह उत्कण्ठयतीति। मेघानां माला कलापिनां वृन्दम् उत्कण्ठयति, एषः मकरध्वजः यूनां मानसम् उत्कण्ठयति च मेघानाम् उद्दीपकत्वात् इति भावः। अत्र प्रथमम् उत्कण्ठयति इति पदस्य आनन्दोदयात् दिदृक्षया उद्ग्रीवकरणरूपोऽर्थः, अपरम् उत्कण्ठयतीति पदस्य औत्सुक्यवशीकरणरूपोऽर्थः तस्मात् उत्कण्ठयतीति पदमात्रस्य पुनरावृत्तिः न तु अर्थस्येति पदावृत्तिः ॥ ११८ ॥

उभयावृत्तिमाह जित्वेति। अत्र भुवि भवान् विश्वं जित्वा

विहरत्यप्सरोभिस्ते रिपुवर्गो दिवं गतः ॥ ११९ ॥

इत्यावृत्तिगणः ।

प्रतिषेधोक्तिराक्षेपस्त्रैकाल्यापेक्षया त्रिधा ।
अथास्य पुनराक्षेप्यभेदानन्त्यादनन्तता ॥ १२०॥

अनङ्गः पञ्चभिः पुष्पैर्विश्वं व्यजयतेषुभिः ।
इत्यसम्भाव्यमथवा विचित्रा वस्तुशक्तयः ॥१२१॥

अवरोधनैः अन्तःपुरिकाभिः विहरति, ते तव रिपुवर्गः दिवं गतः सन् अप्सरोभिर्विहरति युद्धमरणे स्वर्गलाभादप्सरःप्राप्तिरिति भावः। अत्र विहरतीति पदस्य तदर्थस्य च उत्तरवाक्ये पुनरावृत्तेः उभयावृत्तिरिति बोध्यम् ॥ ११९ ॥

इति उक्तप्रकारः आवृत्त्यलङ्कारस्य गणः प्रभेद इत्यर्थः ।

आक्षेपं निरूपयति प्रतिषेधेति। प्रतिषेधस्य उक्तिः कथनं न तु तत्त्वतः प्रतिषेधः, तात्त्विकत्वे वैचित्र्याभावात् अलङ्कारत्वाभावप्रसङ्गात् इति भावः। आक्षेपः प्रतिषेधाभास इत्यर्थः। उक्तञ्च आग्नेयपुराणे, प्रतिषेध इवेष्टस्य यो विशेषाभिधित्सया। तमाक्षेपं ब्रुवन्तीति। स च त्रैकाल्यापेक्षया त्रैकालिकवस्तुगतत्वेन त्रिधा वर्त्तमानाक्षेपः अतीताक्षेपः भविष्यदाक्षेप इति अस्य च त्रिविधस्यापि आक्षेपस्य पुनः आक्षेप्यस्य आक्षेपविषयस्य भेदात् अनन्तता अनन्तप्रभेद इत्यर्थः ॥ १२० ॥

वृत्ताक्षेपं निर्दिशति अनङ्ग इत्यादि। अनङ्गः कामः इषुभिर्वाणभूतैः पञ्चभिः पुष्पैः अरविन्दादिभिः। उक्तञ्च, अरविन्दमशोकञ्च चूतञ्च नवमल्लिका। नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः ॥ इति। विश्वं व्यजयत विजितवान् इति

इत्यनङ्गजयायोगबुद्धिर्हेतुबलादिह ।
प्रवृत्तैव यदाक्षिप्ता वृत्ताक्षेपः स ईदृशः ॥ १२२ ॥
कुतः कुवलयं कर्णे करोषि कलभाषिणि ! ।
किमपाङ्गमपर्य्याप्तमस्मिन् कर्मणि मन्यसे ? १२३
स वर्त्तमानाक्षेपोऽयं कुर्वत्येवासितोत्पलम् ।
कर्णे काचित् प्रियेणैवं चाटुकारेण रुध्यते॥१२४॥

असम्भाव्यम् अविश्वास्यमित्यर्थः तथाच विजेतुस्तावदनङ्गत्वं वाणानाञ्च पञ्चसंख्यता तेषाञ्च पुष्पमयत्वं न तु दृढ़त्वं जेतव्यञ्च प्रकाण्डपदार्थो विश्वमिति विजयोऽस्त्रैव एवेति भावः । अथवा वस्तूनां पदार्थानां शक्तयः विचित्राः अचिन्त्यस्वरूपाः, वस्तुशक्त्या सर्वमेव सम्भाव्यते इति तत्त्वम् । इत्यत्र प्रवृत्ता जाता अनङ्गस्य विश्वजयासम्भाव्यत्वबुद्धिः हेतुबलात् वस्तुशक्तेः यत् आक्षिप्ता प्रतिषिद्धा, अतः ईदृशः एष इत्यर्थः सः प्रसिद्धः वृत्ताक्षेपः वृत्तस्य अतीतस्य सञ्जातस्य इत्यर्थः असम्भवबुद्धिरूपस्य आक्षेप इति ॥ १२१ ॥ १२२ ॥

वर्त्तमानाक्षेपमुदाहरति कुत इत्यादि । हे कलभाषिणि ! कर्णे कुवलयं नीलोत्पलं करोषि धारयसि कुतः कस्मात्, अस्मिन् कर्मणि कर्णशोभाकर्मणि अपाङ्गं किम् अपर्य्याप्तम् अक्षमं मन्यसे ? अपाङ्गेनैव कर्णशोभासम्पादनात् कुवलयधारणं व्यर्थमिति भावः । सः अयं वर्त्तमानाक्षेपः, यतः असितोत्पलं नीलोत्पलं कर्णे कुर्वती एव न तु कृतवती वा करिष्यन्ती काचित् नायिका चाटुकारेण प्रियेण एवं रुध्यते प्रतिषिध्यते । अतोऽत्र वर्त्तमानस्य असितोत्पलधारणस्य आक्षेपात् वर्त्तमानाक्षेप इति भावः ॥ १२३ ॥ १२४ ॥

सत्यं ब्रवीमि न त्वं मां द्रष्टुं वल्लभ ! लप्स्यसे ।
अन्यचुम्बनसंक्रान्तलाक्षारक्तेन चक्षुषा ॥ १२५ ॥
सोऽयं भविष्यदाक्षेपः प्रागेवातिमनस्विनी ।
कदाचिदपराधोऽस्य भावीत्येवमरुन्ध यत् ॥१२६॥
तव तन्वङ्गि ! मिथ्यैव रूढमङ्गेषु मार्दवम् ।
यदि सत्यं मृदून्येव किमकाण्डे रुजन्ति माम्१२७
धर्माक्षेपोऽयमाक्षिप्तमङ्गनागात्रमार्दवम् ।
कामुकेन यदत्रैवं कर्मणा तद्विरोधिना ॥ १२८ ॥

भविष्यदाक्षेपमाह सत्यमित्यादि। हे वल्लभ ! सत्यं ब्रवीमि, त्वम् अन्यस्या नायिकायाः चुम्बनेन संक्रान्तया लाक्षया रक्तेन चक्षुषा मां द्रष्टुं न लप्स्यसे मद्दर्शनं न प्राप्स्यसीत्यर्थः। अत्र अतिमनस्विनी अतिमानवती काचित् नायिका कदाचित् अस्य नायकस्य अपराधो भावी भविष्यतीति आशङ्क्य यत् एवं नायकम् अरुन्ध नायिकान्तरप्रसक्तौ निषिद्धवती अतः अयं स प्रसिद्धः भविष्यतः नायिकान्तरानुरागस्य आक्षेपात् प्रतिषेधात् भविष्यदाक्षेप इति निष्कर्षः ॥ १२५ ॥ १२६ ॥

आक्षेपस्य भेदानामानन्त्येऽपि कतिचित् भेदान् दर्शयिष्यन् प्रथमं धर्माक्षेपमाह तवेत्यादि। हे तन्वङ्गि ! तव अङ्गेषु मार्दवं रूढं स्थितं मिथ्यैव, यदि सत्यं तव अङ्गानि मृदूनि एव, तदा अकाण्डे अकारणं मां किं रुजन्ति तापयन्ति। अत्र कामुकेन एवम् उक्तिनैपुण्येन इत्यर्थः तद्विरोधिना मार्दवविरोधिना कर्मणा तापनरूपेण अङ्गनाया गात्रस्य मार्दवम्

सुन्दरी सा न वेत्येष विवेकः केन जायते।
प्रभामात्रं हि तरलं दृश्यते न तदाश्रयः॥ १२९॥
धर्म्याक्षेपोऽयमाक्षिप्तो धर्मी धर्मं प्रभाह्वयम्।
अनुज्ञायैव यद्रूपमत्याश्चर्य्यं विवक्षता॥ १३०॥
चक्षुषी तव रज्येते स्फुरत्यधरपल्लवः।
भ्रुवौ च भुग्नौ न तथाप्यदुष्टस्यास्ति मे भयम् १३१
स एष कारणाक्षेपः प्रधानं कारणं भियः।
स्वापराधो निषिद्धोऽत्र यत् प्रियेण पटीयसा १३२

आक्षिप्तं प्रतिषिद्धं तस्मात् अयं धर्मस्य मार्दवरूपस्य आक्षेपात् धर्माक्षेपः॥ १२७॥ १२८॥

धर्म्याक्षेपमुदाहरति सुन्दरीत्यादि। अत्र सा सुन्दरी नायिका वर्त्तते इति शेषः न वा इत्येषः विवेकः निश्चयज्ञानं केन कथं जायते न कथमपीत्यर्थः, हि यतः तरलं चञ्चलम् इतस्ततः विसृमरमित्यर्थः प्रभामात्रं दृश्यते, तस्य प्रभामात्रस्य आश्रयः आधारभूता नायिका न। अत्र अत्याश्चर्य्यं रूपं विवक्षता नायकेन प्रभाह्वयं प्रभारूपं धर्मम् अनुज्ञाय एव संस्थाप्यैव धर्मी तदाश्रयभूता नायिका आक्षिप्तः प्रतिषिद्ध इति अयं धर्म्याक्षेपः॥ १२९॥ १३०॥

कारणाक्षेपमुदाहरति चक्षुषी इत्यादि। तव चक्षुषी रज्यते आरक्ते भवतः, अधरः पल्लव इव स्फुरति, भ्रुवौ च भुग्नौ वक्रीकृतौ, तथापि भयकारणे सत्यपीत्यर्थः अदुष्टस्य निरपराधस्य मे भयं नास्ति। अत्र पटीयसा सुनिपुणेन प्रियेण भियः प्रधानं कारणं स्वापराधः निजकृतदोषः यत् यस्मात्

दूरे प्रियतमः सोऽयमागतो जलदागमः ।
दृष्टाश्च फुल्ला निचुला न मृता चास्मि किं न्विदम् ॥१३३॥
कार्य्याक्षेपः स कार्य्यस्य मरणस्य निवर्त्तनात् ।
तत्कारणमुपन्यस्य दारुणं जलदागमम् ॥१३४॥
न चिरं मम तापाय तव यात्रा भविष्यति ।
यदि यास्यसि यातव्यमलमाशङ्कयाऽत्र ते ॥१३५॥

निषिद्धः अतः एषः स प्रसिद्धः कारणाक्षेपः । अत्र न भयम् अस्तीति कथनेन भयरूपकार्य्यस्य प्रतिषेधात् अयं कार्य्याक्षेप- श्चेत्यनयोः सङ्करः । विभावना च स्फुटतया लक्ष्यते, विभावना विना हेतुं कार्य्योत्पत्तिर्यदुच्यते इति तल्लक्षणात् अतस्त्रयाणा- मेव सङ्कर इति ज्ञेयम् ॥ १३१ ॥ १३२ ॥

कार्य्याक्षेपं दर्शयति दूरे इत्यादि । प्रियतमः दूरे तिष्ठति इति शेषः, सः अयं जलदागमः वर्षासमयः आगतः, यतः फुल्ला निचुलाः स्थलवेतसाः दृष्टाश्च, तथापि न मृता च अस्मि, नु वितर्के, किमिदम् अत्यसम्भाव्यमिदम् इति भावः, विरहि- ण्युक्तिरियम् । अत्र तस्य कारणं दारुणं जलदागमम् उपन्यस्य कार्य्यस्य मरणस्य निवर्त्तनात् प्रतिषेधात् सः प्रसिद्धः कार्य्या- क्षेपोऽयम् । अत्र सति कारणे फलस्य मरणस्य अभावकीर्त्तनात् विशेषोक्तिरपि । तदुक्तं दर्पणकारेण, सति हेतौ फलाभावो विशेषोक्तिस्तथा द्विधा इति तदनयोः सङ्कर इति बोध्यम् ॥ १३३ ॥ १३४ ॥

अनुज्ञाक्षेपमुदाहरति नेत्यादि । तव यात्रा प्रवासगमनं मम चिरं तापाय न भविष्यति, विरहेण मम झटिति प्राणाः

इत्यनुज्ञामुखेनैव कान्तस्याक्षिप्यते गतिः ।
मरणं सूचयन्त्यैव सोऽनुज्ञाक्षेप उच्यते ॥१३६॥
धनञ्च बहु लभ्यं ते सुखं क्षेमञ्च वर्त्मनि ।
न च मे प्राणसन्देहस्तथापि प्रिय ! मास्मगाः १३७
इत्याचक्षाणया हेतून् प्रिययात्रानुबन्धिनः ।
प्रभुत्वेनैव रुद्धस्तत् प्रभुत्वाक्षेप उच्यते ॥ १३८॥
जीविताशा बलवती धनाशा दुर्बला मम ।
गच्छ वा तिष्ठ वा कान्त! स्वावस्था तु निवेदिता१३९

त्ययस्य अवश्यम्भावादिति भावः। यदि त्वं यास्यसि तदा यातव्यं याहीत्यर्थः, ते तव अत्र मद्विषये आशङ्कया अलम्। अत्र विरहवेदनया मरणं सूचयन्त्या कयाचित् अनुज्ञामुखेन विदेशगमनानुमत्या एव कान्तस्य गतिः विदेशगमनम् आक्षिप्यते निषिध्यते, अतः सः अनुज्ञाक्षेप इत्युच्यते ॥ १३५ ॥ १३६ ॥

प्रभुत्वाक्षेपमुदाहरति धनञ्चेत्यादि। हे प्रिय! ते विदेशगमने इति अध्याहार्य्यं बहु धनं सुखञ्च तथा वर्त्मनि पथि क्षेमं कुशलञ्च लभ्यम्, अत्र च मे प्राणसन्देहः न तव शीघ्रप्रत्यागमनस्य बहुधनलाभस्य च सम्भवादिति भावः, तथापि मा स्म गाः मा गच्छ। अत्र प्रिययात्रायाः प्रियस्य विदेशगमनस्य अनुबन्धिनः पोषकान् हेतून् आचक्षाणया कीर्त्तयन्त्या कयाचित् स्वाधीनपतिकया इति शेषः प्रभुत्वेन स्वाधीनतया एव पतिः रुद्धः विदेशगमनात् निवर्त्तितः तस्मात् एषः प्रभुत्वाक्षेप उच्यते ॥ १३७ ॥ १३८ ॥

अनादराक्षेपमुदाहरति जीवितेत्यादि। हे कान्त! मम

असावनादराक्षेपो यदनादरवद् वचः ।
प्रियप्रयाणं रुन्धत्या प्रयुक्तमिह रक्तया ॥ १४० ॥
गच्छ गच्छसि चेत् कान्त! पन्थानः सन्तु ते शिवाः।
ममापि जन्म तत्रैव भूयाद् यत्र गतो भवान्॥१४१॥
इत्याशीर्वचनाक्षेपो यदाशीर्वादवर्त्मना ।
स्वावस्थां सूचयन्त्यैव कान्तयात्रा निषिध्यते ॥१४२॥

जीविताशा जीवनेच्छा बलवती दीर्घकालं जीवितुमिच्छामि इत्यर्थः धनाशा मम दुर्बला तव विदेशगमने धनलाभो भविष्यति इत्येषा आकाङ्क्षा मम नास्तीत्यर्थः अतः गच्छ वा तिष्ठ, स्वस्य अवस्था अभिप्राय इत्यर्थः निवेदिता कथिता। इह रक्तया अनुरागिण्या प्रियप्रयाणं पत्युर्विदेशगमनं रुन्धत्या वारयन्त्या कयाचित् यत् यस्मात् अनादरवत् अनास्थाव्यञ्जकं वचः प्रयुक्तम् अतः असौ अनादराक्षेप इति ॥ १३९ ॥ १४० ॥

आशीर्वचनाक्षेपमुदाहरति गच्छेत्यादि। हे कान्त! गच्छसि चेत् गच्छ, ते तव पन्थानः शिवाः निर्विघ्नाः सन्तु, किन्तु, यत्र भवान् गतः तत्रैव ममापि जन्म भूयात्, अयं भावः तव गमनानन्तरमेव मम मरणं भविष्यति, मृतायाश्च अवश्यं जन्म भविता, तत् तु तव सन्निधौ भवति चेत् पुनस्त्वद्दर्शनं लप्स्ये इति। अत्र आशीर्वादवर्त्मना आशीर्वचनरीत्या स्वावस्थां सूचयन्त्या कान्तया यत् यस्मात् कान्तस्य यात्रा विदेशगमनं निषिध्यते अतः अयम् आशीर्वचनाक्षेपः ॥ १४१ ॥ १४२ ॥

यदि सत्यैव यात्रा ते काप्यन्या मृग्यतां त्वया ।
अहमद्यैव रुद्धास्मि रन्ध्रापेक्षेण मृत्युना ॥१४३॥
इत्येष परुषाक्षेपः परुषाक्षरपूर्वकम् ।
कान्तस्याक्षिप्यते यस्मात् प्रस्थानं प्रेमनिघ्नया॥१४४
गन्ता चेत् गच्छ तूर्णं ते कर्णौ यान्ति पुरा रवाः
आर्त्तबन्धुमुखोद्गीर्णाः प्रयाणपरिपन्थिनः ॥१४५॥
साचिव्याक्षेप एवैष यदत्र प्रतिषिध्यते ।
प्रियप्रयाणं साचिव्यं कुर्वत्येवानुरक्तया ॥ १४६ ॥

परुषाक्षेपमुदाहरति यदीत्यादि। यदि ते तव यात्रा विदेशगमनं सत्यैव, तदा त्वया अन्या कापि प्रियतमा मृग्यताम् अन्विष्यताम्। अहं रन्ध्रापेक्षेण छिद्रानुसन्धायिना मृत्युना अद्यैव न तु कालान्तरे, रुद्धा आक्रान्ता अस्मि, अद्यैव मम मृत्युर्भविष्यति इति भावः। इत्यत्र प्रेमनिघ्नया अनुरागवशवर्त्तिन्या कयाचित् परुषाक्षरपूर्वकं निष्ठुरवचनमुक्त्वा इत्यत्र यस्मात् कान्तस्य प्रस्थानं विदेशगमनम् आक्षिप्यते निषिध्यते अतः एष परुषाक्षेपः ॥ १४३ ॥ १४४ ॥

साचिव्याक्षेपमुदाहरति गन्तेत्यादि। हे कान्त! गन्ता गामी चेत् गमिष्यसि यदीत्यर्थः भविष्यदर्थे तृन्। तूर्णं गच्छ आर्त्तानां शोकाकुलानां मन्मरणेनेति भावः, बन्धूनां मुखोद्गीर्णा मुखोच्चारिताः प्रयाणपरिपन्थिनः विदेशयात्राप्रतिरोधिनः रवाः मन्मृत्युसूचका वर्णाः ते कर्णौ पुरा यान्ति श्रवणगोचरीभविष्यन्ति इत्यर्थः। पुरायोगे भविष्यदर्थे लट्। अत्र अनुरक्तया कयाचित् साचिव्यं सहायतां तूर्णं गच्छेत्यनेनेति भावः

गच्छेति वक्तुमिच्छामि त्वत्प्रियं मत्प्रियैषिणी ।
निर्गच्छति मुखाद्वाणी मागा इति करोमि किम् ॥१४

यत्नाक्षेपः स, यत्नस्य कृतस्यानिष्टवस्तुनि ।
विपरीतफलोत्पत्तेरानर्थक्योपदर्शनात् ॥१४८॥

क्षणं दर्शनविघ्नाय पक्ष्मस्पन्दाय कुप्यतः ।
प्रेम्णः प्रयाणं त्वं ब्रूहि मया तस्येष्टमिष्यते ॥१४

सोऽयं परवशाक्षेपो यत्प्रेमपरतन्त्रया ।
तया निषिध्यते यात्रेत्यन्यार्थस्योपदर्शनात् ॥१५०

कुर्वत्या यत् यस्मात् प्रियप्रयाणं प्रियस्य विदेशयात्रा प्रति-षिध्यते अत एव साचिव्याक्षेपः ॥ १४५ ॥ १४६ ॥

यत्नाक्षेपं निरूपयति गच्छेत्यादि। त्वत्प्रियं तव अनुकूलं गच्छ इति वचः वक्तुम् इच्छामि, किन्तु मुखात् मा गा इति मत्प्रियैषिणी वाणी निर्गच्छति किं करोमि तव गृहे अव-स्थानस्यैव मत्प्रियत्वात् इति भावः। अत्र अनिष्टवस्तुनि गच्छेति गमनविधाने कृतस्यापि यत्नस्य विपरीतस्य फलस्य मा गा इति वाणीनिःसरणरूपस्य उत्पत्तेः जातत्वात् आनर्थ-क्योपदर्शनात् अनर्थसम्भवद्योतनात् विदेशगमनमाक्षिप्यं इति अयं यत्नाक्षेपः ॥ १४७ ॥ १४८ ॥

परवशाक्षेपमुदाहरति क्षणमित्यादि। हे कान्त ! त्वं क्षणं व्याप्य दर्शनविघ्नाय दर्शनप्रतिबन्धकाय पक्ष्मस्पन्दाय कुप्यत पक्ष्माणां नेत्रलोम्नां स्पन्दनमपि असहमानात् प्रेम्णः अनु-रागापरनाम्नः प्रणयात् प्रयाणं यात्रानुमतिं ब्रूहि प्रार्थय, मया तस्य प्रेम्णः एव इष्टम् इष्यते। प्रेमाधीनाया मम अनुम-

सहिष्ये विरहं नाथ ! देह्यदृश्याञ्जनं यथा ।
त्वदक्तनेत्रां कन्दर्पः प्रहर्त्तुं मां न पश्यति ॥१५१॥
दुष्करं जीवनोपायमुपन्यस्योपरुध्यते ।
पत्युः प्रस्थानमित्याहुरुपायाक्षेपमीदृशम् ॥१५२॥
प्रवृत्तैव प्रयामीति वाणी वल्लभ ! ते मुखात् ।
इयतापि त्वयेदानीं मन्दप्रेम्णा ममास्ति किम् ॥१५३॥
रोषाक्षेपोऽयमुद्रिक्तस्नेहनिर्यन्त्रितात्मना ।
संरब्धया प्रियारब्धं प्रयाणं यन्निषिध्यते ॥१५४॥

फलं प्रेम्णः अभिमतश्चेत् तव गमनं तदा गच्छेति भावः । प्रयाणानुमतिं कामयमानं पतिं प्रति कस्याश्चिदुक्तिरियम् । अत्र प्रेमपरतन्त्रया नायिकया अन्यार्थस्य प्रेमानुमतिग्रहण-रूपस्य उपदर्शनात् उपदेशात् यात्रा कान्तस्य विदेशगमनं निषिध्यते इति अयं सः प्रसिद्धः परवशाक्षेपः ॥ १४९ ॥ १५० ॥

उपायाक्षेपमाह सहिष्ये इत्यादि । हे नाथ ! तव विरहं सहिष्ये, मम अदृश्याञ्जनम् अदर्शनजनकं कज्जलविशेषं देहि, किं तत इत्याह यदिति । कन्दर्पः येन कज्जलेन अक्ते लिप्ते नेत्रे यस्याः तादृशीं मां प्रहर्त्तुं न पश्यति, तव विरहे कन्दर्पो मां व्यथयिष्यति, यदि तस्याशङ्का न स्यात् तदा तव प्रयाणे न हानिरिति भावः । अत्र दुष्करं जीवनोपायं कामादर्शन-जनकसिद्धाञ्जनविशेषदानरूपं जीवनोपायम् उपन्यस्य तद-सम्भवात् पत्युः प्रस्थानं विदेशयात्रा उपरुध्यते प्रतिषिध्यते इति ईदृशम् उपायाक्षेपम् आहुः कवय इति शेषः ॥१५१॥१५२॥

रोषाक्षेपमुदाहरति प्रवृत्तैवेत्यादि । हे वल्लभ ! ते तव

मुग्धा कान्तस्य यात्रोक्तिश्रवणादेव मूर्च्छिता।
बुध्वा वक्ति प्रियं दृष्ट्वा किं चिरेणागतो भवान्१५
इति तत्कालसम्भूतमूर्च्छयाक्षिप्यते गतिः।
कान्तस्य कातराक्ष्या यन्मूर्च्छाक्षेपः स ईदृशः॥१५

मुखात् प्रयामि गच्छामि इति वाणी प्रवृत्ता उच्चरिता एव ईदृशे प्रेमणि तव प्रयाणं दूरापास्तं, तदर्थकवाणीनिःसरणमपि असम्भवमिति भावः, अतः अनुरागस्तादृशोऽपि त्वया शिथिली कृत इत्याशयेनाह अयतेति। इदानीं मन्दप्रेमणा शिथिलिता नुरागेण अयता गच्छतापि त्वया मम, किम् अस्ति न किमपि प्रयोजनमस्तीत्यर्थः। अयतेति इ गतादित्यस्मात् भौवादि कात् निष्पन्नम्। अत्र उद्रिक्तेन अतिरिक्तेन स्नेहेन प्रेमणा नियन्त्रितः आक्रान्तः आत्मा यस्यास्तादृश्या संरब्धया कुपितया कयाचित् प्रियेण आरब्धम् उद्युक्तं प्रयाणं प्रियकृतविदेश-गमनोद्योग इत्यर्थः यत् यस्मात् निषिध्यते अतः अयं रोषा-क्षेपः॥ १५३॥ १५४॥

मूर्च्छाक्षेपं निरूपयति मुग्धेत्यादि। काचित् मुग्धा कान्तस्य यात्राया विदेशगमनस्य उक्तिश्रवणात् एव न तु विदेशगमनात् मूर्च्छिता मोहं प्राप्ता, अथ बुद्ध्वा संज्ञां लब्ध्वा बुद्धेति पाठे सञ्जातचैतन्या प्रियं दृष्ट्वा वक्ति भवान् किं कथं चिरेण आगतः, एतादृशं विलम्बं कृत्वा कथमागतोऽसीत्यर्थः। इत्यत्र तत्काले गमनश्रवणकाले सम्भूता मूर्च्छा यस्याः तया कातराक्ष्या मुग्धया कान्तस्य गतिः यत् आक्षिप्यते निषिध्यते स ईदृशः मूर्च्छाक्षेपः॥ १५५॥ १५६॥

नाघ्रातं न कृतं कर्णे स्त्रीभिर्मधुनि नार्पितम् ।
त्वद्द्विषां दीर्घिकास्वेव विशीर्णं नीलमुत्पलम् १५७
असावनुक्रोशाक्षेपः सानुक्रोशमिवोत्पले ।
व्यावर्त्त्य कर्म तद्योग्यं शोच्यावस्थोपदर्शनात्॥१५८॥
अमृतात्मनि पद्मानां द्वेष्टरि स्निग्धतारके ।
मुखेन्दौ तव सत्यस्मिन्नपरेण किमिन्दुना ॥१५९॥
इति मुख्येन्दुराक्षिप्तो गुणान् गौणेन्दुवर्त्तिनः ।
तत्समान् दर्शयित्वेह श्लिष्टाक्षेपस्तथाविधः ॥१६०॥

अनुक्रोशाक्षेपं निरूपयति नेत्यादि । तव द्विषां शत्रूणां स्त्रीभिः नीलम् उत्पलं न आघ्रातं न कर्णे कृतं मधुनि च न अर्पितं सुतरां दीर्घिकासु एव विशीर्णं विशुष्कम् । अत्र राजविषया रतिर्ध्वन्यते, तेषां पराजयेन मरणात् पलायनाद्वेति भावः । अत्र उत्पले सानुक्रोशमिव सदयमिव तस्य उत्पलस्य योग्यं कर्म स्त्रीजनकर्त्तृकाघ्राणादिकं व्यावर्त्त्य निषिध्य शोच्याया अवस्थाया अनुपभोगेन वापीषु विशीर्णतारूपाया उपदर्शनाम् प्रदर्शनात् असौ अनुक्रोशाक्षेपः ॥ १५७ ॥ १५८ ॥

श्लिष्टाक्षेपमुदाहरति अमृतात्मनीत्यादि । अमृतस्येव आत्मा स्वभावो यस्य तादृशे परमाह्लादके इत्यर्थः अन्यत्र अमृतं जलं तदात्मके, पद्मानां द्वेष्टरि पराजयकारिणि, अन्यत्र सङ्कोचकत्वात् शत्रौ तथा स्निग्धे तारके अक्षिकनीनिके यस्य तस्मिन् तव अस्मिन् मुखेन्दौ सति अपरेण इन्दुना किं न किमपि प्रयोजनमस्तीत्यर्थः । इत्यत्र तत्समान् तस्य मुख्येन्दोः सदृशान् गौणम् आरोपितं यत् इन्दुः मुखमित्यर्थः तद्वर्त्तिनः

अर्थो न सम्भृतः कश्चिन्न विद्या काचिदर्जिता ।
न तपः सञ्चितं किञ्चिद् गतञ्च सकलं वयः ॥ १६१ ॥
असावनुशयाक्षेपो यस्मादनुशयोत्तरम् ।
अर्थार्जनादेर्व्यावृत्तिर्दर्शितेह गतायुषा ॥ १६२ ॥
किमयं शरदम्भोदः किंवा हंसकदम्बकम् ।
रुतं नूपुरसंवादि श्रूयते तन्न तोयदः ॥ १६३ ॥
इत्ययं संशयाक्षेपः संशयो यन्निवर्त्त्यते ।
धर्मेण हंससुलभेनास्पृष्टघनजातिना ॥ १६४ ॥

तदीयान् गुणान् दर्शयित्वा मुख्यः इन्दुः आक्षिप्तः प्रतिषिद्धः इत्यतः तथाविधः तादृशः श्लिष्टाक्षेपः अयम् अस्य श्लेषमूलकत्वात् इति भावः ॥ १५९ ॥ १६० ॥

अनुशयाक्षेपमुद्दिशति अर्थ इति । कश्चित् अर्थः धनं न सम्भृतः, काचित् विद्या च न अर्जिता, किञ्चित् तपः न सञ्चितं सकलं वयश्च गतम् । अत्र यस्मात् अनुशयोत्तरं पश्चात्तापबहुलं यथा तथा गतायुषा जनेन अर्थार्जनादेः व्यावृत्तिः अभावः दर्शिता तस्मात् अयम् अनुशयाक्षेपः ॥ १६१ ॥ १६२ ॥

संशयाक्षेपमुदाहरति किमित्यादि । अयं किं शरदम्भोदः, शरत्कालीनः जलापगमात् शुभ्रः मेघः, किंवा हंसानां कदम्बकं समूहः, किन्तु नूपुरसंवादि नूपुरध्वनिसदृशं रुतं श्रूयते, तस्मात् तोयदः मेघः न । अत्र अस्पृष्टा घनजातिर्येन तादृशेन हंससुलभेन केवलहंससम्बन्धिना धर्मेण तादृशरुतेन यत् यस्मात् संशयः निवर्त्त्यते तस्मात् अयं संशयाक्षेपः ॥ १६३ ॥ १६४ ॥

चित्रमाक्रान्तविश्वोऽपि विक्रमस्ते न शाम्यति ।
कदा वा दृश्यते तृप्तिरुदीर्णस्य हविर्भुजः ॥१६५॥
अयमर्थान्तराक्षेपः प्रक्रान्तो यन्निवार्य्यते ।
विस्मयोऽर्थान्तरस्येह दर्शनात् तत्सधर्मणः ॥१६६॥
न स्तूयसे नरेन्द्र ! त्वं ददासीति कदाचन ।
स्वमेव मत्वा गृह्णन्ति यतस्त्वद्धनमर्थिनः ॥१६७॥
इत्येवमादिराक्षेपः हेत्वाक्षेप इति स्मृतः ।
अनयैव दिशान्योऽपि विकल्पः शक्य ऊहितुम्१६८

इति आक्षेपचक्रम् ।

अर्थान्तराक्षेपमुद्दिशति चित्रमिति । ते तव विक्रमः आक्रान्तं विश्वं येन तादृशोऽपि न शाम्यति एतत् चित्रमाश्चर्य्यम् । वा अथवा उदीर्णस्य उद्दीप्तस्य हविर्भुजः अग्नेः तृप्तिः कदा दृश्यते न कदापि इत्यर्थः। इह अत्र तत्सधर्मणः तस्य विक्रमस्य सधर्मणः समानधर्मस्य अर्थान्तरस्य हविर्भुक्तृप्त्यभावरूपस्य दर्शनात् प्रदर्शनात् प्रक्रान्तः चित्रमिति पदेन प्रस्तुतः विस्मयः यत् निवार्य्यते, अयम् अर्थान्तराक्षेपः अर्थान्तरेण प्रस्तुतस्याक्षेपात्। अत्र राजविषयिणी रतिर्ध्वन्यते ॥ १६५ ॥ १६६ ॥

हेत्वाक्षेपमुद्दिशति नेत्यादि । हे नरेन्द्र ! त्वं ददासीति कृत्वा कदाचन न स्तूयसे, यतः अर्थिनः तव धनं स्वं निजस्वत्वास्पदीभूतमेव बुद्धा इति शेषः गृह्णन्ति । एतेन राज्ञोऽतीवदानशीलत्वं सूचितम् । इत्यत्र स्वमेवेति हेतुवशात् प्रस्तुतराजस्तवस्य आक्षेपात् हेत्वाक्षेपः अयम् आक्षेपस्य हेतुसाध्य-

ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किञ्चन।
तत्साधनसमर्थस्य न्यासो योऽन्यस्य वस्तुनः॥१६९

त्वात्। अनया एव दिशा रीत्या अन्योऽपि विकल्पः आक्षेपस्य भेदः ऊहितुं निरूपयितुं शक्यः धीमद्भिरिति शेषः। कारणाक्षेपे तु कारणस्यैव आक्षेप इह तु कारणेन आक्षेप इत्यनयोर्भेद इति बोध्यम्॥ १७७॥ १६८॥

इति उक्तरूपम् आक्षेपालङ्काराणां चक्रं समूहः।

अर्थान्तरन्यासमाह ज्ञेय इति। किञ्चन किमपि वस्तु प्रकृतं प्रस्तुत्य उपन्यस्य तस्य साधने प्रमाणीकरणे समर्थस्य अन्यस्य अप्रकृतस्य वस्तुनः विषयस्य कीर्त्तनं सः अर्थान्तरन्यासः ज्ञेयः। अत्र प्रस्तुत्य इति क्त्वाप्रत्ययेन प्रथमं प्रकृतस्य कीर्त्तनं ततस्तत्समर्थकस्य उपन्यास इति सूचितम्। कदाचित् वैपरीत्यमपि दृश्यते। भोजराजेन स विपरीतार्थान्तरन्यासोऽभिहितः। यथा, प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता। अवलम्बनाय दिनभर्त्तुरभून्न पतिष्यतः करसहस्रमपीति। अत्र पूर्वार्द्धवाक्यं परार्द्धस्य समर्थकमपि प्रागुपन्यस्तम्। वस्तुतस्तु प्रस्तुतस्य पूर्वोक्तस्य परोक्तस्य वा अप्रस्तुतेन समर्थनमर्थान्तरन्यास इति निष्कर्षः। अत्र समर्थ्यसमर्थकयोः सामान्यविशेषभावः कार्य्यकारणभावश्च साधर्म्येण वैधर्म्येण वा भवतीति दर्पणकारः। यथा, सामान्यं वा विशेषेण विशेषस्तेन वा यदि। कार्य्यञ्च कारणेनेदं कार्य्येण च समर्थ्यते। साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः॥ इति। उदाहरणन्तु यथायथमूहनीयम् इति॥ १६९॥

विश्वव्यापी विशेषस्थः श्लेषाविद्धो विरोधवान् ।
अयुक्तकारी युक्तात्मा युक्तायुक्तो विपर्य्ययः ॥१७०॥
इत्येवमादयो भेदाः प्रयोगेष्वस्य लक्षिताः ।
उदाहरणमालैषां रूपव्यक्तौ निदर्श्यते ॥ १७१ ॥
भगवन्तौ जगन्नेत्रे सूर्य्याचन्द्रमसावपि ।
पश्य गच्छत एवास्तं नियतिः केन लङ्घ्यते ॥१७२॥

अर्थान्तरन्यासस्य भेदानाह विश्वव्यापीत्यादि। विश्वव्यापी सर्वतः सम्भवशीलः, विशेषस्थः असर्वगः श्लेषाविद्धः श्लिष्टपदान्वितः, विरोधवान् प्रकृतविरोधी, अयुक्तकारी अनुचितकार्य्यकर्त्ता युक्तात्मा औचित्ययुक्तः, युक्तायुक्तः कियदंशेन युक्तः कियता वा अयुक्तः, तथा विपर्य्ययः वैपरीत्यगुणयुक्तः। अस्य अर्थान्तरन्यासस्य प्रयोगेषु इत्येवमादयः एवम्प्रकाराः भेदाः विशेषाः लक्षिताः अनुभूताः एषाम् उक्तभेदानां तादृशानाम् अन्येषाञ्च रूपस्य स्वरूपस्य व्यक्तौ व्यक्तीकरणे वक्ष्यमाणा उदाहरणमाला निदर्श्यते ॥ १७० ॥ १७१ ॥

विश्वव्यापिनमुदाहरति भगवन्ताविति। भगवन्तौ षडैश्वर्य्यशालिनौ जगतां नेत्रे नयनस्वरूपौ सूर्य्याचन्द्रमसौ अपि का कथा अन्येषामिति अपिना सूच्यते। अस्तं गच्छत एव, पश्य। इममर्थं समर्थयति नियतिरिति। केन नियतिर्भाग्यं लङ्घ्यते अतिक्रम्यते न केनापीत्यर्थः। अत्र चतुर्थपादवाक्यरूपस्य समर्थकस्य विश्वव्यापित्वं ब्रह्मादिकीटपर्य्यन्तानां सर्वेषामेव नियत्यधीनत्वात् इति सामान्येन पूर्वोक्तत्रिपादगतवाक्यस्य विशेषस्य समर्थनात् विश्वव्यापिनामार्थान्तरन्यरन्यासः॥१७२॥

पयोमुचः परीतापं हरन्त्येव शरीरिणाम् ।
नन्वात्मलाभो महतां परदुःखोपशान्तये ॥ १७३ ॥
उत्पादयति लोकस्य प्रीतिं मलयमारुतः ।
ननु दाक्षिण्यसम्पन्नःसर्वस्य भवति प्रियः ॥ १७४ ॥
जगदानन्दयत्येष मलिनोऽपि निशाकरः ।
अनुगृह्णाति हि परान् सदोषोऽपि द्विजेश्वरः ॥ १७५ ॥

विशेषस्थमुदाहरति पयोमुच इति। पयोमुचः जलदाः शरीरिणां परीतापं हरन्त्येव। उक्तमर्थं समर्थयति नन्विति। महताम् आत्मलाभः जन्मग्रहणं परेषां दुःखस्य उपशान्तये नाशाय ननु निश्चितम्। अत्र महताम् इत्युक्तेर्न साधारणप्राणिनामिति विशेषलाभात् उत्तरवाक्यरूपेण सामान्येन पूर्ववाक्यरूपस्य विशेषस्य समर्थनात् विशेषस्थनामार्थान्तरन्यासः ॥ १७३ ॥

श्लेषाविद्धमुदाहरति उत्पादयतीति। मलयमारुतः लोकस्य प्रीतिम् उत्पादयति। तथाहि, दाक्षिण्यसम्पन्नः दाक्षिण्येन दक्षिणदिक्सम्पर्केण मलयस्य दाक्षिणात्यत्वात् इति भावः। अन्यत्र औदार्य्येण सम्पन्नः युक्तः लोकः सर्वस्य प्रियो भवति ननु। अत्र श्लेषमूलत्वेनैव उत्तरवाक्यस्य पूर्ववाक्यसमर्थनात् श्लेषाविद्धनामार्थान्तरन्यासः ॥ १७४ ॥

विरोधवन्तमुदाहरति जगदिति। एष निशाकरः मलिनोऽपि सकलङ्कोऽपि जगत् आनन्दयति। तथाहि द्विजेश्वरः ब्राह्मणश्रेष्ठः सदोषोऽपि परान् अन्यान् अनुगृह्णाति उपदेशदानादिना इति भावः। अत्र निशाकरस्यापि द्विजराजत्वेन

मधुपानकलात् कण्ठान्निर्गतोऽप्यलिनां ध्वनिः ।
कटुर्भवति कर्णस्य कामिनां पापमीदृशम् ॥१७६॥

अयं मम दहत्यङ्गमम्भोजदलसंस्तरः ।
हुताशनप्रतिनिधिर्दाहात्मा ननु युज्यते ॥१७७॥

चिणोतु कामं शीतांशुः किं वसन्तो दुनोति माम्

द्विजेश्वरानुग्रहरूपेण सामान्येन विशेषस्य समर्थनं तच्च सदोषत्वानुग्राहकरूपयोर्विरुद्धधर्मयोः सामानाधिकरण्यात् विरोधयुक्तमिति विरोधवदर्थान्तरन्यासः ॥ १७५ ॥

अयुक्तकारिणमुदाहरति मध्विति। मधुपानेन कलात् मधुरात् अलिनां भ्रमराणां कण्ठात् निर्गतोऽपि ध्वनिः कामिनां कर्णस्य कटुर्भवति। तथाहि, पापम् ईदृशं दुःखदमित्यर्थः। एतेन कामित्वस्य पापत्वमुक्तम्। अत्र पापस्य दुःखकररूपसामान्येनार्थेन मधुरस्यापि भ्रमरध्वनिरूपविशेषस्य समर्थनात् तस्य सयुक्तत्वात् अयुक्तकारिनामार्थान्तरन्यासः ॥ १७६ ॥

युक्तात्मानमुदाहरति अयमिति। अयं हुताशनप्रतिनिधिः अग्निसदृशः अम्भोजानां पद्मानां दलैः संस्तरः शय्या मम अङ्गं दहति। तथाहि, दाहः दाहकता आत्मा स्वभावः दाहकत्वरूपा प्रकृतिरित्यर्थः अग्नेरिति शेषः युज्यते, अत्र पद्मदलरूपशय्यायाः हुताशनप्रतिनिधित्वेन अङ्गदाहकत्वं युक्तम् इति सामान्येन विशेषस्य समर्थनात्। युक्तात्मनामार्थान्तरन्यासः ॥ १७७ ॥

युक्तायुक्तमुदाहरति चिणोत्वित्यादि। शीतांशुः कामं

मलिनाचरितं कर्म सुरभेर्नन्वसाम्प्रतम् ॥ १७८ ॥
कुमुदान्यपि दाहाय किमयं कमलाकरः ।
न हीन्दुगृह्येषूग्रेषु सूर्य्यगृह्यो मृदुर्भवेत् ॥ १७९ ॥
इत्यर्थान्तरन्यासचक्रम् ।

क्षिणोतु पीड़यतु, तस्य कलङ्कित्वात् परपीड़नं युक्तमिति भावः, वसन्तः किं कथं मां दुनोति तापयति । तथाहि, सुरभेः सुविख्यातनामधेयस्य अथच वसन्तस्य, मधौ कामदुघायाञ्च विख्याते सुरभिर्द्वयोरिति कोषः । मलिनेन पापिना आचरितं कर्म परपीड़नरूपम् असाम्प्रतम् अयुक्तं ननु, अत्र उत्कृष्टस्य अपकर्मकरणेन अयुक्तत्वम् अपकृष्टस्य अपकर्मकरणेन युक्तत्वम् इति युक्तायुक्तनामार्थान्तरन्यासः । सुरभेरित्यस्य श्लिष्टत्वेन च श्लेषाविद्धोऽपीत्यनयोः सङ्करः ॥ १७८ ॥

विपर्य्ययमुदाहरति कुमुदानीति । कुमुदान्यपि अतिशीतलान्यपीत्यर्थः, दाहाय, दाहकानीत्यर्थः, अयं कमलानामाकरः पद्मानीत्यर्थः किं का कथा पद्मेषु सूर्य्यगृह्यत्वात् नातिशीतेषु इत्यर्थः, इन्दुगृह्येषु चन्द्रपक्षेषु उग्रेषु दाहकेषु इत्यर्थः सूर्य्यगृह्यः सूर्य्यपक्षः न हि मृदुः भवेत् यस्य इन्दुपक्षोऽपि क्लेशावहः तस्य सूर्य्यपक्षस्य क्लेशावहत्वं किमु वक्तव्यमिति भावः । अत्र अयुक्तस्य कुमुदस्यापि अयुक्तकरणात् विपर्य्ययनामायमर्थान्तरन्यासः । स च इन्दुगृह्यसूर्य्यगृह्यपदघटितवाक्यरूपसामान्येन पूर्वार्द्धवाक्यरूपविशेषः, समर्थित इत्यवधेयम् ॥ १७९ ॥

इति उक्तरूपम् अर्थान्तरन्यासस्य चक्रं समूहः ।

शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनोर्द्वयोः ।
तत्र यद् भेदकथनं व्यतिरेकः स कथ्यते ॥१८०॥
धैर्य्यलावण्यगाम्भीर्य्यप्रमुखैस्त्वमुदन्वतः ।
गुणैस्तुल्योऽसि भेदस्तु वपुषैवेदृशेन ते ॥ १८१ ॥
तुल्येकव्यतिरेकोऽयं धर्म्मेणैकत्र वर्त्तिना ।
प्रतीतिविषयप्राप्तेर्भेदस्योभयवर्त्तिनः ॥ १८२ ॥

व्यतिरेकमाह शब्दोपात्ते इति। द्वयोर्वस्तुनोः उपमानोपमेययोः सादृश्ये शब्दोपात्ते साधारणधर्मप्रतिपादकशब्दप्रयोगेण बोधिते वा प्रतीते साधारणधर्मवाचकशब्दानुपादानात् व्यञ्जनया सूचिते सति तत्र तयोरित्यर्थः, षष्ठ्यर्थे सप्तमी। यत् भेदकथनं विशेषप्रतिपादनं स व्यतिरेकः कथ्यते। तथाच, उपमानोपमेययोः उत्कर्षापकर्षद्योतकवैशिष्ट्यकथनं व्यतिरेकः इत्युक्तम्। अत एवोक्तं विश्वनाथेन यथा, आधिक्यमुपमेयस्योपमानान्न्यूनताथवा। व्यतिरेक इति। तत्र उत्कर्षोदाहरणानि वक्ष्यमाणानि, अपकर्षोदाहरणं दर्पणकारेणोक्तम्। यथा, क्षीणः क्षीणोऽपि शशी भूयोभूयोऽभिवर्द्धते नित्यम्। विरम प्रसीद सुन्दरि! यौवनमनिवर्त्ति यातन्तु॥ अत्र उपमेयस्य यौवनस्य उपमानात् चन्द्रादचिरस्थायित्वेनापकर्षः॥ १८०॥

तत्रैकव्यतिरेकमाह धैर्य्येत्यादि। धैर्य्यम् अनौद्धत्यम् अनतिक्रान्तवेलत्वञ्च, लावण्यं सौन्दर्य्यं लवणमयत्वञ्च, गाम्भीर्य्यं दुरवगाहस्वभावत्वम् अगाधत्वञ्च इत्यादिभिर्गुणैः त्वम् उदन्वतः समुद्रस्य तुल्योऽसि केवलम् ईदृशेन अतिमनोहरेण इत्यर्थः वपुषा शरीरेण ते तव भेदः उदन्वत इति शेषः। अत्र एकत्र

अभिन्नवेलौ गम्भीरावम्बुराशिर्भवानपि ।
असावञ्जनसङ्काशस्त्वन्तु चामीकरद्युतिः ॥१८३॥
उभयव्यतिरेकोऽयमुभयोर्भेदकौ गुणौ ।
कार्ष्ण्यं पिशङ्गता चोभौ यत् पृथग्दर्शिताविह॥१८
त्वं समुद्रश्च दुर्वारौ महासत्त्वौ सतेजसौ ।
अयन्तु युवयोर्भेदः स जड़ात्मा पटुर्भवान् ॥१८५॥

उपमेये एव वर्त्तिना स्थितेन धर्मेण अतिमनोहरवपुष्वरूपेण उभयवर्त्तिनः उपमेयोपमानस्थितस्य भेदस्य उपमेयोत्कर्षस्य उपमानापकर्षस्य चेत्यर्थः प्रतीतिविषयप्राप्तेः प्रतीतत्वात् इत्यर्थः अयम् एकव्यतिरेकः, एकमात्रगतधर्मस्य एव उभयोर्भेदकत्वात् इति भावः ॥ १८१ ॥ १८२ ॥

उभयव्यतिरेकमुदाहरति अभिन्नेत्यादि। अम्बुराशिः भवान् अपि उभौ अभिन्नवेलौ अनतिक्रान्तमर्य्यादौ तथा गम्भीरौ दुरवगाहस्वभावः अगाधश्च इत्यर्थः। किन्तु असौ अम्बुराशिः अञ्जनसङ्काशः सामुद्रिकजलस्य कृष्णत्वादिति भावः, त्वन्तु चामीकरद्युतिः काञ्चनवर्णः अतिसुन्दर इत्यर्थः। इह उभयोः उपमानोपमेययोः कार्ष्ण्यं पिशङ्गता च इमौ उभौ भेदकौ भेदसाधने गुणौ यत् पृथक् दर्शितौ, अतः अयम् उभयव्यतिरेकः उभयनिष्ठत्वादनयोर्भेदकयोरिति भावः ॥ १८३ ॥ १८४ ॥

सश्लेषव्यतिरेकमुदाहरति त्वमित्यादि। त्वं समुद्रश्च दुर्वारौ दुर्धर्षः अवार्य्यवेगश्च, महासत्त्वौ सत्त्वगुणाधिकः प्रबलजलजन्तुश्च, सतेजसौ महाप्रतापः सवाड़वानलश्च इत्यर्थः, अयन्तु युवयोः भेदः स समुद्रः जड़ात्मा जलमयस्वरूपः अन्यत्र शीतल

स एष श्लेषरूपत्वात् सश्लेष इति गृह्यताम् ।
साक्षेपश्च सहेतुश्च दर्श्यते तदपि द्वयम् ॥ १८६ ॥
स्थितिमानपि धीरोऽपि रत्नानामाकरोऽपि सन् ।
तव कक्षां न यात्येव मलिनो मकरालयः ॥ १८७ ॥
वहन्नपि महीं कृत्स्नां सशैलद्वीपसागराम् ।
भर्त्तृभावाद् भुजङ्गानां शेषस्त्वत्तो निकृष्यते॥१८८॥

स्वभावः, भवांस्तु पटुः सुनिपुणः अन्यत्र अतिवेगवान् । अत्र भेदकयोः धर्मयोः श्लेषरूपत्वात् श्लिष्टत्वात् इत्यर्थः एषः सश्लेषव्यतिरेक इति न च अत्र साधारणधर्माणां श्लिष्टत्वे सश्लेषव्यतिरेक इति वाच्यं तथात्वे सर्वत्रैव सश्लेषव्यतिरेकत्वप्रसङ्गात् क्वचित् शब्दश्लेषस्य क्वचिद्वा अर्थश्लेषस्य सद्भावस्य दुर्वारत्वात् इति सुधीभिर्भाव्यम् । पुनश्च अस्य भेदद्वयं दर्श्यते साक्षेपः सहेतुश्च, उदाहरणे तु अनयोर्वक्ष्यमाणे इति ॥ १८५ ॥ १८६ ॥

साक्षेपव्यतिरेकमुदाहरति स्थितिमानिति । मकरालयः समुद्रः यतः मलिनः, अतः स्थितिमान् अनुल्लङ्घितमर्यादः अपि, धीरोऽपि गभीरोऽपि अन्यत्र दुरवगाहस्वभावोऽपि तथा रत्नानाम् आकरः उत्पत्तिस्थानमपि अन्यत्र गुणरत्नानाम् आधारोऽपि इत्यर्थः तव कक्षां सादृश्यं न यात्येव न प्राप्नोति एव । अत्र उपमानगतेन मालिन्यरूपधर्मेण साम्यप्राप्तेराक्षेपात् साक्षेपव्यतिरेकः ॥ १८७ ॥

सहेतुव्यतिरेकमाह वहन्निति । सशैलद्वीपसागरां कृत्स्नां समग्रां महीं वहन्नपि शेषः अनन्तः भुजङ्गानां पन्नगानाम् अथच विटानां, भुजङ्गो विटसर्पयोः इति कोषः । भर्त्तृभावात्

शब्दोपादानसादृश्यव्यतिरेकोऽयमीदृशः ।
प्रतीयमानसादृश्योऽप्यस्ति सोऽप्यभिधीयते ॥ १८९ ॥
त्वन्मुखं कमलञ्चेति द्वयोरप्यनयोर्भिदा ।
कमलं जलसंरोहि त्वन्मुखं त्वदुपाश्रयम् ॥ १९० ॥
अभ्रूविलासमस्पृष्टमदरागं मृगेक्षणम् ।
इदन्तु नयनद्वन्द्वं तव तद्गुणभूषितम् ॥ १९१ ॥

स्वामित्वात् त्वत्तः निकृष्यते निकृष्टो भवति। अत्र भुजङ्ग-पतित्वरूपधर्मस्य त्वदपेक्षया उपमानभूतानन्तापकर्षे हेतुल-कीर्त्तनात् सहेतुव्यतिरेकः ॥ १८८ ॥

इत्थं शब्दोपात्तसादृश्यव्यतिरेकमुक्त्वा प्रतीयमानसादृश्यं निरूपयति। शब्दोपादानेति शब्दस्य साधारणधर्मवाचकस्य उपादानेन यत् सादृश्यं तस्य व्यतिरेकः अयं पूर्वोक्तप्रकारः। प्रतीयमानं सादृश्यं यत्र तादृशोऽपि व्यतिरेकोऽस्ति अधुना सः अभिधीयते इत्यन्वयः ॥ १८९ ॥

त्वन्मुखमिति। तव मुखं कमलञ्च, अनयोर्द्वयोः इति भिदा भेदः, कमलं जलसंरोहि जलजं त्वन्मुखन्तु त्वदुपाश्रयं त्वदेकाधारम्। अत्र साधर्म्यस्य अप्रयोगेऽपि मुखकमलयोः साम्यं प्रसिद्धिवशात् प्रतीयते इति प्रतीयमानव्यतिरेकः ॥ १९० ॥

अभ्रूविलासेति। मृगस्य ईक्षणं नयनम् अभ्रूविलासं भ्रू-विलासरहितं तथा अस्पृष्टः मदरागो येन तादृशम् अप्राप्तमद्य-पानजनितलौहित्यमित्यर्थः, तव इदं नयनद्वयन्तु तद्गुणभूषितं भ्रूविलासयुक्तं स्पृष्टमदरागञ्च इत्यर्थः। अत्र उपमानमृगेक्षणो-पमेयनयनद्वयानां विरुद्धधर्मवत्त्वमेव दर्शितं सादृश्यं प्रतीय-मानव्यतिरेकः ॥ १९१ ॥

पूर्वस्मिन् भेदमात्रोक्तिरस्मिन्नाधिक्यदर्शनम्।
सदृशव्यतिरेकस्य पुनरन्यः प्रदर्श्यते॥ १९२॥
त्वन्मुखं पुण्डरीकञ्च फुल्ले सुरभिगन्धिनी।
भ्रमद्भ्रमरमम्भोजं लोलनेत्रं मुखन्तु ते॥ १९३॥
चन्द्रोऽयमम्बरोत्तंसो हंसोऽयं तोयभूषणम्।
नभो नक्षत्रमालीदमुत्फुल्लकुमुदं पयः॥ १९४॥

उक्तोदाहरणयोः फलं दर्शयति पूर्वस्मिन्निति। पूर्वस्मिन् उदाहरणे त्वन्मुखमित्यत्र भेदमात्रस्य उपमानोपमेययोर्भेदक-धर्ममात्रस्य उक्तिः, न तु उत्कर्षस्य अपकर्षस्य वा, भेदश्च द्विधा विरुद्धधर्माध्यासः कारणभेदश्च, अत्र तु कारणभेद एवेति बोध्यम्। अस्मिन् अव्यवहिते उदाहरणे अभ्रूविलासमित्यत्र आधिक्यस्य उपमानोपमेययोर्निकर्षोत्कर्षरूपस्य दर्शनम् अत्र तु विरुद्धधर्माध्यास एव भेदकारणमित्यवधेयम्। अन्यश्च सदृशव्यतिरेकः प्रदर्श्यते उदाह्रियते॥ १९२॥

सदृशव्यतिरेकं शाब्दमुदाहरति त्वन्मुखमिति। तव मुखं पुण्डरीकं पद्मञ्च फुल्ले विकसिते, फुल्लत्वमेकत्र स्मितशोभितत्वम् अन्यत्र प्रकाशमात्रं, तथा सुरभिगन्धिनी, अत्र फुल्लत्वसुरभि-गन्धित्वयोः साधारण्यात् सादृश्यमत्र शाब्दम्। अम्भोजं भ्रमन्तः भ्रमरा यस्मिन् तत्, ते मुखन्तु लोले नेत्रे यस्मिन् तादृशम्। अत्र असामान्यमपि भ्रमद्भ्रमरवत्त्वं लोलनेत्रत्वञ्च प्रायशः सदृशमेव न तु विरुद्धमिति सदृशव्यतिरेकोऽयं शाब्दः॥ १९३॥

सदृशव्यतिरेकमार्थमुदाहरति चन्द्र इति। अयम् अम्ब-

प्रतीयमानशौक्ल्यादिसाम्ययोश्चन्द्रहंसयोः ।
कृतः प्रतीतशुद्ध्योश्च भेदोऽस्मिन् वियदम्भसोः॥१९५॥
पूर्वत्र शब्दवत् साम्यमुभयत्रापि भेदकम् ।
भृङ्गनेत्रादितुल्यं तत् सदृशव्यतिरेकता ॥ १९६ ॥
अरत्नालोकसंहार्य्यमवार्य्यं सूर्य्यरश्मिभिः ।

रोत्तंसः आकाशभूषणं चन्द्रः, अयं हंसः तोयस्य भूषणम्, इदं नभः आकाशं नक्षत्रमालि ताराविराजितं, पयश्च उत्फुल्लानि कुमुदानि यस्मिन् तादृशम् । नभो नक्षत्रमालीदमिदमुत्कुमुदं पय इति च पाठः क्वचित् दृश्यते । अत्र चन्द्रहंसयोराकाशपयसोश्च उपमानोपमेययोः सादृश्यमर्थतः प्रतीयते इति सदृशव्यतिरेक आर्थः ॥ १९४ ॥

प्रतीयमानेति । अस्मिन् चन्द्रोऽयमित्यत्र उदाहरणे प्रतीयमानं वाचकशब्दाप्रयोगात् आर्थं शौक्ल्यादिसाम्यं ययोः तादृशयोः चन्द्रहंसयोः प्रतीता प्रसिद्धा शुद्धिर्ययोस्तथाभूतयोः वियदम्भसोः आकाशजलयोः उपमानोपमेययोः भेदः कृतः दर्शित इति सादृश्यस्य शब्दानुपात्तत्वात् सदृशव्यतिरेक आर्थ इति भावः ॥ १९५ ॥

पूर्वत्रेति । पूर्वत्र पूर्वस्मिन् त्वन्मुखमित्यत्र उदाहरणे उभयत्रापि उपमानोपमेययोरुभयोरपीत्यर्थः शब्दवत् शब्दोपात्तं साम्यं भेदकं, भृङ्गनेत्रादिभ्रमद्भ्रमरत्वं लोलनेत्रत्वञ्च तुल्यं विम्बानुविम्बतया सादृश्यबोधकं, तत् तस्मात् सदृशव्यतिरेकः शाब्द इति भावः ॥ १९६ ॥

सजातिव्यतिरेकं दर्शयति अरत्नेति । यूनां यौवनप्रभवं

दृष्टिरोधकरं यूनां यौवनप्रभवं तमः॥ १९७॥
सजातिव्यतिरेकोऽयं तमोजातेरिदं तमः।
दृष्टिरोधितया तुल्यं भिन्नमन्यैरदर्शि यत्॥ १९८॥

व्यतिरेकचक्रम्।

प्रसिद्धहेतुव्यावृत्त्या यत् किञ्चित् कारणान्तरम्।
यत्र स्वाभाविकत्वं वा विभाव्यं सा विभावना १९९

तमः मोहः अन्धकारश्च अरत्नालोकसंहार्य्यं रत्नानाम् आलोकेन असंहार्य्यं हर्त्तुमशक्यं सूर्य्यरश्मिभिः अवार्य्यम् अनाश्यं तथा दृष्टिः चक्षुः ज्ञानञ्च तस्या रोधः आवरणं तत्करम्। अत्र श्लेषेण तमःपदोपात्तयोर्मोहान्धकारयोर्विरुद्धधर्मत्वकीर्त्तनेऽपि दृष्टि-रोधकत्वसाम्यात् सजातिव्यतिरेकः॥ १९७॥

सजातिव्यतिरेकं घटयति सजातीति। यत् यस्मात् दृष्टि-रोधितया तुल्यम् इदं तमः मोहरूपम् अन्यैः साधारणधर्मैः रत्नालोकहार्य्यत्वादिभिः तमोजातेः अन्धकारजातितः भिन्नम् अदर्शि प्रदर्शितम्, अतः अयं सजातिव्यतिरेकः॥ १९८॥

विभावनां निरूपयति प्रसिद्धेति। यत्र वैचित्र्ये प्रसिद्धस्य विख्यातस्य हेतोः कारणस्य व्यावृत्त्या अभावप्रदर्शनेन यत् किञ्चित् कारणान्तरं वा स्वाभाविकत्वं स्वतःसिद्धत्वं विभाव्यं विशेषेण अभिनिवेशेन भाव्यं चिन्तनीयं सा विभावना। तथाच, प्रसिद्धं हेतुमन्तरेण फलोत्पत्तिदर्शनात् तस्य यत् किञ्चित् गूढ़कारणान्तरस्य वा तदनुपपत्त्या स्वाभाविकत्वस्य वा भावनावैचित्र्यं विभावनेति बोध्यम्। दर्पणकारस्तु, विभा-वना विना हेतुं कार्य्योत्पत्तिर्यदुच्यते, इत्याह॥ १९९॥

अपीतक्षीबकादम्बमसंमृष्टामलाम्बरम् ।
अप्रसादितशुद्धाम्बु जगदासीन्मनोहरम् ॥ २०० ॥
अनञ्जिताऽसिता दृष्टिभ्रूरनावर्जिता नता ।
अरञ्जितोऽरुणश्चायमधरस्तव सुन्दरि ! ॥ २०१ ॥
यदपीतादिजन्यं स्यात् क्षीबत्वाद्यन्यहेतुजम् ।
अहेतुकञ्च तस्येह विवक्षेत्यविरुद्धता ॥ २०२ ॥

कारणान्तरविभावनामाह अपीतेति। जगत् अपीताः अकृतमधुपानाः अथच क्षीबाः मत्ताः कादम्बाः हंसविशेषा यस्मिन् तत्, असंमृष्टं मार्जन्या अपरिष्कृतम् अथच अमलं निर्मलम् अम्बरम् आकाशं यस्मिन् तत्, तथा अप्रसादितं केनाप्यपरिष्कृतम् अथच शुद्धम् अम्बु जलं यस्मिन् तथाभूतम् अतएव अतिमनोहरम् आसीदित्यन्वयः। अत्र प्रसिद्धस्य क्षीबत्वकारणस्य पानस्य, अमलत्वकारणस्य मार्जनस्य, शुद्धिकारणस्य प्रसादनस्य असद्भावेऽपि तत्तत्फलोत्पत्तिः शरत्कालरूपं कारणान्तरं विभावयतीति कारणान्तरविभावना ॥ २०० ॥

स्वाभाविकत्वे विभावनामाह अनञ्जितेति। हे सुन्दरि! तव दृष्टिः अनञ्जिता अञ्जनेन अननुलिप्तापि असिता श्यामला, भ्रूः अनावर्जिता अनाकृष्टापि नता वक्रीकृता, अयमधरश्च अरञ्जितोऽपि अरुणः अत्र प्रसिद्धमसितत्वकारणम् अञ्जनं वक्रताकारणमार्जनम् अरुणताकारणं रञ्जनं तदभावेऽपि तत्तत्फलोपपत्तिः स्वाभाविकत्वमेव भावयतीति स्वाभाविकत्वविभावना ॥ २०१ ॥

उक्तयोरुदाहरणयोर्लक्षणं सङ्गमयन् विरोधं परिहरति यदिति। पूर्वोदाहरणे अपीतादिजन्यं पानाद्यजन्यमित्यर्थः

वक्त्रं निसर्गसुरभि वपुरव्याजसुन्दरम् ।
अकारणरिपुश्चन्द्रो निर्निमित्तासुहृत् स्मरः ॥२०३॥
निसर्गादिपदैरत्र हेतुः साक्षान्निवर्त्तितः ।
उक्तञ्च सुरभित्वादि फलं तत् सा विभावना ॥२०४

इति विभावनाचक्रम् ।

क्षीवत्वादि अन्यहेतुजं शरत्कालरूपकारणान्तरजन्यं, द्वितीयोदाहरणे अञ्जितत्वाद्यजन्यम् असितत्वादि अहेतुकं स्वाभाविकम् । इह उदाहरणद्वये तस्य अन्यहेतुजत्वस्य अहेतुकस्य च विवक्षा वक्तुमिच्छा इत्यतः अविरुद्धता विरोधाभावः । अयं भावः कारणाभावे कथं कार्य्योत्पत्तिः, कारणत्वस्य कार्य्याव्यवहितपूर्ववर्त्तित्वनियमात् कार्य्यत्वस्य कारणाव्यवहितोत्तरवर्त्तित्वनियमाच्च अतः आपाततः विरोधावगतावपि वक्तुरिच्छावशात् कारणान्तरस्य स्वभावरूपालौकिककारणस्य चानुसन्धानात् वैचित्र्यजनकत्वाच्च न विरोध इति सुधीभिर्विवेच्यम्॥२०२॥

पूर्वं स्वभावस्यार्थत्वमुक्तं सम्प्रति शाब्दं स्वाभाविकत्वमुदाहरति वक्त्रमित्यादि । वक्त्रं मुखं निसर्गेण स्वभावेन सुरभि सुगन्धि, वपुः शरीरम् अव्याजेन अकपटेन सुन्दरं स्वभावसुन्दरं न तु आहार्य्यशोभयेत्यर्थः, चन्द्रः अकारणरिपुः अहेतुकशत्रुः तथा स्मरः कामः निर्निमित्तासुहृत् अकारणशत्रुः अत्र निसर्गादिपदैः साक्षात्प्रत्यक्षीभूतः लौकिक इत्यर्थः हेतुः निवर्त्तितः, सुरभित्वादिरूपं फलञ्च उक्तं, तत् तस्मात् सा प्रसिद्धा शब्दगतस्वाभाविकत्वलक्षणा विभावना इति ॥ २०३ ॥ २०४ ॥

इति उक्तरूपं विभावनाचक्रं विभावनासमूहः ।

वस्तु किञ्चिदभिप्रेत्य तत्तुल्यस्यान्यवस्तुनः ।
उक्तिः संक्षेपरूपत्वात् सा समासोक्तिरिष्यते॥२

पिबन्मधु यथाकामं भ्रमरः फुल्लपङ्कजे ।
अप्यसन्नद्धसौरभ्यं पश्य चुम्बति कुट्मलम् ॥२०६

इति प्रौढाङ्गनाबद्धरतिलीलस्य रागिणः ।
कस्याञ्चिदपि बालायामिच्छावृत्तिर्विभाव्यते॥२०

समासोक्तिमाह वस्तु इति। किञ्चित् किमपि वस्तु अभि प्रेत्य संकल्प्य तत्तुल्यस्य तत्सदृशस्य अन्यस्य वस्तुनः उक्ति कथनं सा संक्षेपरूपत्वात् संक्षेपेण उक्तत्वात् समासोक्तिरिष्यते संक्षेपस्यैव समासत्वादिति। अयं भावः, द्वयोः प्रस्तुताप्रस्तु तयोः शब्देन प्रतिपादने भूयान् विस्तारः, स च न वैचित्र्य मावहतीति एकस्याप्रस्तुतस्य शब्देन प्रतिपादने व्यञ्जनया प्रस्तुतार्थस्य बोधनमतीवचमत्कारपदवीमारोहतीति संक्षेपो क्तिरिति। उक्तञ्च ध्वनिकृता, वाच्योऽर्थो न तथा स्वदते प्रती यमानः स यथेति। दर्पणकारस्तु समासोक्तिः समैर्यत्र कार्य लिङ्गविशेषणैः। व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तु इत्याह ॥ २०५ ॥

समासोक्तेः कार्यलिङ्गविशेषणघटितत्वात् प्रथमं कार्य घटितां समासोक्तिमुदाहरति पिबन्नित्यादि। भ्रमरः फुल्लपङ्क विकसितारविन्दे यथाकामं मधु पिबन् असन्नद्धसौरभ्यम् अ जातमधुगन्धम् अपि कुड्मलं चुम्बति पश्य। इत्यत्र प्रौढायाम् अङ्गनायाम् आबद्धा रतिलीला येन तादृशस्य रागिणः अनु रागवतः कामिनः कस्याञ्चित् बालायां मुग्धायाम् इच्छावृत्ति

विशेष्यमात्रभिन्नापि तुल्याकारविशेषणा ।
अस्त्यसावपराप्यस्ति भिन्नाभिन्नविशेषणा ॥ २०८ ॥
रूढ़मूलः फलभरैः पुष्णन्ननिशमर्थिनः ।
सान्द्रच्छायो महावृक्षः सोऽयमासादितो मया २०९
अनल्पविटपाभोगः फलपुष्पसमृद्धिमान् ।
सुच्छायः स्थैर्य्यवान् दैवादेष लब्धो मया द्रुमः २१०

अभिलाषोदयः विभाव्यते ध्वन्यते इति अप्रस्तुतात् भ्रमर-कार्य्यात् प्रस्तुतस्य कामुककार्य्यस्य प्रतीतिः ॥ २०६ ॥ २०७ ॥

विशेषणघटितभेदं दर्शयति विशेष्येति। विशेष्यमात्र विशेष्यपदमात्रं भिन्नं श्लेषाभावात् एकमात्रबोधकं यत्र सा तुल्याकारविशेषणा तुल्याकारं श्लेषवशात् वाच्यव्यङ्ग्योभयधर्म-बोधकं विशेषणं यत्र सा इत्येकविधा अस्ति, अपरा च भिन्नञ्च अभिन्नञ्च विशेषणं यत्र तादृशी इति द्वितीयाऽपि अस्ति॥२०८॥

यथाक्रममुदाहरणे दर्शयति रूढ़ इति। रूढ़ं प्रवृद्धं मूलं शिफा मूलधनञ्च यस्य सः, फलानां भरैः समूहैः बहुभिर्धनैश्च अनिशम् अर्थिनः पुष्णन् प्रतिपालयन्; तथा सान्द्रा घना छाया अनातपप्रदेशः कान्तिश्च यस्य तादृशः सः प्रसिद्धः अयं महान् वृक्षः मया आसादितः प्राप्तः ॥ २०९ ॥

अनल्पेति। अनल्पः, बहुलः विटपानां शाखानाम् आभोगः विस्तारः यस्य सः, फलानां पुष्पाणाञ्च समृद्धिः विद्यते अस्य सः, शोभना छाया अनातपप्रदेशः कान्तिश्च यस्य सः, तथा स्थैर्य्यवान् स्थैर्य्यं सारवत्त्वं तद्वान् दृढ़प्रतिज्ञश्च। उक्तञ्च, व्यवसायादचलनं स्थैर्य्यं विघ्ने महत्यपीति। एवम्भूतः एषः द्रुमः मया दैवात् लब्धः ॥ २१० ॥

उभयत्र पुमान् कश्चिद् वृक्षत्वेनोपवर्णितः ।
सर्वे साधारणा धर्माः पूर्वत्रान्यत्र तु द्वयम् ॥२११॥
निवृत्तव्यालसंसर्गो निसर्गमधुराशयः ।
अयमम्भोनिधिः कष्टं कालेन परिशुष्यते ॥२१२॥
इत्यपूर्वसमासोक्तिः पूर्वधर्मनिवर्त्तनात् ।
समुद्रेण समानस्य पुंसो व्यापत्तिसूचनात् ॥२१३॥

इति समासोक्तिचक्रम् ।

उभयत्र लक्षणं सङ्गमयति उभयत्रेति । उभयत्र पद्ययोः कश्चित् पुमान् वृक्षत्वेन उपवर्णितः, पूर्वत्र उदाहरणे सर्वे धर्माः साधारणाः श्लेषमूलत्वात् विशेष्यपदमात्रं श्लेषस्पर्शाभावात् भिन्नमिति । परत्रोदाहरणे तु द्वयम् आद्यद्वितीये विशेषणे श्लेषाभावाद् भिन्ने, तृतीयचतुर्थे श्लेषोपष्टम्भात् अभिन्ने इति भिन्नाभिन्नविशेषणत्वम् ॥ २११ ॥

अपूर्वसमासोक्तिमुदाहरति निवृत्तेत्यादि । निवृत्तः व्यालानां सर्पाणां खलानाञ्च संसर्गः यस्मात् सः, निसर्गेण स्वभावतः मधुराणां सुमिष्टजलानामाशयः आधारः अन्यत्र मधुरः मनोरमः आशयो यस्य सः, अयम् अम्भोनिधिः कालेन समयेन यमेन च परिशुष्यति शोषं नीयते विनाश्यते च कष्टं कष्टकरमेतदित्यर्थः । इत्यत्र पूर्वधर्मयोः व्यालसंसर्गित्वलवणजलत्वयोः निवर्त्तनात् अनुपादानेन तद्वैपरीत्यधर्मयोः कीर्त्तनादित्यर्थः समुद्रेण समानस्य पुंसः व्यापत्तिसूचनात् विनाशद्योतनात् अपूर्वा पूर्वविपरीता समासोक्तिरियमित्यन्वयः ॥ २१२ ॥ २१३ ॥

विवक्षा या विशेषस्य लोकसीमातिवर्त्तिनी ।
असावतिशयोक्तिः स्यादलङ्कारोत्तमा यथा ॥२१४॥
मल्लिकामालधारिण्यः सर्व्वाङ्गीणार्द्रचन्दनाः ।
क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नायामभिसरिकाः२१५
चन्द्रातपस्य बाहुल्यमुक्तमुत्कर्षवत्तया ।

अतिशयोक्तिमाह विवक्षेति । विशेषस्य प्रस्तुतवस्तुगतस्य उत्कर्षस्य लोकसीमा लोकमर्य्यादा तस्या अतिवर्त्तिनी अलौकिकचमत्कारशालिनी या विवक्षा उक्तिः, अत्र स्वार्थे सन्प्रत्ययो बोद्धव्यः । असौ अलङ्कारेषु उत्तमा सर्वालङ्कारश्रेष्ठा इत्यर्थः अतिशयोक्तिः स्यादित्यन्वयः । उक्तञ्चाग्निपुराणे, लोकसीमातिवृत्तस्य वस्तुधर्मस्य कीर्त्तनम् । भवेदतिशयो नाम सम्भवोऽसम्भवो द्विधेति ॥ २१४ ॥

अतिशयोक्तिमुदाहरति मल्लिकेति । अभिसारिकाः कान्तार्थिन्यः, कान्तार्थिनी तु या याति सङ्केतं साभिसारिकेति । मल्लिकानां माला मल्लिकामालं तस्य धारिण्यः, सर्वाङ्गीणं सर्वाङ्गव्याप्तम् आर्द्रं चन्दनं यासां ताः, तथा क्षौमं पट्टवसनं विद्यते यासां ताः परिहितश्वेतपट्टवसना इत्यर्थः, अतएव ज्योत्स्नायां न लक्ष्यन्ते । अत्र ज्योत्स्नावर्णनस्य प्रस्तुतत्वात् तस्याः श्वेतत्वं मल्लिकामालादिकृतनायिकाश्वेतत्वाभिन्नतया वर्णनात् समधिकत्वेन प्रतीयते, अथवा तादृशरजन्याम् अभिसारिकाणामलक्ष्यत्वासम्भवेऽपि अलक्ष्यत्वकथनात् प्रस्तुतायाः ज्योत्स्नायाः श्वेतत्वस्य सम्यगुत्कर्षः प्रतीयते ॥ २१५ ॥

उक्तोदाहरणे लक्षणं योजयति चन्द्रातपस्येति । अत्र

संशयातिशयादीनां व्यक्तौ किञ्चिन्निदर्श्यते ॥२१

स्तनयोर्जघनस्यापि मध्ये मध्यं प्रिये ! तव ।

अस्ति नास्तीति सन्देहो न मेऽद्यापि निवर्त्तते ॥२

निर्णेतुं शक्यमस्तीति मध्यं तव नितम्बिनि ! ।

अन्यथा नोपपद्येत पयोधरभरस्थितिः ॥ २१८ ॥

अहो विशालं भूपाल ! भुवनत्रितयोदरम् ॥

चन्द्रातपस्य ज्योत्स्नायाः उत्कर्षवत्तया बाहुल्यं गाढ़त्वमुक्तम्। इदानीं संशयातिशयादीनां व्यक्तौ व्यक्तीकरणे किञ्चित् निदर्श्यते उदाह्रियते इत्यन्वयः ॥ २१६ ॥

संशयातिशयोक्तिमुदाहरति स्तनयोरिति। हे प्रिये ! तव मध्यं स्तनयोः विपुलयोरिति शेषः, जघनस्यापि विपुलस्येति शेषः मध्ये अस्ति वा नास्ति इति सन्देहः मे मम अद्यापि अस्तीति ज्ञाने सत्यपीत्यर्थः न निवर्त्तते। अत्र तथाविधसंशयस्य अभावनीयत्वेऽपि तत्कल्पनात् मध्यदेशस्याति क्षीणत्वं ध्वन्यते इति संशयमूलातिशयोक्तिः ॥ २१७ ॥

निर्णयातिशयोक्तिमुदाहरति निर्णेतुमिति। हे नितम्बिनि ! तव मध्यं निर्णेतुं शक्यम् अस्ति अन्यथा पयोधरयोः स्तनयोः भरस्य स्थितिः न उपपद्येत मध्यं नास्ति चेत् कथं पयोधरौ तदुपरि वर्त्तताम्। अत्र पयोधरयोर्निरवलम्बनस्थित्यनुपपत्तेः मध्यदेशस्य अस्तित्वनिर्णयासम्बन्धेऽपि तत्कल्पनेन अतिक्षीणत्वनिर्णयात् निर्णयातिशयोक्तिरियम्॥२१८॥

आश्रयाधिक्ये अतिशयोक्तिं दर्शयति अहो इति। हे भूपाल ! भुवनत्रितयोदरं त्रिभुवनाभोग इत्यर्थः विशालम्

भाति मातुमशक्योऽपि यशोराशिर्यदत्र ते ॥२१९॥
अलङ्कारान्तराणामप्येकमाहुः परायणम् ।
वागीशमहितामुक्तिमिमामतिशयाह्वयाम् ॥२२०॥

इति अतिशयोक्तिचक्रम् ।

अन्यथैव स्थिता वृत्तिश्चेतनस्येतरस्य वा ।
अन्यथोत्प्रेक्ष्यते यत्र तामुत्प्रेक्षां विदुर्यथा ॥२२१॥

अहो इति आश्चर्य्यसूचकमव्ययम् । त्रिभुवनस्य विशालत्वमत्याश्चर्य्यमित्यर्थः । यद् यस्मात् अत्र त्रिभुवनोदरे मातुमशक्योऽपि ते यशोराशिः भाति पर्य्याप्ततां गच्छति । अत्र आश्रयस्य त्रिभुवनोदरस्य विशालत्वप्रतिपादनेन आश्रितस्य यशोराशेराधिक्यवर्णनात् आश्रयाधिक्यातिशयोक्तिः ॥ २१९ ॥

अस्या अलङ्कारोत्तमत्वं दर्शयति । अलङ्कारेति वागीशमहितां वाक्पतिपूजिताम् इमाम् अतिशयाह्वयाम् अतिशयाख्याम् उक्तिम् अतिशयोक्तिमित्यर्थः अलङ्कारान्तराणाम् अन्येषाम् अलङ्काराणाम् अपि एकं परायणम् परमाश्रयम् आहुः कवय इति शेषः, अस्या एव वैचित्र्यातिशयमहिम्ना सर्वेषामलङ्काराणां प्रादुर्भावादिति भावः, वैचित्र्यातिशयाभावे विद्यमानानामपि उपमादीनां नालङ्कारता यथा गौरिव गवय इत्यादि । उक्तञ्च, कस्याप्यतिशयस्योक्तिरित्यन्वर्थविचारणात् । प्रायेणामी अलङ्कारा भिन्ना नातिशयोक्तित इति ॥ २२० ॥

अथोत्प्रेक्षां निरूपयति अन्यथेति । चेतनस्य इतरस्य अचेतनस्य वा प्रस्तुतस्य अन्यथा अन्येन प्रकारेण स्थिता वृत्तिः स्वाभाविकी वृत्तिः गुणक्रियादिषु यत्र वैचित्र्येण अन्यथा अन्य-

मध्यन्दिनार्कसन्तप्तः सरसीं गाहते गजः।
मन्ये मार्त्तण्डगृह्याणि पद्मान्युद्धर्त्तुमुद्यतः॥२२

प्रकारेण अप्रस्तुतस्वरूपत्वेन उत्प्रेक्ष्यते सम्भाव्यते तामुत्प्रे विदुः। यत्नेत्यत्र यत्किति पाठे क्रियाविशेषणम्। यदु प्रेक्षणमित्यर्थः। उक्तञ्च प्रकाशकारेण, सम्भावनमथोत्प्रे इति। सम्भावनं हि उत्कटकोटिकः संशयः, तच्च प्रस्तुत निगरणेन भवति, निगरणञ्च क्वचित् प्रस्तुतस्य अनुपादा क्वचिदुपात्तस्यापि अधःकरणम्। यथा, विषयस्यानुपादाने ऽप्युपादानेऽपि सूरयः। अधःकरणमात्रेण निगीर्णत्वं प्रचक्ष इति। दर्पणकारस्तु भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना वाच्या प्रतीयमाना सेति लक्षणं कृत्वा जातिगततया चास्य विविधभेदानाह॥ २२१॥

चेतनागतामुत्प्रेक्षामुदाहरति मध्येति। मध्यन्दिनार्के मध्याह्नसूर्य्येण सन्तप्तः गजः सरसीं गाहते अवतरति। अत्रोत् प्रेक्ष्यते मन्ये इति, मार्त्तण्डगृह्याणि सूर्य्यपक्षान् पद्मानि उ र्त्तुम् उन्मूलयितुम् उद्यतः इति मन्ये सम्भावयामीत्यर्थः। अ सन्तप्तस्य चेतनस्य गजस्य स्नानपानाद्यर्थकतया स्थितं सरो गाहनं शत्रुपक्षोद्धरणार्थत्वेनोत्प्रेक्षितम्। मन्ये इति पदमु प्रेक्षाव्यञ्जकम्। अत्र च सन्तापकस्य प्रतीकाराक्षमेण गजे तत्पक्षस्योद्धरणात् प्रत्यनीकालङ्कारः। तदुक्तं, प्रत्यनीकमशक्ते प्रतीकारे रिपोर्यदि। तदीयस्य तिरस्कारस्तस्यैवोत्कर्षसाध इति। तदनयोः सङ्कर इति कैश्चिदुक्तं तन्न मनोरमं तत्पक्षो द्धरणस्य सम्भावनामात्रविषयत्वेन कविनोक्तत्वेन अतात्त्वि त्वात्, यत्र तु तत्पक्षापकारस्तात्त्विकस्तत्रैव तदलङ्कार इ सुधीभिश्चिन्तनीयम्॥ २२२॥

स्नातुं पातुं विसान्यत्तुं करिणो जलगाहनम् ।
तद्वैरनिष्क्रयायेति कविनोत्प्रेक्ष्य वर्ण्यते ॥२२३॥
कर्णस्य भूषणमिदं ममायतिविरोधिनः ।
इति कर्णोत्पलं प्रायस्तव दृष्ट्या विलङ्घ्यते ॥२२४॥
अपाङ्ग-भागपातिन्या दृष्टेरंशुभिरुत्पलम् ।
स्पृश्यते वा न वेत्येवं कविनोत्प्रेक्ष्य वर्ण्यते॥२२५॥
लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
इतीदमपि भूयिष्ठमुत्प्रेक्षालक्षणान्वितम् ॥ २२६ ॥

लक्षणं घटयति स्नातुमिति । करिणः स्नातुं पातुं विसानि च अत्तुं भक्षयितुं जलगाहनं कविना तस्य वैरनिष्क्रयाय इति उत्प्रेक्ष्य सम्भाव्य वर्ण्यते ॥ २२३ ॥

अचेतनगतामुत्प्रेक्षामुदाहरति कर्णस्येत्यादि । तव दृष्ट्या मम आयतिः दैर्घ्यं तस्य विरोधिनः बाधकस्य कर्णस्य इदं भूषणम् इति कर्णोत्पलं विलङ्घ्यते प्रायः निजांशुभिः ताड्यते इव, प्राय इति उत्प्रेक्षाव्यञ्जकम् । अत्र अपाङ्गभागपातिन्याः आकर्णायतायाः दृष्टेः अंशुभिः उत्पलं स्पृश्यते वा न वा इति असन्नपि विषयश्चमत्कारजनकत्वेन कविना उत्प्रेक्ष्य सम्भाव्य वर्ण्यते । उत्प्रेक्षाद्योतकेवादिप्रयोगाभावेऽपि क्वचित् प्रतीयमानोत्प्रेक्षा भवतीत्युक्तं दर्पणकारेण उदाहृतञ्च तेनैव । यथा, तन्वङ्ग्याः स्तनयुग्मेन मुखं न प्रकटीकृतम् । हाराय गुणिने स्थानं न दत्तमिति लज्जयेति । अत्र स्तनयोरचेतनत्वेन लज्जाया असम्भवात् लज्जयेवेत्युत्प्रेक्षा ॥ २२४ ॥ २२५ ॥

लिम्पतीति । श्लोकार्द्धमिदम्, असत्पुरुषसेवेव दृष्टिर्विफलतां

केषाञ्चिदुपमाभ्रान्तिरिव श्रुत्येह जायते ।
नोपमानं तिङन्तेनेत्यतिक्रम्याप्तभाषितम् ॥ २२७
उपमानोपमेयत्वं तुल्यधर्मव्यपेक्षया ।
लिम्पतेस्तमसश्चासौ धर्मः कोऽत्र समीच्यते॥२२८

गतेत्यपरार्द्धं मृच्छकटिकनाटके वर्षावर्णनप्रकरणोक्तम्। तमः अन्धकारम् अङ्गानि शरीराणि लिम्पतीव, नभः आकाशम् अञ्जनं वर्षतीव। इतीदमपि पद्यार्द्धं भूयिष्ठं सम्यक् उत्प्रेक्षाया लक्षणेन अन्वितं युक्तम्। अत्र अचेतनस्य तमसः व्यापनरूपो धर्मः लेपनत्वेन तथा तादृशस्य तमसः सम्पातरूपो धर्मो नभः-कर्तृकाञ्जनवर्षणरूपत्वेन सम्भावित इति उभयत्रैव विषयस्या-नुपादानम् ॥ २२६ ॥

मन्ये शङ्के इत्यादिपदप्रयोगे एवोत्प्रेक्षा इव प्रयोगेतूप-मैवेति केषाञ्चिन्मतं दूषयति केषाञ्चिदिति। इह लिम्पतीति पद्ये इवश्रुत्या इवशब्दप्रयोगेण तिङन्तेन उपमानं न इति आप्तानां प्रामाणिकानां सुधियां भाषितं वचनम् अतिक्रम्य अनादृत्य केषाञ्चित् अज्ञानामित्यर्थः उपमाभ्रान्तिः उपमा-लङ्कार एवात्रेति भ्रमः जायते इत्यन्वयः। अयं भावः उप-मानस्य सिद्धत्वं साध्यत्वञ्च उभयोर्भेदकम्। उपमायाम् उप-मानस्य सिद्धत्वमावश्यकम् इह तु साध्यत्वम्। तथाच तिङन्त-पदप्रतिपाद्यस्य लेपनस्य वर्षणस्य च साध्यत्वान्नात्रोपमाशङ्केति। उक्तञ्च, सिद्धमेव समानार्थमुपमानं विधीयते। तिङन्तार्थन्तु साध्यत्वादुपमानं न जायते इति ॥ २२७ ॥

उपमाशङ्कानिराशाय युक्तिमपि दर्शयति उपमानोपमेय-त्वमिति। तुल्यधर्मस्य समानगुणादिरूपसाधारणधर्मस्य व्यपे-

यदि लेपनमेवेष्टं लिम्पतिर्नाम कोऽपरः ।
स एव धर्मो धर्मी चेत्युन्मत्तोऽपि न भाषते २२९
कर्त्ता यद्युपमानं स्यात् न्यग्भूतोऽसौ क्रियापदे ।
स्वक्रियासाधनव्यग्रो नालमन्यदपेक्षितुम् ॥ २३० ॥

च्छया अनुरोधेन उपमानोपमेयत्वं भवतीति शेषः। अत्र लिम्पतेः लिम्पतीति क्रियावाचकस्य पदस्य, नामत्वानुकरणात् षष्ठीति बोध्यम्। तमसश्च असौ धर्मः साधारण इत्यर्थः। कः समीच्यते लक्ष्यते न कोऽपीत्यर्थः तस्मात् साधर्म्याभावाच्च नोपमाशङ्केति भावः ॥ २२८ ॥

पुनश्चापत्तिमुद्भावयन् खण्डयति यदीति। यदि लेपनमेव इष्टं साधारणधर्मतया अभिलषितं तदा लिम्पतिः नाम अपरः साधारणधर्मवान् उपमानरूपो धर्मीत्यर्थः कः न कोऽपीत्यर्थः। वैयाकरणैर्व्यापारस्यैव विशेष्यतया तिङन्तपदप्रतिपाद्यत्वेनोक्तत्वात्। तदुक्तं, फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः। फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणमिति। तथाच, लेपनस्यैव धर्मित्वं न तु धर्मत्वमिति व्यक्तीकृतम्। लिम्पतिरित्यत्र अनुकरणे प्रथमेति बोध्यम्। ननु एकस्यैव लेपनस्य धर्मित्वं धर्मत्वञ्चास्तु इत्याशङ्क्याह स एवेति। स एव लिम्पतिरेव धर्मो धर्मी चेति उन्मत्तोऽपि वातुलोऽपि न भाषते, उन्मत्तेनापि एकस्य धर्मित्वं धर्मत्वं नोच्यते का कथा सुधियामिति भावः ॥ २२९ ॥

पुनरप्यापत्तिं खण्डयति कर्त्तेति। यदि कर्त्ता तिङा प्रतिपाद्यः लेपनरूपव्यापाराश्रयः उपमानं स्यात् तमस उपमानत्वेन मन्येत, तदपि न इति शेषः, यतः असौ कर्त्ता

यो लिम्पत्यमुना तुल्यं तम इत्यपि शंसतः ।
अङ्गानीति न सम्बद्धं सोऽपि मृग्यः समो गुणः२३
यथेन्दुरिव ते वक्त्रमिति कान्तिः प्रतीयते ।

क्रियापदे व्यापाररूपे न्यग्भूतः विशेषणत्वात् तिरस्कृतः, तिङर्थस्य विशेषणत्वं पूर्वमुक्तम् । न हि विशेषणमुपमानं भवति विशेषणस्य साध्यतया उपमानस्य च सिद्धतया सर्वसम्मतत्वादिति भावः । तथाहि, स्वक्रियाया लेपनरूपायाः साधने व्यग्रः व्यापृतः असौ कर्त्ता अन्यत् कार्य्यान्तरम् अपेक्षितुं द्रष्टुं साधयितुमित्यर्थः न अलं न समर्थः । अयं भावः, एकस्याधीनो यथा अन्यस्य कार्य्यं न कर्त्तुं शक्नोति तथा एकस्य विशेषणतया अधीनः कर्त्ता अन्यस्य उपमानरूपविशेषणतामाप्तुं न प्रभवतीति । उक्तञ्च दीधितिकारेण, इतरविशेषणत्वेनोपस्थितस्यान्यत्र विशेषणत्वेनान्वयायोगादिति । अतो नात्र कर्त्तुरुपमानत्वं सङ्गच्छत इति ॥ २३० ॥

तिङर्थप्राधान्यवादिनैयायिकमतानुसारिणीमपि आपत्तिं खण्डयति य इति । यो लिम्पति, तमः अमुना तुल्यम्, अत्र यदद:शब्दप्रयोग उपमानोपमेयत्वसूचकः, इत्यपि शंसतः कथयतः वादिनः मते इति शेषः, अङ्गानि इति कर्मपदं न न सम्बद्धं न सङ्गतम् उपमेयतमःकर्त्तृकतदन्वययोग्यक्रियान्तराभावात् उपमेयांशे अनन्वयाच्चेति । ननु अङ्गकर्मकलेपनकर्त्तृ तम इत्येवं शाब्दबोधे का क्षतिरिति चेत् तत्राह स इति । सः समः साधारणः गुणोऽपि मृग्यः अन्वेष्टव्यः अवश्यं वाच्य इत्यर्थः तदप्रयोगे उपमाया असम्भवादिति भावः ॥२३१॥

ननु साधारणधर्माप्रयोगे लुप्तोपमापि भवतीति चेत्

न तथा लिम्पतौ लेपादन्यदत्र प्रतीयते ॥ २३२ ॥
तदुपश्लेषणार्थोऽयं लिम्पतिर्ध्वान्तकर्त्तृकः ।
अङ्गकर्मा च पुंसैवमुत्प्रेच्यत इतीष्यताम् ॥ २३३ ॥
मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः ।
उत्प्रेचा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः ॥ २३४ ॥
इति उत्प्रेचाचक्रम् ।

तत्राह यथेति । ते वक्त्रम् इन्दुरिव इत्यत्र यथा कान्तिः सौन्दर्य्यं साधारणधर्मतया प्रतीयते अत्र लिम्पतौ लेपात् अन्यत् किमपि तथा तद्वत् न प्रतीयते । तथाच, साधारण-धर्माप्रयोगेऽपि यत्र सादृश्यस्य प्रसिद्धतया साधारणधर्मस्य स्फुटत्वं तत्रैव लुप्तोपमा, अत्र तु तमसः लेपनकर्त्तुश्च न तथा-त्वमिति काचिद् विप्रतिपत्तिरिति भावः ॥ २३२ ॥

उपसंहरति तदिति । तत् तस्मात् उपश्लेषणं व्यापनमेव अर्थो यस्य तथाभूतः ध्वान्तकर्त्तृकः तमःकर्त्तृकः तथा अङ्गकर्मा अयं लिम्पतिः लेपनक्रिया पुंसा कविनिबन्धनवक्त्रा उत्प्रेच्यते सम्भाव्यते इति इष्यताम् इष्टत्वेन गृह्यताम् । तथाच, तमः-कर्त्तृकमङ्गव्यापनम् उत्प्रेचाया विषयः लेपनञ्च विषयि, ततश्च प्रस्तुतस्तमोव्यापनरूपो विषयः अप्रस्तुततादृशलेपन-रूपविषयित्वेन उत्प्रेच्यते न तूपमानभूतेन तेन उपमीयते इति भाष्यम् ॥ २३३ ॥

इवशब्दस्य उत्प्रेचाया व्यञ्जकत्वमाह मन्ये इति । मन्ये इत्यादिभिः शब्दैः उत्प्रेचा व्यज्यते, इवशब्दोऽपि तादृश उत्-प्रेचाव्यञ्जक इत्यर्थः ॥ २३४ ॥

हेतुश्च सूक्ष्मलेशौ च वाचामुत्तमभूषणम् ।
कारकज्ञापकौ हेतू तौ चानेकविधौ यथा ॥२३५

अयमान्दोलितप्रौढ़चन्दनद्रुमपल्लवः ।

हेतुसूक्ष्मलवाख्यानलङ्कारानुद्दिशति हेतुरिति । हेतु सूक्ष्मः तथा लेशः लव इत्युद्देशवाक्येनोक्तः एते त्रयः वाचाम् उत्तमभूषणम् उत्कृष्टालङ्काराः एतेषामलङ्कारत्वमनङ्गीकुर्वतो भामहादीन् प्रति कटाक्षोक्तिरियम् । तत्र हेतू द्विविधौ कारकः ज्ञापकश्च हेतुत्वञ्च, सिषाधयिषितार्थसाधकत्वम् । उक्तञ्च, सिषाधयिषितार्थस्य हेतुर्भवति साधकः । कारको ज्ञापक इति द्विधा सोऽप्युपजायते । प्रवर्त्तते कारकाख्यः प्राक् पश्चात् कार्य्यजन्मतः । पूर्वः शेष इति ख्यातस्तयोरेव विशिष्यता । कार्य्यकारणभावाद् वा स्वभावाद् वा नियामकात् । अविनाभावनियमादविनाभावदर्शनात् । ज्ञापकस्य च भेदोक्तिर्वेद्या पूर्वोक्तिदर्शनात् इति । भोजराजेनाप्युक्तं, यः प्रवृत्तिं निवृत्तिश्च प्रयुक्तिश्चान्तराविशन् । उदासीनोऽपि वा कुर्य्यात् कारकं तं प्रचक्षते । द्वितीया च तृतीया च चतुर्थी सप्तमी च यम् । क्रियानाविष्टमाचष्टे लक्षणं ज्ञापकश्च सः इति । तौ च कारकज्ञापकौ अनेकविधौ बहुप्रकारौ उदाहरणेषु ज्ञातव्यौ इति शेषः अस्मिंश्च हेत्वलङ्कारे मतान्तरोक्तस्य काव्यलिङ्गस्य कार्य्यकारणभावोक्तार्थान्तरन्यासस्य तथा अनुमानस्य अन्तर्भावात् न पृथगुक्तिरिति बोध्यम् । दर्पणकारस्तु अभेदेनाभिधा हेतुर्हेतोर्हेतुमता सहेति लक्षणमाह । स चास्मिन् मते अतिशयोक्तिरेवेति ध्येयम् ॥ २३५ ॥

कारकहेतुमुदाहरन्नाह अयमित्यादि अयम् आन्दोलिताः

उत्पादयति सर्वस्य प्रीतिं मलयमारुतः ॥ २३६ ॥
प्रीत्युत्पादनयोग्यस्य रूपस्यात्रोपबृंहणम् ।
अलङ्कारतयोद्दिष्टं निवृत्तावपि तत्समम् ॥ २३७॥
चन्दनारण्यमाधूय स्पृष्ट्वा मलयनिर्झरान् ।
पथिकानामभावाय पवनोऽयमुपस्थितः ॥ २३८ ॥
अभावसाधनायालमेवम्भूतो हि मारुतः ।
विरहज्वरसम्भूतमदनाग्न्यातुरे जने ॥ २३९ ॥

आधूताः प्रौढ़ाः परिणताः चन्दनद्रुमस्य पल्लवा येन तादृशः मलयमारुतः सर्वस्य प्रीतिम् उत्पादयति। अत्र मलयमारुतस्य प्रीत्युत्पादने कारकत्वम् आन्दोलितेत्यादिविशेषणवत्तया समधिकं वैचित्र्यमावहति सहृदयानामिति। अत्र प्रीत्युत्पादनयोग्यस्य रूपस्य वैचित्र्यजनकतया कीर्त्तनम् अलङ्कारतया उद्दिष्टं कथितं तत् उपबृंहणं निवृत्तावपि निषेधेऽपि समं तुल्यम्। यथा, मुग्धे! तव मुखामोदलोलुपो मधुपो भ्रमन्। कर्णिकाकमलं फुल्लमपि नाभिसरत्ययमिति। अत्र अभिसरणक्रियाया निषेधः ॥ २३६ ॥ २३७ ॥

पूर्वं भावसाधने उदाहरणं दर्शयित्वा इदानीम् अभावसाधनाय उदाहरति चन्दनेति। अयं पवनः चन्दनारण्यं चन्दनवनम् आधूय कम्पयित्वा, तथा मलयनिर्झरान् स्पृष्ट्वा पथिकानाम् अभावाय नाशाय उपस्थितः तादृशस्य पवनस्य विरहिणामतीव दुःसहत्वादिति भावः ॥ २३८ ॥

अभावेति। एवम्भूतः उक्तगुणसमन्वितः मारुतः विरहज्वरेण सम्भूतः यः मदनाग्निः तेन आतुरे जने अत्र षष्ठ्यर्थे

निर्वर्त्त्ये च विकार्य्ये च हेतुत्वं तदपेक्षया ।
प्राप्येतु कर्मणि प्रायः क्रियापेक्षैव हेतुता ॥ २४० ॥
हेतुर्निर्वर्त्तनीयस्य दर्शितः शेषयोर्द्वयोः ।

सप्तमी । तादृशस्य जनस्य इत्यर्थः अभावसाधनाय अलं समर्थः, अत्र अभावसाधको हेतुरिति भावः ॥ २३९ ॥

हेतुत्वस्य क्रियाकर्मोभयापेक्षिता, तत्र क्रियापेक्षित्वे उदाहृतं सम्प्रति कर्मापेक्षित्वमाह निर्वर्त्त्ये चेति । निवर्त्त्ये च विकार्य्ये च कर्मणि तदपेक्षया हेतुत्वं तत्तत्कर्मापेक्षी हेतुरित्यर्थः, प्राप्ये तु कर्मणि प्रायः बाहुल्येन हेतुता क्रियापेक्षैव क्रियापेक्षी हेतुरित्यर्थः । तत्र निर्वर्त्त्यं पूर्वमसदेव क्रियया जन्यम् अथवा पूर्वं सदेव क्रियया प्रकाश्यमानमिति द्विविधम् । यथा, कटं करोति, पुत्रं प्रसूते इत्यादि । विकार्य्यं क्रियया रूपान्तरमापाद्यमानम् । यथा, काष्ठं दहति सुवर्णं कुण्डलं करोति इत्यादि । दहति भस्मीकरोतीति भस्मैव काष्ठस्य रूपान्तरं बोध्यम् । उक्तञ्च, यदसज्जायते पूर्वं जन्मना यत् प्रकाशते । तन्निर्वर्त्त्यं विकार्य्यञ्च कर्म द्वेधा व्यवस्थितम् । प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत् । किञ्चिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् इति । प्राप्यन्तु क्रियाव्याप्तमेव न तु विकृत्यादिगुणान्तरितम् । तदुक्तं, क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते । दर्शनादनुमानाद् वा तत् प्राप्यमिति कथ्यते इति । जौमरास्तु अनीप्सितमपि कर्मेच्छन्ति । यथा, दुःसंसर्गं परिहरतीत्यादि । अत्रापि क्रियापेक्षो हेतुरिति बोध्यम् ॥ २४० ॥

हेतुरिति । निर्वर्त्तनीयस्य कर्मणः हेतुः दर्शितः अय-

इत्त्वोदाहरणद्वन्द्वं ज्ञापको वर्णयिष्यते ॥ २४१ ॥

उत्प्रवालान्यरण्यानि वाप्यः संफुल्लपङ्कजाः ।
चन्द्रः पूर्णश्च कामेन पान्थदृष्टेर्विषं कृतम् ॥ २४२ ॥

मानयोग्यां करोमीति प्रियस्थानस्थितां सखीम् ।
बाला भ्रूभङ्गजिह्माक्षी पश्यति स्फुरिताधरा ॥ २४३ ॥

मान्दोलितेत्याद्युदाहरणे इति शेषः । शेषयोः उक्तावशिष्टयोः द्वयोः विकार्य्यप्राप्ययोरित्यर्थः उदाहरणद्वन्द्वं दत्वा दर्शयित्वा ज्ञापको हेतुः वर्णयिष्यते । प्रतिज्ञेयं शिष्याणामुत्कण्ठावारणायेति बोध्यम् ॥ २४१ ॥

विकार्य्यहेतुं दर्शयति उत्प्रबालानीति । अरण्यानि उत्प्रवालानि उद्गतपल्लवानि, वाप्यः दीर्घिकाः संफुल्लानि पङ्कजानि यासु ताः, तथा चन्द्रः पूर्णश्च, अतः कामेन पान्थदृष्टेः पथिकनयनस्य विषं कृतम् उक्तानामेव त्रयाणामतीवोद्दीपकतया सन्तापकत्वादिति भावः । अत्र उक्तत्रयं विषं कृतं विषीभावरूपं विकारमापादितमिति आरोपरूपवैचित्र्यस्यैव हेत्वलङ्कारत्वम् अनेवंविधे सुवर्णं कुण्डलं करोतीत्यादौ विकारस्य सत्यतया वैचित्र्याभावान्नालङ्कारतेति बोध्यम् ॥ २४२ ॥

प्राप्यहेतुं दर्शयति मानयोग्यामिति । बाला मुग्धा काचित् भ्रुवोर्भङ्गेन जिह्मे अक्षिणी यस्याः सा, तथा स्फुरितः कम्पितः अधरो यस्यास्तादृशी सती मानयोग्यां मानाभ्यासम् अभ्यासः खुरली योग्येत्यमरमाला । करोमीत्यभिप्रेत्येति शेषः प्रियस्य स्थाने सकाशे स्थितां सखीं पश्यति निरीक्षते । अत्र सखीमिति प्राप्यकर्मापेक्षी बालायास्तादृशसकोपनिरीक्षणे हेतुरिति बोध्यम् ॥ २४३ ॥

गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः ।
इतीदमपि साध्वेव कालावस्थानिवेदने ॥ २४४ ॥
अवध्यैरिन्दुपादानामसाध्यैश्चन्दनाम्भसाम् ।
देहोष्मभिः सुबोधं ते सखि ! कामातुरं मनः ॥ २४५ ॥
इति लक्ष्याः प्रयोगेषु रम्या ज्ञापकहेतवः ।
अभावहेतवः केचिद् व्याह्रियन्ते मनोहराः ॥ २४६ ॥

ज्ञापकहेतुमुदाहरति गत इति। अर्कः अस्तं गतः, इन्दुः भाति, पक्षिणः वासाय वासस्थानाय यान्ति गमनार्थयोगे कर्मणि चतुर्थी। इति उक्तरूपम् इदं गतोऽस्तमर्क इत्यादिकं कालावस्थायाः कालविशेषस्य सन्ध्याया इत्यर्थः निवेदने ज्ञापने साधु एव वैचित्र्यजनकत्वात् उत्कृष्टोपाय इत्यर्थः, अर्कस्यास्तमितत्वादिः ज्ञापको हेतुः, ज्ञाप्या च सन्ध्या अत्र तु ज्ञाप्यस्य अशब्दत्वात् प्रतीयमानत्वम्। सन्ध्या वर्त्तते इत्यादौ तु नालङ्कारता वैचित्र्याभावादिति बोध्यम् ॥ २४४ ॥

ज्ञाप्यस्य शाब्दत्वे उदाहरति अवध्यैरिति। हे सखि! ते तव कामातुरं विरहाकुलं मनः इन्दुपादानां चन्द्रकिरणानाम् अवध्यैः अनाश्यैः, तथा चन्दनाम्भसां चन्दनाक्तजलानाम् असाध्यैः अप्रतिकार्य्यैः देहस्य उष्मभिः सन्तापैः सुबोधं सुखेन ज्ञेयम्। अत्र कामातुरं मनोरूपं ज्ञाप्यं शब्दं देहतापाश्च ज्ञापकाः। अत्र च वैचित्र्यविशेषवत्त्वा एवास्यालङ्कारस्य विषय इति ॥ २४५ ॥

इतीति। इति एवंरूपाः ज्ञापकहेतवः रम्याः सहृदयचमत्कारकाः प्रयोगेषु कवीनां निबन्धेषु लक्ष्याः ज्ञातव्याः

अनभ्यासेन विद्यानामसंसर्गेण धीमताम् ।
अनिग्रहेण चाक्षाणां जायते व्यसनं नृणाम्॥२४७॥
गतः कामकथोन्मादो गलितो यौवनज्वरः ।
गतो मोहश्च्युता तृष्णा कृतं पुण्याश्रमे मनः॥२४८॥

अभावरूपाः मनोहराः केचित् हेतवश्च व्याक्रियन्ते उच्यन्ते ॥ २४६ ॥

अभावरूपाश्च हेतवश्चतुर्विधाः प्रागभावः ध्वंसाभावः अन्योन्याभावः अत्यन्ताभावश्चेति मनसि कृत्वा क्रमेण उदाहरिष्यन् प्रथमं प्रागभावमाह अनभ्यासेनेति। विद्यानाम् अनभ्यासेन अशिक्षया, धीमतां साधूनाम् असंसर्गेण तथा अक्षाणाम् इन्द्रियाणाम् अनिग्रहेण असंयमेन हेतुना नृणां व्यसनं स्त्रीपानाद्यष्टादशविधं दुष्प्रवृत्तिरिति यावत् जायते। उक्तञ्च मनुना व्यसनप्रस्तावे, मृगयाक्षो दिवास्वप्नः परीवादः स्त्रियो मदः। तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः। पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टक इति। अत्र पूर्वं विद्याभ्यासाद्यभावे व्यसनोत्पत्तिरिति विद्याभ्यासादीनां व्यसनं प्रति प्रागभावरूपहेतुत्वम् ॥ २४७ ॥

प्रध्वंसमुदाहरति गत इति। कामकथया उन्मादः उन्मत्तता गतः, यौवनज्वरः गलितः, मोहः अज्ञानं गतः, तृष्णा वासना च्युता, अतः पुण्याश्रमे सन्न्यासाश्रमे मनः कृतम् अर्पितम्। अत्र कामकथादीनां ध्वंसरूपस्य अभावस्य पुण्याश्रमगमने हेतुत्वम् ॥ २४८ ॥

वनान्यमूनि न गृहाण्येता नद्यो न योषितः।
मृगा इमे न दायादास्तन्मे नन्दति मानसम् २४९

अत्यन्तमसदार्य्याणामनालोचितचेष्टितम्।
अतस्तेषां विवर्द्धन्ते सततं सर्वसम्पदः॥ २५०॥

उद्यानसहकाराणामनुद्भिन्ना न मञ्जरी।
देयः पथिकनारीणां सतिलः सलिलाञ्जलिः॥२५१

अन्योन्याभावमुदाहरति वनानीति। अमूनि वनानि, गृहाणि न, एता नद्यः, योषितः न इमे मृगाः, दायादाः न, तत् तस्मात् मे मम मानसं नन्दति, गृहाश्रमाद् वानप्रस्थाश्रमं गतस्योक्तिरियम्। अत्र वनगृहादीनाम् अन्योन्यभेदेन मानस-नन्दने अन्योन्याभावरूपहेतुत्वम्॥ २४९॥

अत्यन्ताभावमुदाहरति अत्यन्तमिति। आर्य्याणां साधूनाम् अनालोचितचेष्टितम् अविमृष्यकारित्वम् अत्यन्तम् असत् अविद्यमानं नास्तीत्यर्थः, अतस्तेषां सर्वसम्पदः सततं विवर्द्धन्ते। अत्र अविमृष्यकारिताया अत्यन्ताभावः सर्वसम्पद्वृद्धी हेतुरिति॥ २५०॥

सम्प्रति अभावाभावरूपं हेतुं दर्शयति उद्यानेति। उद्यानसहकाराणाम् उपवनचूतानां मञ्जरी न अनुद्भिन्ना अपितु उद्भिन्ना, अतः पथिकनारीणां प्रोषितभर्त्तृकाणां सतिलः सलिलाञ्जलिः देयः, चूतमञ्जर्य्युद्भेदेन वसन्तोदयात् तस्य च सातिशयोद्दीपकत्वात् तादृशीनां मरणमुपस्थितमिति ध्वन्यते। अत्र मञ्जरीणामुद्भेदाभावस्य अभावरूपो हेतुरिति अभावाभावस्य हेतुत्वम्॥ २५१॥

प्रागभावादिरूपस्य हेतुत्वमिह वस्तुनः ।
भावाभावस्वरूपस्य कार्य्यस्योत्पादनं प्रति ॥ २५२ ॥
दूरकार्य्यस्तत्सहजः कार्य्यानन्तरजस्तथा ।
अयुक्तयुक्तकार्य्यौ चेत्यसंख्याश्चित्रहेतवः ॥ २५३ ॥
तेऽमी प्रयोगमार्गेषु गौणवृत्तिव्यपाश्रयाः ।
अत्यन्तसुन्दरा दृष्टास्तदुदाहृतयो यथा ॥ २५४ ॥

अभावहेतुमुपसंहरति प्रागिति । इह उदाहरणेषु इत्यर्थः । भावाभावस्वरूपस्य भावरूपस्य अभावरूपस्य च कार्य्यस्य उत्पादनं प्रति प्रागभावादिरूपस्य वस्तुनः विषयस्य हेतुत्वं दर्शितमिति शेषः ॥ २५२ ॥

अधुना चित्राख्यहेतुभेदान् निर्दिशति दूरकार्य्य इति। दूरे कार्य्यं यस्य सः, तत्सहजः तेन कार्य्येण सह जातः, कार्य्यान्तरजः कार्य्यान्तरं जातः, अयुक्तकार्य्यः अयुक्तम् अनुचितं कार्य्यं यस्य सः, तथा युक्तकार्य्यः युक्तम् उचितं कार्य्यं यस्य सः, इति एवंप्रकाराः असंख्याः संख्यातीताः बहुविधा इत्यर्थः चित्रहेतवः चित्राख्याः हेतवः । उक्तञ्च भोजराजेन, क्रियायाः कारणं हेतुः कारको ज्ञापकस्तथा । अभावश्चित्रहेतुश्च चतुर्विध इहेष्यते इति ॥ २५३ ॥

तेऽमीति । ते पूर्वोक्ता अमी चित्रहेतवः गौणी या वृत्तिः सादृश्यनिबन्धना लक्षणा सैव व्यपाश्रयः अवलम्बनं येषां तादृशाः तादृशलक्षणा वृत्तिनिबन्धनाः प्रयोगाणां निबन्धानां मार्गेषु रीतिषु अत्यन्तसुन्दराः अतिमनोहराः दृष्टाः, यथा तेषामुदाहृतयः उदाहरणानि वक्ष्यमाणानीत्यर्थः ॥ २५४ ॥

त्वदपाङ्गाह्वयं जैत्रमनङ्गास्त्रं यदङ्गने !।
मुक्तं तदन्यतस्तेन सोऽप्यहं मनसि क्षतः ॥ २५५
आविर्भवति नारीणां वयः पर्य्यस्तशैशवम् ।
सहैव विविधैः पुंसामङ्गजोन्मादविभ्रमैः ॥ २५६॥
पश्चात् पर्य्यस्य किरणानुदीर्णं चन्द्रमण्डलम् ।
प्रागेव हरिणाक्षीणामुदीर्णो रागसागरः ॥ २५७॥

दूरकार्य्यमुदाहरति त्वदपाङ्गाह्वयमिति। हे अङ्गने! चार्वङ्गि! यत् तत् प्रसिद्धं जैत्रं जयसाधनं तव अपाङ्गाख्यम् अपाङ्गरूपम् अनङ्गस्य कामस्य अस्त्रम् अन्यतः अन्यस्मिन् जने मुक्तं पातितं त्वयेति शेषः तेन अस्त्रेण सः लक्ष्यभूतः जनः तथा अहमपि अलक्ष्यभूत इत्यर्थः मनसि क्षतः विद्धः। अत्र अस्त्रस्य लक्ष्यवेधरूपं कार्य्यं सन्निहितम् अलक्ष्यवेधरूपन्तु दूरवर्त्ति, इति हेतोरस्त्रस्य दूरकार्य्यत्वं तस्य चासम्भवाच्चित्रमिति ॥ २५५ ॥

तत्सहजमुदाहरति आविर्भवतीति। नारीणां पर्य्यस्तं निराकृतं शैशवं येन तादृशं वयः यौवनमित्यर्थः पुंसां विविधैः अङ्गजेन कामेन यः उन्मादः तस्य विभ्रमैः सहैव आविर्भवति। अत्र नारीणां यौवनरूपस्य हेतोस्तत्कार्य्यभूतपुरुषविभ्रमैः सहाविर्भावात् तत्सहजत्वं तच्च कार्य्यकारणयोर्यौगपद्येन वैचित्र्यातिशयसूचनात् चित्रम् ॥ २५६ ॥

कार्य्यानन्तरजमुदाहरति पश्चादिति। हरिणाक्षीणां रागसागरः प्रेमानुरागसमुद्रः प्रागेव उदीर्णः उच्छलितः स्फीत इत्यर्थः, पश्चात् किरणान् पर्य्यस्य उत्क्षिप्य चन्द्रमण्डलम्

राज्ञां हस्तारविन्दानि कुड्मलीकुरुते कुतः ।
देव ! त्वच्चरणद्वन्द्वरविबालातपः स्पृशन् ॥ २५८ ॥
पाणिपद्मानि भूपानां सङ्कोचयितुमीशते ।
त्वत्पादनखचन्द्राणामर्च्चिषः कुन्दनिर्मलाः ॥२५९॥
इति हेतुविकल्पानां दर्शिता गतिरीदृशी ।
इति हेतुचक्रम् ।

उदीर्णम् उदितम् । अत्र चन्द्रोदयस्य रागोद्दीपकत्वात् कारणस्य तत्कार्य्यस्य च रागस्य पश्चाज्जातत्वेन कार्य्यानन्तरजत्वं तच्च कार्य्यकारणयोरग्रपश्चाद्भावप्रतिपादनेन समधिकं वैचित्र्यमावहतीति चित्रम् ॥ २५७ ॥

अयुक्तकार्य्यमुदाहरति राज्ञामिति । हे देव ! तव चरणद्वन्द्वमेव रविः तस्य बालातपः नवोदितार्कमयूखः अत्र चरणरागे बालातपत्वारोपात् अतिशयोक्तिरूपालङ्कारो व्यज्यते । राज्ञां हस्ता एव अरविन्दानि तानि स्पृशन् कुतः कुड्मलीकुरुते मुकुलीकरोतीत्यर्थः बालातपस्पर्शात् अरविन्दानां विकास एव भवति न तु सङ्कोचः, अत्र कारणस्य तस्य तत्सङ्कोचरूपकार्य्यमयुक्तमिति अयुक्तकार्य्यत्वं तच्च राजविषयकरतिभावस्य सातिशयचमत्कारविषयत्वात् अतिमनोरममिति चित्रम् ॥२५८॥

युक्तकार्य्यमुदाहरति पाणिपद्मानीति । कुन्दनिर्मलाः कुन्दपुष्पधवलाः तव पादनखरूपचन्द्राणाम् अर्च्चिषः भूपानां पाणिरूपाणि पद्मानि सङ्कोचयितुम् ईशते प्रभवन्ति । अत्र चन्द्रकिरणरूपकारणस्य पद्मनिमीलनकार्य्यं युक्तं तच्च राजविषयिणी रतिभावस्य व्यञ्जकतया सातिशयां चमत्कृतिपदवीमारोहतीति चित्रम् ॥ २५९ ॥

इङ्गिताकारलक्ष्योऽर्थः सौक्ष्म्यात् सूक्ष्म इति स्मृ
॥२६

कदा नौ सङ्गमो भावीत्याकीर्णे वक्तुमक्षमम् ।
अवेक्ष्य कान्तमबला लीलापद्मं न्यमीलयत् ॥२६

पद्मसम्मीलनादत्र सूचितो निशि सङ्गमः ।
आश्वासयितुमिच्छन्त्या प्रियमङ्गजपीड़ितम् ॥२६२

हेतुमुपसंहरति इतीति। हेतोर्विकल्पानां प्रभेदानाम् इति पूर्वोक्तप्रकारा गतिः दर्शिता। अनयैव रीत्या अन्येऽपि प्रभेदाः ज्ञातव्या इति भावः।

इति हेतुचक्रम्।

अथ सूक्ष्मं निरूपयति इङ्गितेति। अभिप्रायप्रकाशक-चेष्टाविष्कारः इङ्गितं छन्नतो भाव इति विश्वः। आकारः अवस्थाविशेषव्यञ्जकमुखरागादिः, स्यादाकारोऽङ्गवैकृतमिति वोपालितः। एताभ्यां लक्ष्यः अनुमेयः अर्थः विषयः सौक्ष्म्यात् दुर्ज्ञेयत्वात् सूक्ष्म इति स्मृतः। प्रकाशकारस्तु, कुतोऽपि लक्षितः सूक्ष्मोऽप्यर्थोऽन्यस्मै प्रकाश्यते। धर्मेण केनचिद् यत्र तत् सूक्ष्मं परिचक्षते॥ इत्याह। संलक्षितस्तु सूक्ष्मोऽर्थ आकारेणेङ्गितेन वा। कयापि सूच्यते भङ्ग्या यत्र सूक्ष्मं तदु-च्यत इति दर्पणकारः॥ २६०॥

इङ्गितलक्ष्यं सूक्ष्ममुदाहरति कदेत्यादि। कदा कस्मिन् समये नौ आवयोः सङ्गमो भावी इति आकीर्णे जनबहुले स्थाने वक्तुमक्षमं कान्तम् अवेक्ष्य अबला कामिनी लीलापद्मं क्रीड़ाकमलं न्यमीलयत् समकोचयत्। अत्र अङ्गजपीड़ितं

मदर्पितदृशस्तस्या गीतगोष्ठ्यामवर्द्धत ।
उद्दामरागतरला छाया कापि मुखाम्बुजे ॥२६३॥
इत्यनुद्भिन्नरूपत्वात् रत्युत्सवमनोरथः ।
अनुल्लङ्घ्यैव सूक्ष्मत्वमभूदत्र व्यवस्थितः ॥ २६४ ॥

इति सूक्ष्मम्

कामार्त्तं प्रियम् आश्वासयितुम् इच्छन्त्या अनया कामिन्या पद्मसम्मीलनात् निशि रात्री सङ्गमो भावीति शेषः सूचितः । पद्मनिमीलनमिह इङ्गितं निशि प्रियसङ्गमरूपसूक्ष्मोऽर्थ इति बोध्यम्, अस्य च सहृदयचमत्कारितया अलङ्कारत्वमवगन्तव्यम् ॥ २६१ ॥ २६२ ॥

आकारलक्ष्यं सूक्ष्मं दर्शयति मदर्पितदृश इति । गीतगोष्ठ्यां सङ्गीतसंसदि मयि अर्पिते दृशौ यया तादृश्याः तस्याः मुखाम्बुजे उद्दामः अतिप्रवृद्धः यः रागः रमणाभिलाषः तेन तरला विकस्वरा कापि अनिर्वचनीया छाया कान्तिः अवर्द्धत, अत्र मुखच्छायावैलक्षण्येन नायिकाया रत्युत्सवाभिलाषस्य लक्षितत्वात् सूक्ष्मत्वम् ॥ २६३ ॥

नन्वत्र तादृशमनोरथस्य सुव्यक्ततैव कथं तर्हि सूक्ष्मत्वमित्याशङ्क्याह इतीति । अत्र रत्युत्सवमनोरथः अनुद्भिन्नरूपत्वात् आकारलक्षितत्वेन स्फुटतया प्रतीयमानत्वाभावात् सूक्ष्मत्वम् अनुल्लङ्घ्यैव अपरित्यज्यैव व्यवस्थितः वर्णितः अभूदित्यन्वयः । तथाच तादृशी मुखच्छाया अवश्यमेव रत्युत्सवमनोरथं व्यञ्जयतीति न तावन्नियमः अन्यविधमनोरथेऽपि तत्सम्भवात् अतोऽत्र विशेषपर्य्यालोचनया तादृशसुनिपुणो लक्ष-

लेशो लेशेन निर्भिन्नवस्तुरूपनिगूहनम् ।
उदाहरणमेवास्य रूपमाविर्भविष्यति ॥ २६५ ॥
राजकन्यानुरक्तं मां रोमोद्भेदेन रक्षकाः ।
अवगच्छेयुरा ज्ञातमहो शीतानिलं वनम् ॥२६६॥
आनन्दाश्रु प्रवृत्तं मे कथं दृष्ट्वैव कन्यकाम् ।

यिता कथञ्चित् इममर्थं लक्षयितुं शक्नोतीति सूक्ष्मालङ्कार-स्यावकाश इति बोध्यम् ॥ २६४ ॥

इदानीमुद्देशवाक्यप्राप्तलवापरपर्य्यायं लेशं निरूपयति लेश इति। लेशेन किञ्चिन्मात्रतया निर्भिन्नस्य प्रकटितस्य वस्तुनः यद् रूपं तस्य निगूहनं गोपनं लेशः, उदाहरणम् एव अस्य अलङ्कारस्य रूपं स्वरूपम् आविर्भविष्यति प्रकाशिष्यते। इममेव व्याजोक्तिं वदन्ति केचित्। यथा, व्याजोक्तिश्छद्मनो-द्भिन्नवस्तुरूपनिगूहनम् इति। अपह्नुतौ लेशनिर्भिन्नवस्तुनः नापह्नवः, इह तु तथेत्यनयोर्भेदः ॥ २६५ ॥

अनिष्टसम्भावनायां लेशमुदाहरति राजकन्येति। रोमोद्-भेदेन रोमहर्षेण, राजकन्याया दर्शनजनितेनेति भावः। मां राजकन्यायाम् अनुरक्तम् अभिलाषुकं रक्षकाः राजान्तःपुर-रक्षिणः अवगच्छेयुः, सम्भावनायां विधिलिङ्। आ ज्ञातम्, आ इति सम्भ्रमद्योतकमव्ययम्। ज्ञातं विदितं निगूहनप्रकारो ज्ञायत इत्यर्थः। ज्ञातमिति वर्त्तमाने क्तप्रत्ययः। अहो वनं शीतः अनिलः यत्र तत्, शीतानिलस्पर्शेन रोमाञ्चोदय इति भावः। अत्र रोमोद्भेदस्य शीतानिलजत्वेन अनुरागनिगूहनं वैचित्र्यमावहतीति अस्यालङ्कारत्वम् ॥ २६६ ॥

लज्जायां लेशमुदाहरति आनन्दाश्रु इति। कन्यकां दृष्ट्वैव

अक्षि मे पुष्परजसा वातोद्धूतेन दूषितम् ॥ २६७ ॥
इत्येवमादिस्थानेऽयमलङ्कारोऽतिशोभते ।
लेशमेके विदुर्निन्दां स्तुतिं वा लेशतः कृताम् २६८
युवैष गुणवान् राजा योग्यस्ते पतिरूर्जितः ।
रणोत्सवे मनः सक्तं यस्य कामोत्सवादपि ॥ २६९ ॥

मे मम कथम् आनन्दाश्रु प्रवृत्तम् अत्र कन्यादर्शनेन अनुरागोदयात् आनन्दाश्रुप्रवृत्तिर्लज्जाकरीति भावः। अत्र निगूहनप्रकारमाह अक्षीति। वातोद्धूतेन पवनचालितेन पुष्परजसा कुसुमपरागेण मे अक्षि दूषितम्। अत्र आनन्दाश्रुणोऽक्षिदूषणजत्वप्रतिपादनेन अनुरागः संवृत्त इति ॥ २६७ ॥

अस्यालङ्कारत्वं प्रतिपादयन्नाह इतीति। इत्येवमादिस्थाने एवमाद्युदाहरणे अयम् अलङ्कारः अतिशोभते सहृदयचमत्कारितया समुल्लसति। एके पण्डिताः लेशं लेशतः छलेन कृतां निन्दां वा स्तुतिं व्याजस्तुतिमित्यर्थः विदुः। तदुक्तं, दोषस्य यो गुणीभावो दोषीभावो गुणस्य यः। स लेशः स्यात् ततो नान्या व्याजस्तुतिरपीष्यत इति। अनेनैव व्याजस्तुत्यलङ्कारोऽभिहित इति भावः ॥ २६८ ॥

स्तुतिव्याजेन निन्दामाह युवेति। एष राजा युवा गुणवान् तथा ऊर्जितः विक्रान्तः, अतः ते तव योग्यः पतिः। यस्य मनः कामोत्सवादपि रणोत्सवे सक्तम्। स्वयंवरां कन्यां प्रति तत्सख्या उक्तिरियम्। अत्र द्वितीयार्द्धे महावीरत्वेन स्तुतिबोधितापि कामोत्सवे अनासक्तत्वप्रतिपादनव्याजेन तव सम्भोगसुखं दुर्लभम् अतो नायं वरणीय इति द्योतयतीति स्तुत्या निन्दावगमात् व्याजस्तुतिः ॥ २६९ ॥

वीर्य्योत्कर्षस्तुतिर्निन्दैवास्मिन् भावनिवृत्तये ।
कन्यायाः कल्पते भोगान्निर्विविक्षोर्निरन्तरम् ॥२७०॥
चपलो निर्दयश्चासौ जनः किन्तेन मे सखि ! ।
आगःप्रमार्जनायैव चाटवो येन शिक्षिताः ॥२७१॥
दोषाभासो गुणः कोऽपि दर्शितश्चाटुकारिता ।
मानं सखीजनोद्दिष्टं कर्तुं रागादशक्तया ॥२७२॥

इति लेशचक्रम् ।

अत्रालङ्कारं सङ्गमयति वीर्य्येति । अस्मिन् उदाहरणे निरन्तरं भोगान् रतोत्सवान् निर्विविक्षोः भोक्तुमिच्छोः, निर्वेशो भृतिभोगयोरिति कोषः । कन्यायाः भावस्य वरणाभिप्रायस्य निवृत्तये वीर्य्योत्कर्षस्य वीर्य्याधिक्यस्य स्तुतिः निन्दैव कल्पते, निन्दारूपेणैव पर्य्यवस्यतीत्यर्थः ॥ २७० ॥

निन्दाव्याजेन स्तुतिमाह चपल इति । हे सखि ! असौ जनः चपलः अस्थिरः, निर्दयः परपीड़ानभिज्ञतया दयारहितश्च, येन आगःप्रमार्जनाय अपराधक्षालनाय चाटवः प्रियवादाः शिक्षिताः, अतस्तेन युष्माभिरुपदिष्टेन मानेन किम् । प्रेयसि मानो गौरवजनकत्वेन विधेय इत्युपदिशन्तीं सखीं प्रति कस्याश्चिन्नायिकाया उक्तिरियम् ॥ २७१ ॥

दोषाभास इति । रागात् प्रियानुरागाधिक्यात् सखीजनेन उद्दिष्टम् उपदिष्टं मानं कर्त्तुम् अशक्तया नायिकया चाटुकारितारूपः कोऽपि स्त्रीजनहृद्यः गुणः दोष इव आभासते इति तथोक्तः दर्शितः दोषरूपेण कथित इत्यर्थः । अत्र निन्दाव्याजेन स्तुतिर्गम्यते इति व्याजस्तुतिः ॥ २७२ ॥

उद्दिष्टानां पदार्थानामनूद्देशो यथाक्रमम् ।
यथासंख्यमिति प्रोक्तं संख्यानं क्रम इत्यपि ॥२७३॥
ध्रुवन्ते चोरिता तन्वि ! स्मितेक्षणमुखद्युतिः ।
स्नातुमम्भः प्रविष्टायाः कुमुदोत्पलपङ्कजैः ॥ २७४॥
प्रेयः प्रियतराख्यानं रसवद्रसपेशलम् ।
ऊर्जस्वि रूढ़ाहङ्कारं युक्तोत्कर्षञ्च तत्त्रयम् ॥२७५॥

क्रमालङ्कारं निरूपयति उद्दिष्टानामिति। उद्दिष्टानाम् उक्तानां पदार्थानां यथाक्रमम् अनु पश्चात् उद्देशः पश्चादुक्त-पदार्थैः सङ्गतिः यथासङ्ख्यम् इति, सङ्ख्यानमतिक्रम्य इत्यपि प्रोक्तं, ययासंख्यं संख्यानं क्रम इति पर्य्यायशब्दा इत्यर्थः ॥ २७३ ॥

क्रममुदाहरति ध्रुवमिति। हे तन्वि! स्नातुम् अम्भः जलं प्रविष्टायाः ते तव स्मितेक्षणमुखद्युतिः कुमुदोत्पलपङ्कजैः ध्रुवं निश्चितं चोरिता अपहृता कियदंशेनेति शेषः। समग्र-हरणे नायिकायां तदसत्त्वेन चारुत्वापायादिति भावः। तत्र स्मितद्युतिः कुमुदेन, ईक्षणद्युतिः उत्पलेन, मुखद्युतिः पङ्कजे-नेति यथाक्रममुक्तपदार्थानां यथाक्रमं पश्चादुक्तपदार्थैः सम-न्वयश्चारुत्वातिशयमापादयतीति अस्यालङ्कारत्वम् ॥ २७४ ॥

सम्प्रति प्रेयोरसवदूर्जस्विनामकमलङ्कारत्रितयं निरूपयति प्रेय इति। प्रियतरं भावाभिव्यक्त्या अतिप्रीतिकरम् आख्यानं प्रेयः अतिप्रियत्वादन्वर्थसंज्ञेयम्। तथा रसपेशलं रसेन रत्या-दिस्थायिभावरूपेण पेशलं सहृदयानन्दजननं रसवत्। भाव-रसपदार्थौ विश्वनाथेनोक्तौ। यथा, सञ्चारिणः प्रधानानि

अद्य या मम गोविन्द ! जाता त्वयि गृहागते ।

देवादिविषया रतिः । उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ॥ विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः । रसतामेति रत्यादिः स्थायी भावः सचेतसामिति । अनयोर्विस्तारश्च ग्रन्थबाहुल्यभिया न लिखितः विस्तारदर्शनार्थिभिस्तत्तद्ग्रन्थेषु अनुसन्धेय इति । तथा रूढ़ः अभिव्यक्तः अहङ्कारः गर्वः यत्र तथोक्तम् आख्यानं गर्वप्रधानमाख्यानम् ऊर्जस्वि, ऊर्ज्जो बलं तदस्यास्तीति योगबलात् अहङ्कारस्य च ऊर्जोधर्मरूपत्वात् तथा व्यपदेश इति । तेषाम् उक्तानां प्रेयःप्रभृतीनाम् अलङ्काराणां त्रयं युक्तः समुचितः उत्कर्षो यस्मिन् तादृशम् अतएवैषामलङ्कारत्वकीर्त्तनं न दोषावहमिति भावः । उल्लिखितेषु भावेषु च देवादिविषयकरतिभावस्यैव प्रेयोनामालङ्कारव्यपदेशः, अन्येषां भावानां रसाभासभावाभासभावशान्तिभावोदयभावशबलतानाञ्च रस्यमानपदार्थत्वेन रसवदलङ्कारत्वम् । उक्तञ्च विश्वनाथेन, रसभावौ तदाभासौ भावस्य प्रशमोदयौ । सन्धिः शबलता चेति सर्वेऽपि रसनाद्रसा इति । पूर्वाख्यभावस्य तु ऊर्जस्विनामालङ्कारत्वमिति विशेषः । ध्वनिकारादयस्तु अङ्गिनो रसादेरलङ्कार्य्यत्वम् अङ्गस्य तु अलङ्कारत्वमाहुः । यथा, प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रसादयः । काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः ॥ विश्वनाथस्तु, रसभावौ तदाभासौ भावस्य प्रशमस्तथा । गुणीभूतत्वमायान्ति यदालङ्कृतयस्तदा । रसवत् प्रेय ऊर्जस्वि समाहितमिति क्रमात् । भावस्य चोदये सन्धौ मिश्रत्वे च तदाख्यका इत्याह ॥ २७५ ॥

प्रेय उदाहरति अद्येति । गोविन्द ! अद्य त्वयि गृहा-

कालेनैषा भवेत् प्रीतिस्तवैवागमनात् पुनः॥२७६॥
इत्याह युक्तं विदुरो नान्यतस्तादृशी धृतिः।
भक्तिमात्रसमाराध्यः सुप्रीतश्च ततो हरिः॥ २७७॥
सोमः सूर्य्यो मरुद्भूमिर्व्योम होतानलो जलम्।
इति रूपाण्यतिक्रम्य त्वां द्रष्टुं देव! के वयम् २७८

गते या मम प्रीतिः जाता, कालेन समयान्तरेण तवैव नान्यस्य कस्यचित् साधोरित्येवकारेण ध्वन्यते। पुनरागमनात् एषा प्रीतिः भवेत् भविष्यतीत्यर्थः। अत्र भगवद्विषयकरतिभावो वाक्यभङ्ग्या सहृदयानां सातिशयचमत्कृतिमादधातीति प्रेयोऽलङ्कारः॥ २७६॥

एतदेव सङ्गमयति इतीति। विदुर इति युक्तम् आह, यतस्तस्य अन्यतः अन्यस्मात् आगन्तुकात् तादृशी धृतिः सन्तोषः न आसीदिति शेषः, ततः भक्तिमात्रेण न तु केनाप्यन्येनोपचारेणेत्यर्थः समाराध्यः हरिः तस्य सुप्रीतश्च अभवत् इति वाक्यशेषः। उद्योगपर्वीयश्लोकश्च अस्य प्रतिरूपो यथा, या प्रीतिः पुण्डरीकाक्ष! तवागमनकारणात्। सा किमाख्यायते तुभ्यमन्तरात्मासि देहिनामिति॥ २७७॥

पूर्वं वक्तृबोद्धव्ययोः प्रीतावुदाहृतम् इदानीं केवलं वक्तुः प्रीतावुदाहरति सोम इत्यादि। हे देव! सोमः चन्द्रः सूर्य्यः, मरुत् वायुः, भूमिः, व्योम आकाशं, होता यजमानः, अनलः अग्निः, तथा जलम् इति ते रूपाणि अष्टौ मूर्त्तीः अतिक्रम्य अतीत्य स्थितं परमात्मस्वरूपं त्वां द्रष्टुं वयं के? न वयं योग्या इत्यर्थः, तथापि यद् दृष्टोऽसि स केवलं भक्तानुग्रह एवेति। देवे महेश्वरे साक्षात्कृते तपसा प्रत्यक्षगोचरीकृते सति राज-

इति साक्षात्कृते देवे राज्ञो यद्राजवर्मणः ।
प्रीतिप्रकाशनं तच्च प्रेय इत्यवगम्यताम् ॥ २७९ ॥
मृतेति प्रेत्य सङ्गन्तुं यया मे मरणं मतम् ।
सैषा तन्वी मया लब्धा कथमत्रैव जन्मनि ॥२८०॥

वर्मणः राजवर्माख्यस्य राज्ञः इति उक्तरूपं यत् प्रीतिप्रकाशनं तदपि प्रेय इति अवगम्यताम्, अत्रापि भगवद्विषयकरतिभावव्यञ्जकस्य प्रियाख्यानस्य सत्त्वादिति ॥ २७८ ॥ २७९ ॥

अथ रसवदलङ्कारं दर्शयन् रसानाञ्च शृङ्गारादीनां प्राधान्येन सर्वजनहृद्यत्वेन च प्रथमं शृङ्गारमुदाहरति मृतेति। मृता इति निश्चित्य इत्यध्याहार्य्यं प्रेत्य परलोके यया कान्तया सङ्गन्तुं सङ्गमं कर्त्तुं मे मरणं मतम् इष्टं मरणावधारणं कृतमित्यर्थः, एषा सा तन्वी अत्रैव जन्मनि मरणं विनेत्यर्थः कथं मया लब्धा प्राप्ता। मृतां मदालसां नागानां प्रसादेन पुनः प्रत्युज्जीवितां प्राप्य तत्पत्युः कुवलयाश्वस्योक्तिरियम्। सैषा तन्वीत्यत्र सैवावन्तीति पाठोऽपि दृश्यते। तथात्वे आवन्ती अवन्तिदेशभवा वासवदत्तेत्यर्थः, तस्याश्च दाहप्रवादेन मरणनिश्चयात् दुःखितस्य वत्सराजस्य पुनस्तां प्राप्यानन्दोक्तिरियम्। अत्र सम्भोगशृङ्गाररसः। तल्लक्षणन्तूक्तं विश्वनाथेन। यथा, दर्शनस्पर्शनादीनि निषेवेते विलासिनौ। यत्रानुरक्तावन्योन्यं सम्भोगोऽयमुदाहृत इति। अयञ्च विप्रलम्भानन्तर्य्यात् परां पुष्टिं नीतः। उक्तञ्च विश्वनाथेन, न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते। कषायिते हि वस्त्रादौ भूयान् रागो विवर्द्धते। इति। विप्रलम्भश्च तेनैवोक्तः। यथा, यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसाविति ॥२८०॥

प्राक्प्रीतिर्दर्शिता सेयं रतिः शृङ्गारतां गता।
रूपबाहुल्ययोगेन तदिदं रसवद् वचः॥ २८१॥
निगृह्य केशेष्वाकृष्टा कृष्णा येनाग्रतो मम।
सोऽयं दुःशासनः पापो लब्धः किं जीवति क्षणं॥२८२॥
इत्यारुह्य परां कोटिं क्रोधो रौद्रात्मतां गतः।
भीमस्य पश्यतः शत्रुमित्येतद्रसवद् वचः॥२८३॥

नन्वत्रापि नायिकाविषयकरतिभावो व्यज्यते तत् प्रेयोऽलङ्कार एव कथमत्र न स्यादित्याशङ्काह प्रागिति। प्राक् पूर्वोक्तयोरुदाहरणयोः प्रीतिः भगवद्विषयकरतिव्यञ्जिका एव न तु विभावादिपरिपुष्टा दर्शिता। उक्तञ्च, मनोऽनुकूलेष्वर्थेषु सुखसंवेदनं वचः। असंप्रयोगविषया सैव प्रीतिर्निगद्यत इति। इह तु सा रतिः कान्ताविषयकोऽनुराग इत्यर्थः। उक्तञ्च, रतिर्मनोऽनुकूलेऽर्थे मनसः प्रवणायितमिति। रूपाणां विभावानुभावव्यभिचारिणां बाहुल्यं विस्तारः तस्य योगेन शृङ्गारतां गता, तस्मात् इदं स्मृतेत्युक्तं वचः रसवत् रसवदलङ्कारेण अलङ्कृतमित्यर्थः॥ २८१॥

रौद्ररसमुदाहरति निगृह्येति। येन मम अग्रतः मामनादृत्य इत्यर्थः कृष्णा द्रौपदी केशेषु अवच्छेदे सप्तमी। आकृष्टा, सः अयं पापः दुःशासनः मया प्राप्तः क्षणं जीवति किम्? नैव जीवतीत्यर्थः॥ २८२॥

इतीति। शत्रुं दुःशासनं पश्यतः भीमस्य क्रोधः इति उक्तप्रकारेण परां कोटिम् आरुह्य विभावादिभिः परिपोषं प्राप्य इत्यर्थः रौद्रतां रौद्रभावं गतः रौद्ररसत्वेन परिणत

अजित्वा सार्णवामुर्वीमनिष्ट्वा विविधैर्मखैः ।
अदत्त्वा चार्थमर्थिभ्यो भवेयं पार्थिवः कथम्॥२८४॥
इत्युत्साहः प्रकृष्टात्मा तिष्ठन् वीररसात्मना ।
रसवत्त्वं गिरामासां समर्थयितुमीश्वरः ॥ २८५ ॥

इत्यर्थः। तथाच शत्रुरत्र आलम्बनविभावः कृष्णाकेशाकर्षणादिकमुद्दीपनविभावः, पाप इत्यधिक्षेपवाक्यमनुभावः, गर्वादयश्च प्रतीयमाना व्यभिचारिणः एतैः पुष्टिं नीतः क्रोधस्थायिभावः रौद्ररसत्वमापन्न इति एतत् वचः रसवत् रसवदलङ्कारेणालङ्कृतमिति ॥ २८३ ॥

वीररसमुदाहरति अजित्वेति। सार्णवां ससागराम् उर्वीम् अजित्वा जयेन अलब्ध्वा, विविधैः मखैः अश्वमेधादिभिः अनिष्ट्वा देवान् अपरितोष्य, तथा अर्थिभ्य अर्थम् अदत्त्वा कथं पार्थिवः भवेयम् अनेवंविधस्य पार्थिवत्वं विड़म्बनैवेति भावः। एतेनास्य युद्धवीरत्वं धर्मवीरत्वं दानवीरत्वञ्च सूचितम् ॥२८४॥

इतीति। उक्तरूपः प्रकृष्टः आत्मा यस्य सः विभावादिभिः परिपुष्ट इत्यर्थः उत्साहः कार्य्यारम्भेषु संरम्भः स्थेयानुत्साह इत्यत इत्युक्तलक्षणः संरम्भ इत्यर्थः वीररसात्मना तिष्ठन् वीररसरूपेण परिणमन् आसां गिरां वाचां रसवत्त्वं रसवदलङ्कारयुक्तत्वं समर्थयितुं दृढ़ीकर्त्तुम् ईश्वरः समर्थः। अत्र युद्धे जेतव्याः शत्रवः, धर्मे धर्मः दाने याचकाः आलम्बनविभावाः सहायान्वेषणादयः प्रतीयमानाः अनुभावाः, हर्षधृत्यादयो व्यभिचारिणः एतैरभिव्यक्तः उत्साहरूपस्थायिभावः वीररसतां लभते इति ॥ २८५ ॥

यस्याः कुसुमशय्यापि कोमलाङ्ग्या रुजाकरी।
साधिशेते कथं तन्वी हुताशनवतीं चिताम्॥२८६॥
इति कारुण्यमुद्रिक्तमलङ्कारतया स्मृतम्।
तथा परेऽपि बीभत्सहास्याद्भुतभयानकाः॥२८७॥
पायं पायं तवारीणां शोणितं पाणिसम्पुटैः।
कौणपाः सह नृत्यन्ति कबन्धैरन्त्रभूषणाः॥२८८॥

करुणरसमुदाहरति यस्या इत्यादि। यस्याः कोमलाङ्ग्याः कुसुमशय्यापि रुजाकरी पीड़ाकरी, सा तन्वी कथं हुताशनवतीं ज्वलन्तीमित्यर्थः चिताम् अधिशेते। इत्यत्र उद्रिक्तं विभावादिभिः परिपुष्टं कारुण्यं करुणरसस्थायिभावः शोकः चित्तवैक्लव्यविशेष इत्यर्थः इष्टनाशादिभिश्चेतोवैक्लव्यं शोकशब्दभागिति लक्षणात्। अलङ्कारतया रसवदलङ्कारत्वेन स्मृतम्। अत्र गतप्राणा तन्वी आलम्बनविभावः, कुसुमशय्यादिस्मरणम् उद्दीपनविभावः तादृशकरुणवचनम् अनुभावः कथमित्यनेन प्रतीयमानाश्चिन्तादयो व्यभिचारिण इति ज्ञेयं, तथा परे अन्ये बीभत्सहास्याद्भुतभयानका अपि रसा वेदितव्या इति शेषः॥ २८६ ॥ २८७ ॥

तत्र बीभत्समुदाहरन्नाह पायमिति। कौणपाः राक्षसाः कबन्धैः अशिरस्कक्रियायुक्तकलेवरैः सह, कबन्धोऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरमित्यमरः। अन्त्रं पुरीतत् भूषणं येषां तादृशाः सन्तः पाणिसम्पुटैः तव अरीणां शोणितं पायं पायं पुनः पुनः पीत्वा नृत्यन्ति। अत्र जुगुप्सारूपस्थायिभावः। जुगुप्सालक्षणन्तूक्तं यथा, दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयो-

इदमम्लानमानाया लग्नं स्तनतटे तव ।
छाद्यतामुत्तरीयेण नवं नखपदं सखि ! ॥ २८९ ॥
अंशुकानि प्रवालानि पुष्पं हारादिभूषणम् ।
शाखाश्च मन्दिराण्येषां चित्रं नन्दनशाखिनाम्॥२९०॥

इवेति । तस्य च शोणितपायिनः अन्त्रभूषणाः राक्षसाः आलम्बनविभावाः, अन्ये च अनुभावव्यभिचारिण आक्षिप्ताः तैश्च परिपुष्टः वीभत्सरसत्वं भजते । अत्र राजविषयकरतिभावस्य प्राधान्यात् वीभत्सपरिपुष्टतया तस्यैव चमत्कारित्वात् प्रेयोऽलङ्कारत्वमेव युक्तमिति बोध्यम् । रसवत्प्रेयसोः सङ्कर इति केचित् ॥ २२८ ॥

हास्यमुदाहरन्नाह इदमिति । हे सखि ! अम्लानः अखण्डितः मानो यस्याः तादृश्याः अस्माकं पुनः पुनराग्रहेणापि अविगतमानाया इत्यर्थः तव स्तनतटे इदं नवं न तु प्राचीनं नखपदं नखाघातचिह्नं लग्नम् उत्तरीयेण छाद्यताम् । सखीसन्निधौ मानवतीं रहसि कान्तेन सह कृतविहारां काञ्चित् प्रति तत्सख्या उपहासोक्तिरियम् । अत्र हासः स्थायिभावः । तल्लक्षणन्तूक्तम् । यथा, वागादिवैकृतैश्चेतोविकाशो हास उच्यत इति । तादृशी मानवती नायिका आलम्बनविभावः, नखक्षतमुद्दीपनविभावः, तादृशवचनानि अनुभावाः व्यभिचारिणश्च यथायथं प्रतीयमानाः एतैश्च परिपुष्टः अयं हासः हास्यरसत्वेन परिणमति ॥ २८९ ॥

अद्भुतरसमुदाहरति अंशुकानीति । एषां नन्दनशाखिनां प्रवालानि अंशुकानि वसनानि, पुष्पं हारादिभूषणं, शाखाश्च मन्दिराणि गृहाणि, चित्रं किमाश्चर्यमित्यर्थः । अत्र स्थायि-

इदं मघोनः कुलिशं धारासन्निहितानलम्।
स्मरणं यस्य दैत्यस्त्रीगर्भपाताय कल्पते॥ २९१॥
वाक्यस्याग्राम्यता योनिर्माधुर्य्ये दर्शितो रसः।
इह त्वष्टरसायत्ता रसवत्ता स्मृता गिराम्॥२९२॥

इति रसवच्चक्रम्।

भावो विस्मयः। तल्लक्षणं यथा, विविधेषु पदार्थेषु लोकसीमातिवर्त्तिषु। विस्फारश्चेतसो यस्तु स विस्मय उदाहृत इति। अलौकिकनन्दनशाखिभिरालम्बनविभावैः तेषाञ्च तत्तद्गुणैरुद्दीपनविभावैः अन्यैश्च प्रतीयमानैरनुभावैः सञ्चारिभिश्च परिपुष्टः अद्भुतरसतया पर्य्यवस्यतीति॥ २९०॥

भयानकरसमुदाहरति इदमिति। इदं मघोन इन्द्रस्य कुलिशं वज्रं धारासु सन्निहितः अनलः यस्य तादृशं, यस्य स्मरणं दैत्यस्त्रीणाम् असुरकामिनीनां गर्भपाताय कल्पते प्रभवति। अत्र दैत्यस्त्रीणां भयमेव स्थायिभावः। तल्लक्षणं यथा, रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं भयमिति। मघोना आलम्बनविभावेन तादृशकुलिशेन उद्दीपनविभावेन गर्भपातेन च अनुभावेन अन्यैश्च प्रतीयमानैः तत्तत्कालिकचित्तव्यापारैः परिपुष्टः भयानकरसत्वं प्राप्नोतीति॥ २९१॥

ननु माधुर्य्यनिरूपणे मधुरं रसवदित्युक्ते रसवत्त्वस्य माधुर्य्यगुणत्वेन अभिहितम् अत्र तु अलङ्कारत्वं कथं सङ्गच्छत इत्याह वाक्यस्येति। माधुर्य्ये माधुर्य्यनिरूपणे वाक्यस्य अग्राम्यता ग्राम्यत्वदोषाभाव एव योनिः कारणं यस्य तादृशः रसः दर्शितः अग्राम्यताया एव रसत्वेन उपचारतः कीर्त्तनमिति भावः। इह तु गिरां वाचां रसवत्ता रसवदलङ्कारत्वम् अष्टसु

अपकर्त्ताहमस्मीति हृदि ते मास्म भूद् भयम्।
विमुखेषु न मे खड्गः प्रहर्त्तुं जातु वाञ्छति २९
एवमुक्त्वा परो युद्धे निरुद्धो दर्पशालिना।
पुंसा केनापि तज्ज्ञेयमूर्जस्वीत्येवमादिकम्॥२९४
अर्थमिष्टमनाख्याय साक्षात् तस्यैव सिद्धये।
यत् प्रकारान्तराख्यानं पर्य्यायोक्तं तदिष्यते॥२९५

रसेषु शृङ्गारादिषु आयत्ता स्मृता। तथाच, रसव्यञ्जकग्राम्यत्वदोषाभावसहकृतालङ्कारादिमत्त्वं माधुर्य्यगुणत्वं रसवदलङ्कारस्तु रस एवेति भेदः॥ २९२ ॥

ऊर्जस्वलङ्कारमुदाहरति अपकर्त्तेति। अहं ते अपकर्त्ता शत्रुरस्मि इति हेतोः ते भयं मास्म भूत् न भवतु, मे मम खड्गः विमुखेषु प्रहर्त्तुं जातु कदाचिदपि न वाञ्छति। तथाचोक्तं हन्यादित्यनुवृत्तौ मनुना। यथा, नायुधव्यसनप्राप्तं नार्त्तं नातिपरिक्षतम्। न भीतं न परावृत्तं सतां धर्ममनुस्मरन्निति। युद्धे पलायनपरं शत्रुं प्रति कस्यचित् वीरस्योक्तिः। अत्र गर्वरूपो व्यभिचारिभावः स्थायिभावादपि उत्साहादुद्रिक्त इति ऊर्जस्विनामालङ्कारः। यस्य तु तादृशोद्रेकाभावः तत्र वीरो रस एव रसवदलङ्कारतया परिणमतीति बोध्यम् ॥ २९३ ॥

एवमुक्त्वेति। दर्पशालिना अहङ्कारवता केनापि पुंसा एवम् उक्तरूपं वचनम् उक्त्वा युद्धे परः शत्रुः निरुद्धः। तस्मात् इत्येवमादिकं रसान्तरेऽपि तादृशो गर्वः ऊर्जस्वीत्यर्थः॥ २९४॥

पर्य्यायोक्तं लक्षयति अर्थमिति। इष्टम् अभिलषितम्

दृशत्यसौ परभृतः सहकारस्य मञ्जरीम् ।
तमहं वारयिष्यामि युवाभ्यां स्वैरमास्यताम्॥२८६॥
सङ्गमय्य सखीं यूना सङ्केते तद्रतोत्सवम् ।
निर्वर्त्तयितुमिच्छन्त्या कयाप्यपसृतं ततः ॥ २८७॥

इति पर्य्यायोक्तम् ।

किञ्चिदारभमाणस्य कार्य्यं दैववशात् पुनः ।

अर्थं साचात् वाचकशब्देन अनाख्याय अकथयित्वा तस्यैव दृष्टार्थस्य सिद्धये प्रतिपत्तये यत् प्रकारान्तरेण भङ्गिविशेषेण आख्यानं व्यञ्जनया द्योतनं तत् पर्य्यायोक्तम् इष्यते। समानार्थकशब्दान्तरस्यैव पर्य्यायत्वात् अन्वर्थसंज्ञेयमिति बोध्यम् ॥ २८५ ॥

पर्य्यायोक्तमुदाहरति दशतीति। असौ परभृतः कोकिलः सहकारस्य कुञ्जवहिस्थितस्येति शेषः मञ्जरीं दशति, अहं तं निवारयिष्यामि युवाभ्यां स्वैरं स्वच्छन्दम् आस्यतां स्थीयतामिति कान्तकामिन्योः सुरतोत्सवस्य व्याघातो मा भूदिति विविच्य सख्यास्ततोऽपसरणस्यौचित्ये इतोऽहं गमिष्यामीति वाचकपदेनाभिधाने वैचित्र्यातिशयस्याभावो जायते इति परभृतवारणव्याजेन तदपसरणं व्यक्तीकृतमिति पर्य्यायोक्तम् ॥ २८६ ॥

सङ्गमय्येति। सङ्केते सङ्केतस्थाने सखीं यूना सह सङ्गमय्य तयोः रतोत्सवं निर्वर्त्तयितुं सम्पादयितुमिच्छन्त्या कयापि सख्या ततः अपसृतमित्यन्वयः॥ २८७ ॥

समाहितं निरूपयति किञ्चिदिति। किञ्चित् कार्य्यम्

तत्साधनसमापत्तिर्या तदाहुः समाहितम् ॥२९८

मानमस्या निराकर्त्तुं पादयोर्मे पतिष्यतः।
उपकाराय दिष्ट्यैतदुदीर्णं घनगर्जितम् ॥ २९९

आशयस्य विभूतेर्वा यन्महत्त्वमनुत्तमम्।
उदात्तं नाम तं प्राहुरलङ्कारं मनीषिणः ॥३००

आरभमाणस्य कर्त्तुमुद्युक्तस्य दैववशात् अकस्मात् पुनः तस्य साधनस्य समाधानस्य या समापत्तिः संयोगः तत् समाहितम् आहुः। समाधानरूपत्वात् अन्वर्थसंज्ञेयमिति। दैववशादिति तु न नियमपरं बुद्धिपूर्वककारणान्तरालम्बनेन कार्य्यसमाधानेऽपि अस्य सद्भावात्। तदुक्तं भोजराजेन, कार्य्यारम्भे सहायाप्तिर्दैवाद् दैवाकृते च या। आकस्मिकी बुद्धिपूर्वोभयी वा तत् समाहितम् इति ॥ २९८ ॥

समाहितमुदाहरति मानमिति। अस्याः मानिन्याः मानं निराकर्त्तुं पादयोः पतिष्यतः मे मम उपकाराय दिष्ट्या दैवेन एतत् घनगर्जितम् उदीर्णम्। अत्र मानभङ्गाय पादपतनप्रवृत्तस्य दैवादुदीर्णेन घनगर्जितेन तस्यातीवोद्दीपकत्वात् अक्लेशेन तत्समाधानमिति समाहितमलङ्कारः ॥ २९९ ॥

उदात्तं निरूपयति आशयस्येति। आशयस्य अभिप्रायस्य विभूतेः सम्पत्तेः वा यत् अनुत्तमम् अलौकिकं महत्त्वम् आधिक्यं, मनीषिणः तम् उदात्तं नाम अलङ्कारं प्राहुः। तथाच, प्रस्तुतस्य उदाराशयत्ववर्णनेन लोकातिशयसम्पद्वर्णनेन च यद् वैचित्र्य स एव उदात्तालङ्कार इति निष्कर्षः। केचित् तु, यत्रापि प्रस्तुतस्याङ्गं महतां चरितं भवेदिति आहुः।

गुरोः शासनमत्येतुं न शशाक स राघवः ।
यो रावणशिरश्छेदकार्य्यभारेऽप्यविक्लवः ॥ ३०१ ॥
रत्नभित्तिषु संक्रान्तैः प्रतिबिम्बशतैर्वृतः ।
ज्ञातो लङ्केश्वरः कृच्छ्रादाञ्जनेयेन तत्त्वतः ॥३०२॥
पूर्वत्राशयमाहात्म्यमत्राभ्युदयगौरवम् ।
सुव्यञ्जितमिति प्रोक्तमुदात्तद्वयमप्यदः ॥ ३०३ ॥

उदात्तम् ।

तन्मते प्रस्तुतस्य अङ्गत्वेन महतां चरित्रवर्णनमपि उदात्तालङ्कार इति बोध्यम् ॥ ३०० ॥

आशयमहत्त्वे उदाहरति गुरोरिति। यः रावणस्य शिरश्छेदः कार्य्यं तस्य भारः तस्मिन्नपि अविक्लवः अव्याकुलः, स राघवः गुरोः पितुः शासनं राज्यत्यागपूर्वकवनगमनादेशम् अत्येतुम् अतिक्रमितुं न शशाक। अत्र रावणबधरूपासाध्यसाधनक्षमस्य तादृशगुरुनिदेशवर्त्तित्वेन अलौकिकं माहात्म्यं प्रतीयते इत्युदात्तत्वम् ॥ ३०१ ॥

विभूतिमहत्त्वे उदाहरति। रत्नभित्तिष्विति। आञ्जनेयेन अञ्जनासुतेन हनुमता कृच्छ्रात् अतिकष्टेन बहुपर्य्यालोचनया इत्यर्थः रत्नभित्तिषु संक्रान्तैः प्रतिफलितैः प्रतिबिम्बानां शतैः वृतः लङ्केश्वरः रावणः तत्त्वतः ज्ञातः ईदृशैश्वर्य्यशाली नास्तीति अयमेव लङ्केश्वर इति विदित इत्यर्थः। अत्र लङ्केश्वरस्य तादृशैश्वर्य्यमहत्त्वकीर्त्तनमेव उदात्तालङ्कार इति ॥ ३०२ ॥

द्वैविध्यमुपसंहरति पूर्वत्रेति। पूर्वत्र गुरोरित्युदाहरणे

अपह्नुतिरपह्नुत्य किञ्चिदन्यार्थदर्शनम् ।
न पञ्चेषुः स्मरस्तस्य सहस्रं पत्रिणामिति ॥ ३०४
चन्दनं चन्द्रिका मन्दो गन्धवाहश्च दक्षिणः ।
सेयमग्निमयी सृष्टिर्मयि शीता परान् प्रति ॥ ३०५
शैशिर्य्यमभ्युपेत्यैव परेष्वात्मनि कामिना ।
औष्ण्यप्रकाशनात्तस्य सेयं विषयनिह्नुतिः ॥ ३०६

आशयस्य माहात्म्यम्, अत्र रत्नभित्तिष्वित्युदाहरणे अभ्युदयस्य गौरवं सुव्यञ्जितं सुप्रतीतमिति अदः उदात्तद्वयं प्रोक्तम् उभयत्रापि वैचित्र्यस्य सद्भावादिति भावः ॥ ३०३ ॥

अपह्नुतिं निरूपयति अपह्नुतिरिति । किञ्चित् किमपि प्रकृतम् अपह्नुत्य अपलप्य अन्यस्य अर्थस्य दर्शनं व्यवस्थापनम् अपह्नुतिः । अत्र धर्मापह्नवेन धर्मान्तरारोपणं तत्त्वापह्नव रूपके धर्मिनिषेधेन धर्म्यन्तरारोप इत्यनयोर्भेदः । उदाहरति नेति । स्मरः कामः पञ्चेषुर्न तन्मात्रेषुभिः समग्रजगतामेतादृशपीड़नासम्भवादिति भावः, अतस्तस्य पत्रिणां सहस्रम् अस्तीति शेषः । अत्र स्मरस्य पञ्चेषुत्वधर्मं प्रतिषिध्य सहस्रेषुत्वरूपधर्मान्तरारोपरूपापह्नुतिरिति बोध्यम् ॥ ३०४ ॥

विषयापह्नुतिमुदाहरति चन्दनमित्यादि । चन्दनं चन्द्रिका तथा मन्दः दक्षिणः गन्धवाहः सा इयं मयि विरहिणीत्यर्थः अग्निमयी सृष्टिः अग्निवत् मया प्रतीयते इत्यर्थः, परान् अन्यान् अविरहिण इत्यर्थः प्रति शीता शीतला सृष्टिः तेषामतीवसुखकरत्वादिति भावः । अत्र कामिना परेषु शैशिर्य्यं शीतलत्वमभ्युपेत्य आरोप्य आत्मनि औष्ण्यप्रकाशनात् अग्नि

अमृतस्यन्दिकिरणश्चन्द्रमा नामतो मतः ।
अन्य एवायमर्थात्मा विषनिष्यन्दिदीधितिः ॥३०७॥
इति चन्द्रत्वमेवेन्दौ निवर्त्त्यार्थान्तरात्मता ।
उक्ता स्मरार्त्तेनेत्येषा स्वरूपापह्नुतिर्मता ॥३०८॥
उपमापह्नुतिः पूर्वमुपमास्वेव दर्शिता ।

मयत्वधर्मारोपणेन चन्दनादीनां शैत्यदाहकत्वयोर्विषयभेदस्य कीर्त्तनात् विषयापह्नुतिरियमित्यन्वयः ॥ ३०५ ॥ ३०६ ॥

स्वरूपापह्नुतिमाह अमृतेत्यादि । चन्द्रमाः अमृतस्यन्दिनः किरणा यस्य सः नामतः नाम्नैव मतः ख्यातः न तु अर्थत इत्यर्थः तस्य किरणानाम् अमृतस्यन्दित्वस्य प्रत्यक्षविरुद्धत्वादिति भावः। विरहिण उक्तिरियम्। विरहे चन्द्रकिरणस्य अतीवोद्दीपकत्वादसह्यत्वमिति बोध्यम्। अयं चन्द्रमाः अन्यः अर्थात्मा वस्तुस्वरूप एव, अर्थोऽभिधेयरै वस्तुप्रयोजननिवृत्तिष्वित्यमरः। चन्दति आह्लादयतीति व्युत्पत्तिलभ्यार्थात् अन्यपदार्थ एवेत्यर्थः। यथा, मण्डपादिशब्दा व्युत्पत्तिलभ्येषु मण्डपानकर्त्तृरूपेषु अर्थेषु अशक्ता गृहादिरूपार्थवाचकास्तद्वदिति भावः, अतः विषनिष्यन्दिन्यो दीधितयो यस्य तथोक्तः। इत्यत्र स्मरार्त्तेन विरहिणा इत्यर्थः इन्दौ चन्द्रत्वम् आह्लादकत्वस्वरूपत्वं निवर्त्त्य निषिध्य अपह्नुत्य इत्यर्थः अर्थान्तरात्मता वस्त्वन्तरस्वरूपत्वम् उक्ता आरोपिता, अतः एषा स्वरूपापह्नुतिर्मता ॥ ३०७ ॥ ३०८ ॥

उपमापह्नुतिरिति। उपमायाः सादृश्येन अपह्नुतिः पूर्वम् उपमासु उपमालङ्कारभेदेषु एव मध्ये दर्शिता प्रतिषेधोपमा-

इत्यपह्नुतिभेदानां लक्ष्यो लक्ष्येषु विस्तरः ॥३०९

अपह्नुतिचक्रम् ।

श्लिष्टमिष्टमनेकार्थमेकरूपान्वितं वचः ।

तदभिन्नपदं भिन्नपदप्रायमिति द्विधा ॥ ३१० ॥

स्थया वर्णिता इत्यर्थः । इति उक्तरूपाया अपह्नुत्या भेदान विस्तरः लक्ष्येषु यथायथं लभ्येषु उदाहरणेषु लक्ष्यः अनुसन्धे इत्यर्थः ॥ ३०९ ॥

श्लेषं लक्षयति श्लिष्टमिति। अनेकार्थम् अभिधया युग पदनेकार्थप्रतिपादकम् एकेन अभिन्नेन रूपेण आकारेण अन्वितं युक्तं वचः श्लिष्टं श्लेषालङ्कारयुक्तम् इष्टं कविभिरभि लषितम्। तथाच, शब्दार्थयोरेकतावभासहेतुः सम्बन्धविशेषः श्लेषः, स चात्र शब्दयोरेकप्रयत्नोच्चार्य्यत्वरूपः अर्थयोस्तु एक प्रयत्नोच्चार्य्यमाणशब्देन ऐककालिकत्वबोधरूपः। अन्ये तु शब्दयोर्जतुकाष्ठन्यायेन अर्थयोश्च एकवृन्तगतफलद्वयन्यायेन श्लेष इत्याहुः। यत्र अभिन्नया वृत्त्या शब्दस्य अनेकार्थत्वं तत्रैव श्लेषः, यत्र तु अनेकार्थत्वेऽपि शक्तिसङ्कोचकानां संयोगा दीनां सद्भावः। यदुक्तं विश्वनाथेन, संयोगो विप्रयोगश्च साह चर्य्यं विरोधिता। अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः। शब्दार्थस्या नवच्छेदे विशेषस्मृतिहेतवः॥ यथा, 'सशङ्खचक्रो हरिरित्यत्र शङ्खचक्रसंयोगेन हरिशब्दो विष्णुमेवाभिधत्ते इत्यादि। तत्र न श्लेषः अभिधया युगपदर्थद्वयप्रतीतेरभावात्, तादृशस्थले संयोगादिना एकार्थबोधनात् अभिधायां विरतायां पश्चात् व्यञ्जनया अर्थान्तरप्रतीतौ ध्वनित्वमेव। यथा, भद्रात्मनो

असावुदयमारूढ़ः कान्तिमान् रक्तमण्डलः।
राजा हरति लोकस्य हृदयं मृदुभिः करैः ॥३११॥

दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसंग्रहस्य। यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूदित्यत्र प्रकरणेन प्रथमं प्रकृतः पुरुषः प्रतीयते, पश्चात् व्यञ्जनया हस्तीति। तत्र अर्थस्य अनेकत्वं क्वचिद् वस्तुतः, क्वचिदेकरूपत्वेऽपि सम्बन्धिभेदेन इति बोध्यम्। आद्यस्तावत् शब्दश्लेषः द्वितीयस्तु अर्थश्लेष इति विश्वनाथादयः। तस्य द्वैविध्यमाह तदिति। तत् वचः अभिन्नपदं शक्यतावच्छेदकस्य विभिन्नत्वेऽपि एकप्रकृतिप्रत्ययसमासादिघटितत्वेन अभिन्नानि पदानि यस्मिन् तत्, तथा भिन्नानाम् अनेकप्रकृतिप्रत्ययादिघटितत्वेन विलक्षणानां पदानां प्रायो बाहुल्यं यत्र तत्। तथाच अभिन्नपदवाक्ये अभङ्गश्लेषः भिन्नपदवाक्ये सभङ्गश्लेष इति द्विविधत्वं शेषस्तु समधिकचमत्कारितया कविभिर्बाहुल्येन प्रयुज्यत इति प्रायपदाभिप्रायः। विश्वनाथस्तु, श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते। वर्णप्रत्ययलिङ्गानां प्रकृत्योः पदयोरपि। श्लेषाद् विभक्तिवचनभाषाणामष्टधा च सः। तत्र वर्णश्लेषो यथा, प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता। अवलम्बनाय दिनभर्त्तुरभून्न पतिष्यतः करसहस्रमपीत्यत्र विधाविति विधिविधुशब्दयोरिकारोकारयोर्वर्णयोः श्लेष इत्याद्यष्टधा भेदमाह ॥ ३१० ॥

तत्राभिन्नपदमुदाहरति असाविति। उदयमुन्नतिम् उदयाचलञ्च आरूढ़ः कान्तिमान् कमनीयमूर्त्तिः किरणमाली च रक्तमण्डलः अनुरक्तप्रकृतिः लोहितादृश्च राजा नृपः

दोषाकरेण सम्बध्नन् नक्षत्रपथवर्त्तिना ।
राज्ञा प्रदोषोमामित्थमप्रियं किं न बाधते ॥३१२॥
उपमारूपकाक्षेपव्यतिरेकादिगोचराः ।
प्रागेव दर्शिताः श्लेषा दर्श्यन्ते केचनापरे ॥ ३१३ ॥

शशी च मृदुभिः अल्पैः शीतलैश्च करैः राजस्वैः किरणैश्च लोकस्य हृदयं हरति । अत्र संयोगिनियमाभावात् राजचन्द्रौ द्वावपि वाच्यौ, उदयादिपदान्यपि एकप्रकृतिप्रत्ययसाधितत्वादभिन्नानीति अभङ्गश्लेषः ॥ ३११ ॥

भिन्नपदमुदाहरति दोषाकरेणेति । प्रदोषः रजनीमुखं प्रकृष्टदोषश्च कश्चित् पुरुषः दोषाकरेण दोषायाः करः तेन निशाकरेण दोषस्य आकरेण च तथा नक्षत्रपथे आकाशपथे वर्त्तत इति तथोक्तेन क्षत्रपथे क्षत्रोचिताचारे न वर्त्तमानेन च राज्ञा चन्द्रेण नृपेण च सम्बध्नन् संयोगं प्राप्नुवन् सन् अप्रियम् प्रियारहितं द्वेष्यञ्च माम् इत्थम् एवंप्रकारेण किं कथं बाधते पीड़यति । अत्र दोषाकरेणेत्यादिपदानि प्रकृतिप्रत्ययसमासैर्भिन्नानीति सभङ्गश्लेषः । राज्ञेत्यत्र तु अभङ्गः तदत्र सभङ्गाभङ्गश्लेष इति त्रैविध्यम् । उक्तञ्च, पुनस्त्रिधा सभङ्गोऽथ भङ्गस्तदुभयात्मकः इति । केवलसभङ्गोदाहरणं विश्वनाथेन दर्शितम् । यथा, पृथुकार्त्तस्वरपात्रं भूषितनिःशेषपरिजनं देव ! । विलसत्करेणुगहनं सम्प्रति सममावयोः सदनमिति ॥ ३१२ ॥

श्लेषस्य प्राधान्यं दर्शयित्वा अलङ्कारविशेषेषु अस्याङ्गत्वं दर्शयिष्यन्नाह उपमेति । प्रागेव उपमारूपकाक्षेपव्यतिरेकादिगोचरा येषां तादृशाः श्लेषाः दर्शिताः अपरे केचन अपराऽलङ्काराङ्गभूता इत्यर्थः दर्श्यन्ते । तत्र साधारणधर्मप्रयोगी

अस्त्यभिन्नक्रियः कश्चिदविरुद्धक्रियोऽपरः।
विरुद्धकर्मा चास्त्यन्यः श्लेषो नियमवानपि ॥३१४॥
नियमाक्षेपरूपोक्तिरविरोधी विरोध्यपि।
तेषां निदर्शनेष्वत्र रूपमाविर्भविष्यति ॥ ३१५ ॥
वक्राः स्वभावमधुराः शंसन्त्यो रागमुल्वणम्।
दृशो दूत्यश्च कर्षन्ति कान्ताभिः प्रेषिताः प्रियान्३१६

धर्मोपमायां श्लेषोपमायाञ्च अर्थश्लेषः, समानोपमायान्तु शब्द-श्लेषः, एवमन्यत्रापि बोध्यम् ॥ ३१३ ॥

दर्शयिष्यमाणानां भेदानाह अस्तीति। कश्चित् श्लेषः अभिन्नक्रियः, कश्चित् अविरुद्धक्रियः अपरः विरुद्धकर्मा, अन्यः अनियमवान्, नियमाक्षेपरूपोक्तिः, अविरोधी, तथा विरोधी निदर्शनेषु वक्ष्यमाणेषु उदाहरणेषु तेषां भेदानां रूपं स्वरूपम् आविर्भविष्यति प्रकाशिष्यते ॥ ३१४ ॥ ३१५ ॥

तत्र अभिन्नक्रियमुदाहरति वक्रा इति। कान्ताभिः प्रेषिताः प्रक्षिप्ताः आनेतुं प्रेरिताश्च वक्राः स्वभावकुटिलाः कुटिलमार्गदर्शयित्र्यश्च, स्वभावेन मधुराः मनोहारिण्यः मिष्ट-भाषिण्यश्च तथा उल्वणम् अतिप्रवृद्धं रागं लौहित्यं प्रेमानु-रागञ्च शंसन्त्यः सूचयन्त्यः प्रकाशयन्त्यश्च दृशः नयनानि दूत्यश्च प्रियान् कर्षन्ति। अत्र वक्रादीनां श्लिष्टता, कर्षणक्रिया तु उभयत्रैकैव इति अभिन्नक्रियः श्लेषस्तुल्ययोगितालङ्कारस्य पोषकत्वात् तदङ्गम्। केचित् तु एकया क्रियया वाक्यद्वयस्य दीपनात् प्रधानस्य दीपकस्य अङ्गमित्याहुः ॥ ३१६ ॥

मधुरा रागवर्द्धिन्यः कोमलाः कोकिलागिरः ।
आकर्ण्यन्ते मदकलाः श्लिष्यन्ते चासितेक्षणाः ॥ २१७ ॥
रागमादर्शयन्नेष वारुणीयोगवर्द्धितम् ।
तिरोभवति घर्मांशुरङ्गजस्तु विजृम्भते ॥ २१८ ॥
निस्त्रिंशत्वमसावेव धनुष्येवास्य वक्रता ।

अविरुद्धक्रियमुदाहरति मधुरा इति । मधुराः मनोज्ञारिण्यः माधुर्य्याख्यस्वाभाविकाङ्गनालङ्कारवत्यश्च । माधुर्यलक्षणन्तु उक्तं यथा सर्वावस्थाविशेषेषु माधुर्य्यं रमणीयतेति । रागवर्द्धिन्यः उद्दीपकत्वात् प्रणयाविष्करणाच्च अनुरागं वर्द्धयन्त्यः कोमलाः सुखश्रवाः मृदङ्ग्यश्च तथा मदकलाः मदोन्मत्ताः सौभाग्यादिजनितगर्वान्विताश्च । मदलक्षणन्तूक्तं यथा मदो विकारः सौभाग्ययौवनाद्यवलेपज इति । कोकिलानां गिरः वाचः असितेक्षणाश्च आकर्ण्यन्ते तथा श्लिष्यन्ते आलिङ्ग्यन्ते च । इत्यत्र आकर्णनश्लेषणक्रिययोरेककालीनत्वसम्भवाम् अविरुद्धक्रियोऽयमभङ्गश्लेषः पूर्ववत् तुल्ययोगितामेव पुष्णातीति तदङ्गम् ॥ २१७ ॥

विरुद्धक्रियमुदाहरति रागमिति । एष घर्मांशुः सूर्यः वारुण्याः पश्चिमाशायाः सुरायाश्च योगेन समाश्रयेण पानेन च वर्द्धितं रागं लौहित्यम् अनुरागञ्च आदर्शयन् प्रकटयन् वर्द्धयंश्च तिरोभवति अस्तं गच्छति, अङ्गजस्तु कामस्तु विजृम्भते उद्योतते । अत्र तिरोभवनजृम्भणक्रिये परस्परं विरुद्धे इति विरुद्धक्रियश्लेषस्तथैव तुल्ययोगितां परिपुष्णातीति तदङ्गम् ॥ २१८ ॥

नियमवन्तमुदाहरति निस्त्रिंशत्वमिति । अस्य नरेन्द्रस्य

शरेष्वेव नरेन्द्रस्य मार्गणत्वञ्च वर्त्तते ॥ ३१९ ॥
पद्मानामेव दण्डेषु कण्टकस्त्वयि रक्षति ।
अथवा दृश्यते रागिमिथुनालिङ्गनेष्वपि ॥ ३२० ॥

असौ खड्गे एव न तु अन्यत्र निस्त्रिंशत्वं निर्गतस्त्रिंशतोऽङ्गुलिभ्य इति व्युत्पत्त्या त्रिंशदङ्गुल्यधिकपरिमाणवत्त्वं निर्दयत्वञ्च, अथ निस्त्रिंशः खड्गे ना निर्दये त्रिषु इति मेदिनी। वक्रता कौटिल्यं प्रतिकूलता च धनुष्येव नान्यत्र मार्गणत्वं बाणत्वं शरेषु एव न तु आत्मनि इत्यर्थः, वर्त्तते इति सर्वत्रान्वेतव्यम्। अत्र प्रत्येकमेवकारेण द्वितीयार्थानां व्यवच्छिन्नत्वात् नियमवानर्थश्लेषः परिसङ्ख्याऽलङ्कारं पुष्णातीति तदङ्गम्। परिसंख्यालङ्कारश्च ग्रन्थकृतानुक्तः परं वैचित्र्यसद्भावात् अपरैरुक्तः। यथा, प्रश्नादप्रश्नतो वापि कथितात् वस्तुनो भवेत्। तादृगन्यव्यपोहश्चेच्छाब्द आर्थोऽथवा तदा ॥ परिसंख्येति। यदि च, विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति। अत्र च अन्यत्र च प्राप्ते परिसंख्येति गीयते॥ इति नियमपरिसंख्ययोर्भेदः प्रतीयते, किन्तु अत्र परिसङ्ख्या अन्यव्यपोहमात्रप्रतीतिरेव न तु तादृग्लक्षणेति अविरोध इति बोध्यम्॥ ३१९॥

नियमाक्षेपरूपोक्तिमुदाहरति पद्मानामिति। त्वयि रक्षति सति पद्मानामेव दण्डेषु नालेषु न तु दण्डनामकोपायेषु, अथवा रागिणः अनुरक्तस्य मिथुनस्य स्त्रीपुंसयोरालिङ्गनेषु अपि कण्टकः तीक्ष्णाग्रावयवः रोमाञ्चः क्षुद्रशत्रुश्च, रोमाञ्चे क्षुद्रशत्रौ च तरोरङ्गे च कण्टक इति कोषः। दृश्यते। अत्र पद्मानामेवेति नियमस्य अथवेत्यादिना आक्षेपरूपा उक्तिरिति

महीभृद् भूरिकटकस्तेजस्वी नियतोदयः ।
दक्षः प्रजापतिश्चासीत् स्वामी शक्तिधरश्च सः ॥ ३२१ ॥
अच्युतोऽप्यवृषच्छेदी राजाप्यविदितक्षयः ।
देवोऽप्यविबुधो जज्ञे शङ्करोऽप्यभुजङ्गवान् ॥ ३२२ ॥

श्लेषचक्रम् ।

नियमाक्षेपरूपोक्तिः पूर्वार्द्धे स्थितायाः परिसंख्यायाः द्वितीयार्द्धे च एकत्रनिहितकण्टकस्य वाक्यद्वयोद्दीपनात् प्राधान्येन स्थितस्य दीपकस्य अङ्गमित्यवधेयम् ॥ ३२० ॥

अविरोधिनमुदाहरति महीभृदिति । सः महीभृत् राजा पर्वतश्च भूरिकटकः बहुस्कन्धावारः विशालनितम्बश्च, तेजस्वी प्रतापवान् मयूखमाली च, नियतोदयः सततोन्नतिशाली प्रतिदिवसं जातोद्गमश्च, दक्षः निपुणः ऋषिविशेषश्च, प्रजापतिः प्रजापालः सृष्टिकर्त्ता च, स्वामी प्रभुः विशाखश्च, स्वामी प्रभुविशाखयोरिति मेदिनी। शक्तिधरः प्रभावोत्साहमन्त्रजशक्तिसम्पन्नः अस्त्रविशेषवांश्च, आसीत् । अत्र महीभृदादिश्लिष्टपदार्थानां परस्परसम्बन्धे अविरोधात् अयम् अविरोधी श्लेषः ॥ ३२१ ॥

विरोधिनमुदाहरति अच्युत इति । अच्युतः सत्पथादभ्रष्टः विष्णुश्च अपि अवृषच्छेदी वृषः धर्मः तदाख्योऽसुरश्च तस्य छेदी न भवतीति तथोक्तः, राजा नरपतिः चन्द्रश्च अपि अविदितः अज्ञातः क्षयः क्षीणता दुर्बलता इत्यर्थः रोगविशेषश्च येन तादृशः, देवः राजा अमरश्च अपि अविबुधः विगतपण्डितः देवश्च न भवतीति तथोक्तः, शङ्करः शुभकृत् हरश्च अपि अभुजङ्गवान् दुर्जनरहितः सर्परहितश्च जज्ञे, स इति कर्त्तृपद-

गुणजातिक्रियादीनां यत् तु वैकल्यदर्शनम् ।
विशेषदर्शनायैव सा विशेषोक्तिरिष्यते ॥ ३२३ ॥
न कठोरं न वा तीक्ष्णमायुधं पुष्पधन्वनः ।
तथापि जितमेवासीदमुना भुवनत्रयम् ॥ ३२४ ॥

मध्याहार्य्यम् । अत्र अच्युतादिपदानां द्वितीयार्थे विष्णादौ वृषच्छेद्यादिपदार्थान्वयो विरुद्ध इति विरोधवान् अयं श्लेषः विरोधाभासस्याङ्गम् ॥ ३२२ ॥

विशेषोक्तिं निरूपयति गुणेति । विशेषस्य प्रस्तुतस्य वीर्य्याद्यतिशयः तस्य दर्शनाय प्रतिपत्तये गुणजातिक्रियाणाम् आदिपदेन द्रव्याणाञ्च यत् तु वैकल्यदर्शनं कार्य्यसिद्धावनुपयोगित्वप्रतिपादनं सा विशेषोक्तिर्नाम अलङ्कार इष्यते इत्यन्वयः । अतिशयोक्तौ, प्रस्तुतस्य विशेषदर्शनसद्भावेऽपि गुणादीनां वैकल्यप्रतिपादनं नास्तीत्यनयोर्भेदः । एवकारेण विशेषदर्शनाभावे नायमलङ्कार इति ध्वनितम् । विश्वनाथादयस्तु, सति हेतौ फलाभावो विशेषोक्तिस्तथा द्विधेति लक्षणमाहुः ॥ ३२३ ॥

अत्र गुणवैकल्ये विशेषोक्तिमुदाहरति नेति । पुष्पधन्वनः आयुधम् अस्त्रं न कठोरं न वा तीक्ष्णं, पुष्पमयत्वादिति भावः, तथापि अमुना भुवनत्रयं जितमेव आसीत् । अत्र कामस्य वीर्य्योत्कर्षरूपविशेषप्रदर्शनाय आयुधस्य कठोरत्वतीक्ष्णत्वरूपयोर्गुणयोर्वैकल्यदर्शनरूपा विशेषोक्तिः । विभावनायां गूढ़कारणस्य स्वाभाविकत्वस्य वा विभावने तात्पर्य्यमस्ति अत्र तु विलोपकरणं कार्य्यनिष्पादकतया वर्णना यस्य उत्कर्षप्रतिपादने तात्पर्य्यमस्तीत्यनयोर्भेदः ॥ ३२४ ॥

न देवकन्यका नापि गन्धर्वकुलसम्भवा ।
तथाप्येषा तपोभङ्गं विधातुं वेधसोऽप्यलम् ॥ ३२५ ॥
न बद्धा भ्रुकुटिर्नापि स्फुरितो दशनच्छदः ।
न च रक्ता भवद्दृष्टिर्जितञ्च द्विषतां बलम् ॥ ३२६ ॥
न रथा न च मातङ्गा न हया न च पत्तयः ।
स्त्रीणामपाङ्गदृष्ट्यैव जीयते जगतां त्रयम् ॥ ३२७ ॥

जातिवैकल्ये विशेषोक्तिं दर्शयति नेति । एषा देवकन्यका न, गन्धर्वकुलसम्भवापि न, तथापि वेधसः ब्रह्मणोऽपि तपोभङ्गं विधातुम् अलं शक्ता । अत्र देवत्वगन्धर्वत्वरूपजातिनैरपेक्ष्येण तपोभङ्गसामर्थ्यवर्णनात् नायिकायाः मनोमोहित्वातिशयरूपविशेषः प्रतिपादित इति जातिवैकल्ये विशेषोक्तिः ॥ ३२५ ॥

क्रियावैकल्ये विशेषोक्तिं दर्शयति नेति । भ्रुकुटिः न बद्धा, दशनच्छदः अधरश्च न स्फुरितः, न कल्पितः दृष्टिश्च न रक्ता अभवत्, तथापि द्विषतां शत्रूणां बलं जितञ्च । अत्र बन्धनं स्फुरणं रञ्जनञ्च क्रिया, तेषाञ्च वैकल्यप्रतिपादनं वर्णनीयस्य वीरस्य उत्कर्षद्योतनाय, अतस्तत् क्रियावैकल्ये विशेषोक्तिरिति ॥ ३२६ ॥

द्रव्यवैकल्ये विशेषोक्तिं दर्शयति नेति । स्त्रीणाम् अपाङ्गदृष्ट्या एव कर्त्र्या जगतां त्रयं जीयते, रथा न, मातङ्गा न, हया न, पत्तयश्च न उपयोगिन इति शेषः । अत्र रथादीनां द्रव्याणां वैकल्यप्रतिपादनरूपविशेषोक्तिः ॥ ३२७ ॥

एकचक्रो रथो यन्ता विकलो विषमा हयाः ।
आक्रामत्येव तेजस्वी तथाप्यर्को नभस्तलम् ॥३२८॥
सैषा हेतुविशेषोक्तिस्तेजस्वीतिविशेषणात् ।
अयमेव क्रमोऽन्येषां भेदानामपि कल्पने ॥ ३२९ ॥

विशेषोक्तिचक्रम् ।

विवक्षितगुणोत्कृष्टैर्यत्समीकृत्य कस्यचित् ।
कीर्त्तनं स्तुतिनिन्दार्थं सा मता तुल्ययोगता३३०

हेतुविशेषोक्तिं दर्शयति एकचक्र इति। रथः एकचक्रः, यन्ता सारथिः विकलः अङ्गहीनः अनरुत्वादिति भावः हयाः अश्वाः विषमाः अयुग्माः सप्तसंख्यकत्वादिति भावः, तथापि अर्कः सूर्य्यः नभस्तलम् आक्रामति एव यतः सः तेजस्वीत्यन्वयः। अत्रापि रथादीनां द्रव्याणां वैकल्यप्रतिपादनरूपविशेषोक्तिस्तेजस्वित्वरूपहेतुकथनेन समधिकं वैचित्र्यमादधातीति हेत्वलङ्कारानुप्राणिता इति बोध्यम् ॥ ३२८ ॥

सैषेति। तेजस्वीति विशेषणात् हेतुगर्भादिति भावः सा एषा विशेषोक्तिः हेतुविशेषोक्तिः सहेतुका इत्यर्थः, अन्येषामपि भेदानां विशेषाणां कल्पने अयमेव क्रमः नियमः यथा हेत्वलङ्कारसद्भावेनास्या भेदः तथान्येषामपि अलङ्काराणां सद्भावेनेति भावः ॥ ३२९ ॥

तुल्ययोगितां निरूपयति विवक्षितेति। विवक्षिताः प्रस्तुतगतत्वेन इष्टा ये गुणाः तैरुत्कृष्टैः विख्यातैः अप्रस्तुतैः समीकृत्य तुल्यपक्षीकृत्य कस्यचित् प्रस्तुतस्य स्तुतिनिन्दार्थं स्तुत्यर्थं निन्दार्थं वा कीर्त्तनं सा तुल्ययोगिता मता इत्यन्वयः। विव-

यमः कुवेरो वरुणः सहस्राक्षो भवानपि ।
विभ्रत्यनन्यविषयां लोकपाल इति श्रुतिम् ॥३३१॥

सङ्गतानि मृगाक्षीणां तड़िद्विलसितानि च ।
क्षणद्वयं न तिष्ठन्ति घनारब्धान्यपि स्वयम् ॥३३२॥

तुल्ययोगिता ।

क्षितगुणोत्कृष्टैरिति बहुत्वमविवक्षितं द्वाभ्यामेकेन वा समी करणेऽपि अस्याः सद्भावादिति बोध्यम् । दीपके वाक्यान्तरीय पदस्य अनुषङ्गादिना वाक्यान्तरार्थोद्दीपकत्वम् इह तु स्तुति निन्दार्थसमीकरणमित्यनयोर्भेदः । उपमायां वाच्यार्थस्य व्यङ्ग्या र्थस्य वा साम्यप्रतीतिः शाब्दी इह तु सर्वेषां समकक्षतया शाब्दबोधविषयत्वात् पर्य्यवसाने सादृश्यप्रतीतिरित्यनयोर्भेदः । तथाच विवक्षितगुणशालित्वेन अप्रस्तुतैः सह प्रस्तुतस्य सम कक्षतया तादृग्गुणवत्त्वकीर्त्तनेन स्तुतिनिन्दा वा तुल्ययोगि तेति निष्कर्षः ॥ ३३० ॥

तत्र स्तुतावुदाहरति यम इति । यमः कुवेरः वरुणः सह स्राक्षः इन्द्रः तथा भवान् अनन्यविषयाम् अनन्यसक्तां लोकपाल इति श्रुतिम् आख्यां विभ्रति । अत्र लोकपालत्वरूपो गुण प्रस्तुते राज्ञि विवक्षितः, तेन च गुणेन उत्कृष्टैः यमादिभिः सह समकक्षतया कीर्त्तनेन स्तुतिरूपा तुल्ययोगिता ॥ ३३१ ॥

निन्दायामुदाहरति सङ्गतानीति । मृगाक्षीणां सङ्गतानि सङ्गमाः तड़िद्विलसितानि च स्वयं घनारब्धानि घनं निविड़ं गाढ़ं यथा तथा अन्यत्र घनैर्मेघैरारब्धानि अपि क्षणद्वयं न तिष्ठन्ति क्षणमात्रस्थायित्वात्तेषामिति भावः । अत्र क्षणस्थायि त्वरूपो गुणो वर्णनीये मृगाक्षीसङ्गमे विवक्षितः, तेन च अ

विरुद्धानां पदार्थानां यत्र संसर्गदर्शनम् ।
विशेषदर्शनायैव स विरोधः स्मृतो यथा ॥ ३३३ ॥
कूजितं राजहंसानां वर्द्धते मदमञ्जुलम् ।
क्षीयते च मयूराणां रुतमुत्क्रान्तसौष्ठवम् ॥३३४॥

स्तुततड़िद्विलसितस्य समकक्षतया वर्णनेन निन्दाप्रतीयमाना तुल्ययोगिता, सा च घनारब्धानीति श्लेषानुप्राणिततया समधिकां चारुतां पुष्णातीति बोध्यम् ॥ ३३२ ॥

विरोधं लक्षयति विरुद्धानामिति । विशेषस्य प्रस्तुतगतोत्कर्षस्य दर्शनाय प्रतिपादनाय एव विरुद्धानां परस्परविरोधिनां पदार्थानां यत्र वैचित्र्य संसर्गदर्शनं सम्बन्धप्रतिपादनं सामानाधिकरण्यकीर्त्तनमित्यर्थः सः विरोधः स्मृतः । यथेति उदाहरणार्थम् । तथाच प्रस्तुतोत्कर्षप्रतिपत्तये आपाततः विरुद्धत्वेन प्रतीयमानानां पदार्थानां सामानाधिकरण्यप्रतिपादनरूपं वैचित्र्यं विरोध इति निष्कर्षः । स च जात्यादिभिर्जातेरिति चतुर्विधः गुणादिभिर्गुणस्येति त्रिविधः, क्रियाद्रव्याभ्यां क्रियाया इति द्विविधः, द्रव्यस्य द्रव्येणेति एकविध इति मिलित्वा दशविधो बोद्धव्यम् इति ॥ ३३३ ॥

कूजितमिति । राजहंसानां मदमञ्जुलं मदमनोहरं कुजितं वर्द्धते वृद्धिं गच्छतीति, मयूराणाञ्च उत्क्रान्तं सौष्ठवं मनोहारित्वं यस्मात् तादृशं सत् क्षीयते च । अत्र एकस्मिन्नेव कूजिते रुते च शब्दरूपे कर्त्तरि विरुद्धयोरपि वृद्धिक्षययोः संसर्गदर्शनेन विरोधः सम्बन्धिभेदेन च तत्प्रशमनम् अनेन च प्रस्तुतस्य शरत्कालस्य एकजातीययोरपि बलाबलकारित्वेन वैशिष्ट्यं प्रतीयते इति ॥ ३३४ ॥

प्रावृषेण्यैर्जलधरैरम्बरं दुर्दिनायते ।
रागेन पुनराक्रान्तं जायते जगतां मनः ॥३३५

तनुमध्यं पृथुश्रोणि रक्तौष्ठमसितेक्षणम् ।
नतनाभि वपुः स्त्रीणां कं न हन्त्युन्नतस्तनम्॥३

मृणालबाहु रम्भोरु पद्मोत्पलमुखेक्षणम् ।
अपि ते रूपमस्माकं तन्वि ! तापाय कल्पते॥३

प्रावृषेण्यैरिति । प्रावृषेण्यैः वार्षिकैः जलधरैः अम्बरा आकाशं दुर्दिनायते आच्छन्नं श्यामलमित्यर्थः भवति, जगत मनः पुनः रागेण अनुरागेण लौहित्येन च आक्रान्तं जायते अत्र श्यामलत्वलौहित्ययोरेकजलधरसम्भवत्वरूपसंसर्गकीर्त्तने विरोधः, तस्य श्लेषेण प्रशमनम् । अनेन च प्रस्तुतस्य वर्षासम यस्य वैशिष्ट्यं प्रतीयते ॥ ३३५ ॥

तनुमध्यमिति । स्त्रीणां तनुमध्यं पृथुश्रोणि विशालनितम्ब रक्तौष्ठम् असितेक्षणं कृष्णनयनं नतनाभि गभीरनाभि तथा उन्नतस्तनं वपुः कं जनं न हन्ति न तापयति अपितु सर्वमेवे त्यर्थः । अत्र तनुत्वपृथुत्वयोः रक्तत्वासितत्वयोः नतत्वोन्नतत्व योर्गुणयोर्विरोधेन प्रस्तुतानां स्त्रीणां वैचित्र्यं प्रतीयते, आश्रय भेदाच्च तेषां विरोधपरिहारः ॥ ३३६ ॥

मृणालेति । हे तन्वि ! ते रूपं मृणालवत् शीतलौ बाहू यस्य तत्, रम्भे इव ऊरू यस्य तत्, पद्ममिव उत्पले इव मुख ईक्षणे च यस्य तादृशमपि अस्माकं तापाय कल्पते । अत्र पूर्वोक्ते उपमितिगर्भबहुव्रीहौ शीतलत्वादिकं गुणः तस्य च तापक्रियया विरोधः । मृणाले एव बाहू यस्य इत्यादिरूपक

उद्यानमारुतोद्भूताश्चूतचम्पकरेणवः।
उदश्रयन्ति पान्थानामस्पृशन्तोऽपि लोचने ॥३३८॥
कृष्णार्जुनानुरक्तापि दृष्टिः कर्णावलम्बिनी।
याति विश्वसनीयत्वं कस्य ते कलभाषिणि! ३३९
इत्यनेकप्रकारोऽयमलङ्कारः प्रतीयते।

विरोधचक्रम्।

समासे तु मृणालत्वरम्भात्वादिभिर्जातिभिस्तापक्रिययोः विरोधः। वक्तुर्विरहित्वेन च तस्य परिहारः ॥ ३३७ ॥

उद्यानेति। उद्यानमारुतेन उपवनवायुना उद्भूताः चूतचम्पकानां रेणवः परागाः पान्थानां पथिकानां लोचने नेत्रे अस्पृशन्तोऽपि उदश्रयन्ति उद्गतवाष्पे कुर्वन्ति विरहित्वादिति भावः। अत्र स्पर्शनाभावेऽपि उदश्रयणक्रियेति विरोधः तत्परिहारस्व परागाणामुद्दीपकत्वादिति ॥ ३३८ ॥

कृष्णेति। हे कलभाषिणि मधुरवचने! ते दृष्टिः कृष्णार्जुनानुरक्ता अपि कर्णावलम्बिनी कस्य विश्वसनीयत्वं याति, न कोऽपि विश्वसितीत्यर्थः। अत्र कृष्णार्जुनयोरनुरक्तिः कर्णावलम्बनमिति क्रिययोरापाततः प्रतीयमानोऽपि विरोधः श्लेषेण शाम्यति तद् यथा, कृष्णा श्यामला अर्जुना धवला अनु पश्चाद्भागे प्रान्ते इत्यर्थः रक्ता कर्णावलम्बिनी आकर्णविश्रान्तेति च ॥ ३३९ ॥

इतीति। इति एवंप्रकारेण अयम् अलङ्कारः विरोध इत्यर्थः अनेकप्रकारः बहुविधः प्रतीयते। प्रतीयते इत्यत्र अतिशोभते इत्यपि पाठः।

अप्रस्तुतप्रशंसा स्यादप्रक्रान्तेषु या स्तुतिः ॥ ३४० ॥

सुखं जीवन्ति हरिणा वनेष्वपरसेविनः ।
अन्नैरयत्नसुलभैस्तृणदर्भाङ्कुरादिभिः ॥ ३४१ ॥

सेयमप्रस्तुतैवात्र मृगवृत्तिः प्रशस्यते ।
राजानुवर्त्तनक्लेशनिर्विसेन मनस्विना ॥ ३४२ ॥

अप्रस्तुतप्रशंसा ।

यदि निन्दन्निव स्तौति व्याजस्तुतिरसौ स्मृता ।

इदानीम् अप्रस्तुतप्रशंसां लक्षयति अप्रस्तुतेति। अप्रक्रान्तेषु अप्रस्तुतेषु, षष्ठ्यर्थे सप्तमी बोध्या, बहुवचनमविवक्षितं द्वयोरेकस्य वा अप्रस्तुतत्वेऽपि अस्याः सम्भवात्। या स्तुतिः प्रस्तुतस्य निन्दार्थमित्यध्याहार्य्यम्। तथाच, अप्रस्तुतस्तवेन प्रस्तुतस्य निन्दासूचनमप्रस्तुतप्रशंसेति ॥ ३४० ॥

अप्रस्तुतप्रशंसां दर्शयति सुखमित्यादि। अपरसेविनः परसेवानभिज्ञा इत्यर्थः हरिणाः वनेषु अयत्नसुलभैः अनायासलभ्यैरित्यर्थः तृणदर्भाङ्कुरादिभिः अन्नैः सुखं जीवन्ति। प्रभुसेवाविरक्तस्य भृत्यस्योक्तिरियम्। अत्र राजानुवर्त्तने राजसेवायां यः क्लेशः तेन निर्विसेन प्राप्तनिर्वेदेन केनचित् मनस्विना प्रशस्तमनसा इयम् अप्रस्तुता सा मृगवृत्तिः प्रशस्यते इति अप्रस्तुतप्रशंसा अप्रस्तुतस्य मृगस्य स्तुत्या स्वस्य निन्दासूचनात्। एवकारेण अप्रस्तुतप्रस्तुतयोरुभयोः प्रशंसायां नायमलङ्कार इति सूचितम् ॥ ३४१ ॥ ३४२ ॥

सम्प्रति व्याजस्तुतिं निर्दिशति यदीति। यदीति यद्यर्थे, निन्दन् इव यत् स्तौति असौ व्याजस्तुतिः स्मृता। अत्र

दोषाभासा गुणा एव लभन्ते ह्यत्र सन्निधिम् ३४३
तापसेनापि रामेण जितेयं भूतधारिणी ।
त्वया राज्ञापि सैवेयं जिता मा भून्मदस्तव॥३४४॥

दोषा इव आभास्यन्ते आपाततः प्रतीयन्ते इति दोषाभासाः गुणा एव वस्तुतः अत्र सन्निधिः लभन्ते गुणस्वरूपेणैव परिणमतीत्यर्थः। निन्दन्निव स्तौतीत्यत्र स्तुवन्निव निन्दतीत्यपि प्रत्ययविपरिणामेनान्वेतव्यं वैचित्र्यसाम्यात् वैचित्र्यस्यैवालङ्कारत्वादिति बोध्यम्। तथाच, व्याजेन निन्दाव्याजेन स्तुतिः स्तुतिव्याजेन च निन्दा व्याजस्तुतिरिति निष्कर्षः। उक्तञ्च प्रकाशकारेण, व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढ़िरन्यथेति। उदाहृतञ्च तेनैव। स्तुत्या निन्दायां यथा, हे हेलाजितबोधिसत्त्व! वचसां किं विस्तरैस्तोयधे! नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः। तृष्यत्पान्यजनोपकारघटनावैमुख्य! लब्ध्वा यशो भारस्योद्वहने करोषि कृपया साहायकं यन्मरोरिति। अत्र समुद्रस्य स्तुतिव्याजेन निन्दाप्रतिपादनं चारुतातिशयं दर्शयति॥ ३४३॥

व्याजस्तुतिमुदाहरति तापसेनेति। रामेण परशुरामेण तापसेनापि जयसाधनसामग्रीरहितेनापीति भावः, इयं भूतधारिणी पृथ्वी जिता, त्वया राज्ञाऽपि प्रभूतजयसाधनसामग्रीमताऽपि सैव पृथ्वी न त्वतिरिक्ता जिता अतः तव मदः गर्वः मा भूत्। अत्र प्रस्तुतस्य राज्ञः आपाततः निन्दा प्रतीयत एव परं साक्षाद् भगवदंशावतारेण परशुरामेण महादेवप्रसादलब्धपरशुना या पृथ्वी जिता, त्वया मानवेनापि सा जितेति पर्य्यवसानात् महती स्तुतिर्गम्यत इति॥ ३४४॥

पुंसः पुराणादाच्छिद्य श्रीस्त्वया परिभुज्यते ।
राजन्निक्ष्वाकुवंशस्य किमिदं तव युज्यते ? ॥३४५॥

भुजङ्गभोगसंसक्ता कलत्रं तव मेदिनी ।
अहङ्कारः परां कोटिमारोहति कुतस्तव ? ॥३४६॥

इति श्लेषानुविद्धानामन्येषाञ्चोपलक्ष्यताम् ।
व्याजस्तुतिप्रकाराणामपर्य्यन्तस्तु विस्तरः ॥ ३४७॥

व्याजस्तुतिः ।

अर्थश्लेषमूलां व्याजस्तुतिं दर्शयति पुंस इति । हे राजन् ! त्वया पुरणात् आद्यात् वृद्धाच्च पुंसः आच्छिद्य आकृष्य श्रीर्लक्ष्मीः सम्पत्तिश्च परिभुज्यते । इक्ष्वाकुवंशस्य इक्ष्वाकुवंशीयस्य तव इदं किं युज्यते ? आदिपुरुषादाच्छिन्नायाः लक्ष्म्याः सम्भोगः इक्ष्वाकुवंशीयस्य तव न योग्य इति निन्दया अतिप्रभूतास्ते सम्पद इति स्तुतिर्गम्यते अत्र पुराणपदे श्रीपदे च अर्थगतश्लेषवशात् सर्वाधिकचारुता स्फुटं प्रतीयत इति बोध्यम् ॥ ३४५ ॥

शब्दश्लेषमूलामुदाहरति भुजङ्गेति। भुजङ्गानां भोगाः शरीराणि तैः संसक्ता अन्यत्र भुजङ्गानां जाराणां भोगे संसक्ता मेदिनी तव कलत्रं भार्य्या पाल्या च, तथापि तव अहङ्कारः परां कोटिम् आरोहति कुतः ? अत्र भुजङ्गादिशब्दानामनेकार्थत्वात् शब्दश्लेषमूला व्याजस्तुतिरियम् ॥ ३४६ ॥

व्याजस्तुतिमुपसंहरति इतीति । इति उक्तरूपाणां श्लेषानुविद्धानां तथा अन्येषाञ्च अलङ्कारमूलानां व्याजस्तुतिप्रकाराणाम् अपर्य्यन्तः अशेषः विस्तरः उपलक्ष्यतां ज्ञायताम् ॥३४७॥

अर्थान्तरप्रवृत्तेन किञ्चित् तत् सदृशं फलम्।
सदसद्‌ वा निदर्श्येत यदि तत् स्यान्निदर्शनम्॥३४८
उदयन्नेष सविता पद्मेष्वर्पयति श्रियम्।
विभावयितुमृद्धीनां फलं सुहृदनुग्रहम्॥ ३४९ ॥
याति चन्द्रांशुभिः स्पृष्टा ध्वान्तराजी पराभवम्।
सद्यो राजविरुद्धानां सूचयन्ती दुरन्तताम्॥३५०॥

निदर्शनम्।

सम्प्रति निदर्शनं लक्षयति अर्थान्तरेति। अर्थान्तरे कार्य्यान्तरे प्रवृत्तेन जनेन तस्य अर्थान्तरस्य सदृशं सत् उत्कृष्टम् असत् अपकृष्टं वा किञ्चित् फलं निदर्श्येत प्रदर्श्येत यत्, तन्निदर्शनमित्यर्थः। यदीत्यस्य यदित्यर्थः। निदर्शनेत्यपि पाठः। दर्पणकारस्तु सम्भवन्वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचन। यत्र विम्बानुविम्बत्वं दर्शयेत् सा निदर्शनेत्याह॥ ३४८ ॥

सत्फलनिदर्शनं दर्शयति उदयन्निति। एषः सविता सूर्य्यः उदयन् उद्गच्छन् उन्नतिं प्राप्नुवंश्च ऋद्धीनां फलं सुहृदनुग्रहं विभावयितुं सत्याम् ऋद्धौ सुहृदामानुकूल्यं कार्य्यमिति ज्ञापयितुं पद्मेषु श्रियम् अर्पयति। अत्र पद्मेषु श्रीदानप्रवृत्तेन उदयशालिना सूर्य्येण सुहृदुपकाररूपमुदयफलं किञ्चित् निदर्श्यते इति फलस्यात्र उत्कृष्टमेव॥ ३४९ ॥

असत्फलनिदर्शनं दर्शयति यातीति। चन्द्रस्य अंशुभिः स्पृष्टा ध्वान्तराजी राजविरुद्धानां सद्यः दुरन्ततां दुःखजनकमवसानं सूचयन्ती प्रकटयन्ती सती पराभवं याति। अत्र

सहोक्तिः सहभावेन कथनं गुणकर्मणाम् ।
अर्थानां यो विनिमयः परिवृत्तिस्तु सा स्मृता॥३५१॥
सह दीर्घा मम श्वासैरिमाः सम्प्रति रात्रयः ।
पाण्डुराश्च ममैवाङ्गैः सह ताश्चन्द्रभूषणाः ॥३५२॥

चन्द्रांशुपरिभूयमाना तमस्ततिः राजविरोधिनां परिणाम-दुःखरूपमपकृष्टं फलं निदर्शयतीति ॥ ३५० ॥

सहोक्तिपरिवृत्त्यलङ्कारौ लक्षयति सहोक्तिरिति । गुण-कर्मणाम् इति कर्मशब्देनात्र क्रियेति बोध्यं, सहभावेन कथनं सहोक्तिः, गुणकर्मणामित्युपलक्षणं द्रव्यादीनामपि सहभावस्य कीर्त्तनादिति बोध्यम् । उक्तञ्च दर्पणकारेण यथा सहार्थस्य बलादेकं यत्र स्याद्वाचकं द्वयोः । सा सहोक्तिरिति । सा च वैचित्र्यावहा चेत् तदैवालङ्कारत्वं तस्याः नान्यथा । तथाहि, लक्ष्मणेन समं रामः काननं गहनं ययावित्यत्र वैचित्र्या-भावात् नायमलङ्कार इति बोध्यम् । तुल्ययोगितायां यौगपद्यं नास्ति, अत्र तु तथेत्यनयोर्भेद इति । अर्थानां वस्तूनां विनि-मयः प्रतिदानं सा परिवृत्तिः स्मृता । सा त्रिधा क्वचित् समेन समस्य, क्वचिदधिकेन न्यूनस्य, क्वचित् न्यूनेन अधिकस्य इति । अत्रापि वैचित्र्यस्य आवश्यकत्वं बोध्यम् । भोजदेवस्तु व्यत्य-यमपि परिवृत्तिमाह । यथा, व्यत्ययो वस्तुनोर्यस्तु यो वा विनिमयो मिथ इति । व्यत्ययस्तु एकस्थानात् कस्यचिद् वस्तुनः अन्यत्र स्थापनम् । यथा, कुसुदवनमपश्रि श्रीमद-म्भोजखण्डमित्यादि ॥ ३५१ ॥

गुणसहोक्तिं दर्शयति सहेति । सम्प्रति विरहे इत्यर्थः इमा रात्रयः मम श्वासैः सह दीर्घाः, चन्द्रभूषणाः ताश्च रात्रयः

वर्द्धते सह पान्थानां मूर्च्छया चूतमञ्जरी ।
पतन्ति च समं तेषामसुभिर्मलयानिलाः ॥ ३५३ ॥
कोकिलालापसुभगाः सुगन्धिवनवायवः ।
यान्ति सार्द्धं जनानन्दैर्वृद्धिं सुरभिवासराः ॥३५४॥

ममैव अङ्गैः सह पाण्डुराः । विरहिण्या उक्तिरियम् । अत्र दीर्घत्वं पाण्डुरत्वं गुणपदार्थौ एककालीनतया उक्तौ । न च आविर्भवति नारीणां वयः पर्य्यस्तशैशवम् । सहैव विविधैः पुंसामङ्गजोन्मादविभ्रमैरिति पूर्वोक्तकार्य्यसहजचित्रहेतूदाहरणेऽपि क्रिययोः सहभावोऽस्ति तदनयोरभेद एवेति वाच्यं सहभावसाधारण्येऽपि कार्य्यकारणभावस्यैव चित्रनियामकत्वात् अत्र तु दीर्घश्वासदीर्घरात्रयोर्न कार्य्यकारणभाव इति बोध्यम् ॥ ३५२ ॥

क्रियासहोक्तिं दर्शयति वर्द्धते इति । पान्थानां विरहिणामित्यर्थः मूर्च्छया सह चूतमञ्जरी वर्द्धते मलयानिलाश्च तेषाम् असुभिः प्राणैः समं पतन्ति च । असुभिरित्यत्र अश्रुभिरिति च पाठः । अत्र वर्द्धनं पतनञ्च क्रिये सहभावेनोक्ते वैचित्र्यविशेषमावहत इति अत्रापि यदिच चूतमञ्जरीविकाशमलयपवनपतनाभ्यामेव पान्थानां मूर्च्छा प्राणनाशश्च ध्वन्यते तथाप्यसौ न विवक्षित इति चित्रहेतुत्वशङ्काया अनवकाशः ॥ ३५३ ॥

कोकिलेति । कोकिलानाम् आलापेन रवेण सुभगाः सुरम्याः, सुगन्धिनः वनवायवः येषु तादृशाः सुरभिवासराः वसन्तदिवसाः जनानामानन्दैः सार्द्धं वृद्धिं यान्ति । सहशब्दप्रयोग एवायमलङ्कार इति भ्रमनिरासार्थमिदमुदाहरणम् ।

इत्युदाहृतयो दत्ताः सहोक्तेरत्र काश्चन ।

सहोक्तिः ।

क्रियते परिवृत्तेश्च किञ्चिद्रूपनिदर्शनम् ॥ ३५५ ॥

शस्त्रप्रहारं ददता भुजेन तव भूभुजाम् ।

चिरार्जितं हृतं तेषां यशः कुमुदपाण्डुरम् ॥३५६॥

परिवृत्तिः ।

आशीर्नामाभिलषिते वस्तुन्याशंसनं यथा ।

पातु वः परमं ज्योतिरवाङ्मनसगोचरम् ॥ ३५७॥

आशीः ।

अत्र यानम् आनन्दनञ्च क्रिये सहभावेन उक्ते वैचित्र्यातिशय-मुत्पादयत इति ॥ ३५४ ॥

इतीति । इति उक्तरूपाः सहोक्तेः काश्चन उदाहृतयः उदाहरणानि अत्र दत्ताः दर्शिता अनयैव रीत्या अन्यविधापि सहोक्तिरनुसन्धेया इत्यर्थः । परिवृत्तेश्च किञ्चित् अल्पमात्रं रूपनिदर्शनं स्वरूपप्रकाशनं क्रियते इत्यन्वयः ॥ ३५५ ॥

शस्त्रप्रहारमिति । शस्त्रप्रहारं ददता तव भुजेन तेषां भूभुजां चिरार्जितं कुमुदपाण्डुरं यशः हृतमित्यन्वयः । अत्र न्यूनेन अधिकस्य ग्रहणरूपो विनिमयः कृत इति । समेन समस्य अधिकेन न्यूनस्य यथायथमुदाहरणानि मृग्याणीति ॥ ३५६ ॥

आशीरलङ्कारं निर्दिशति आशीरिति । अभिलषिते वस्तुनि आशंसनं प्राप्तीच्छाप्रकटनम् अथवा शुभप्रार्थनम्

अनन्वयससन्देहावुपमास्वेव दर्शितौ ।
उपमारूपकञ्चापि रूपकेष्वेव दर्शितम् ॥ ३५८ ॥

आशीर्नाम अलङ्कारः । अयमलङ्कारो वैचित्र्यविशेषावहत्वाभावान्न बहुभिरादृतः, अपरे तु तादृगाशंसनेन वैचित्र्यमस्तीत्याहुः । उक्तञ्च, आशीरिति च केषाञ्चिदलङ्कारतया मता । सौहृद्यस्याविरोधोक्तौ प्रयोगोऽस्याश्च तादृश इति । केचित्तु नाट्य एवास्याश्चमत्कारित्वात् नाट्यालङ्कारतया गण्यते । यथा, आशीरास्कन्दकपटा क्षमा गर्वोद्यमाश्रया इति । उदाहृतञ्च । यथा, ययातेरिव शर्मिष्ठा पत्युर्बहुमता भव । पुत्रं त्वमपि सम्राजं सेव पूरुमवाप्नुहि इति । अन्ये तु प्रेयोऽलङ्कारस्य भेद एवायमित्याहुः । यथेति उदाहरणार्थम् । अवाङ्मनसगोचरं परमं ज्योतिः परमात्मा इत्यर्थः यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सहेति श्रवणात्, वः युष्मान् पातु रक्षतु ॥ ३५७ ॥

सम्प्रति उद्देशक्रमप्राप्तानलङ्कारान् निरूप्य प्राप्तावसरतया मतान्तरोक्तानां केषाञ्चित् अलङ्काराणां स्वोक्तेष्वन्तर्भावं दर्शयति अनन्वयेति । अनन्वयः उपमानोपमेयत्वमेकस्यैव त्वनन्वय इत्युक्तलक्षणः, तथा ससन्देहः सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थित इत्युक्तप्रकारः, उपमासु उपमाभेदेषु एव दर्शितौ तथाच, चन्द्रारविन्दयोः कान्तिमतिक्रम्य मुखं तव । आत्मनैवाभवत् तुल्यमित्यसाधारणोपमा इत्युक्तरूपायामसाधारणोपमायामनन्वयस्यान्तर्भावः । किं पद्ममन्तर्भ्रान्तालि किं ते लोलेक्षणं मुखम् । मम दोलायते चित्तमितीयं संशयोपमा इत्युक्तायां संशयोपमायां ससन्देहस्य अन्तर्भावः ।

उत्प्रेक्षाभेद एवासावुत्प्रेक्षावयवोऽपि च ।
नानालङ्कारसंसृष्टिः सङ्कीर्णन्तु निगद्यते ॥ ३५९॥

उपमारूपकञ्चापि यदुक्तं वामनेन यथा, उपमाजन्यं रूपकमुपमारूपकमिति। उदाहृतञ्च तेनैव यथा, जयति चतुर्दशलोकवल्लिकन्द इति। केचिदिदं परम्परितरूपकमाहुः। अपरे तु उपमासहितं रूपकम् उपमारूपकं यदुक्तम्, उपमानेन तद्भावमुपमेयस्य रूपयन्। यद् वदन्त्युपमाभेदमुपमारूपकं यथेति। अस्योदाहरणं यथा दिवाकरकरस्पर्शादुदयाद्रेः पयोधरात्। नीलांशुकमिव प्राच्यां यो गलति सम्प्रति॥ अत्र नीलांशुकमिवेत्युपमया सहितमुदयाद्रेः पयोधरादिति रूपकमाचक्षते। रूपकेषु रूपकभेदेषु एव दर्शितम्। यथा, इष्टं साधर्म्यवैधर्म्यदर्शनाद् गौणमुख्ययोः उपमाव्यतिरेकाख्यं रूपकद्वितयं यथेति। तस्मादेतेषां न पृथगुक्तिरिति भावः ॥३५८॥

उत्प्रेक्षेति। असौ अन्यैरुक्त इत्यर्थः उत्प्रेक्षावयवः तन्नामालङ्कारभेदः अपि उत्प्रेक्षाया भेदः विशेष एव। तल्लक्षणं यथा श्लिष्टेनार्थेन संसृष्टः किञ्चिच्चोपमयान्वितः। रूपकार्थेन वा युक्त उत्प्रेक्षावयवो यथेति। अयञ्च श्लेषादिसम्बन्धोत्प्रेक्षामात्रमतो नात्र प्रयास इति भावः। एवं नव्यैः परिगृहीतानामन्येषाञ्च अलङ्काराणामनयेव रीत्या उक्तालङ्कारभेदेष्वन्तर्भावो वेदितव्य इति।

अथ सङ्कीर्णं निरूपयति नानेति। नानालङ्काराणां बहूनामलङ्काराणां संसृष्टिः एकत्र समावेशः सङ्कीर्णं निगद्यते वैचित्र्यविशेषवत्तया पृथक् निबध्यते यथा, लौकिकानां हारकुण्डलादीनां प्रत्येकस्य यादृशी शोभा यादृशी च समष्टि,

अङ्गाङ्गिभावावस्थानं सर्वेषां समकक्षता ।
इत्यलङ्कारसंसृष्टेर्लक्षणीया द्वयी गतिः ॥ ३६० ॥

आक्षिपन्त्यरविन्दानि मुग्धे ! तव मुखश्रियम् ।
कोषदण्डसमग्राणां किमेषामस्ति दुष्करम् ॥३६१॥

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥ ३६२ ॥

सङ्कीर्णम् ।

तथा काव्यालङ्काराणामपि प्रत्येकस्य यादृशं वैचित्र्यं सङ्कीर्णस्य तदपेक्षया समधिकमिति पृथग्व्यपदेश इति भावः ॥ ३५९ ॥

सङ्कीर्णस्य भेदावाह अङ्गेति। क्वचित् अङ्गाङ्गिभावेन प्रधानगुणभावेन अवस्थानं, क्वचित् सर्वेषां समकक्षता तुल्यबलत्वम्। इति अलङ्कारसंसृष्टेः सङ्कीर्णालङ्कारस्य द्वयी गतिः द्वौ भेदौ लक्षणीया ज्ञातव्या इत्यर्थः। अपरे तु एकानुप्रवेशे सन्दिग्धत्वे अङ्गाङ्गिभावे च सङ्करसंज्ञा समकक्षतायान्तु संसृष्टिसंज्ञेत्याहुः ॥ ३६० ॥

अङ्गाङ्गिभावसङ्कीर्णमुदाहरति आक्षिपन्तीति। हे मुग्धे ! अरविन्दानि तव मुखश्रियम् आक्षिपन्ति तिरस्कुर्वन्ति जिगीषन्तीत्यर्थः। तथाहि, कोषदण्डसमग्राणां कोषो धनसमूहः कुड्मलञ्च दण्डः चतुर्थोपायः नालञ्च ताभ्यां समग्राणां पूर्णानामित्यर्थः एषां दुष्करं किम् ? अत्र श्लेषः अर्थान्तरन्यासस्याङ्गम् अर्थान्तरन्यासश्च पूर्वार्द्धस्थिताया उपमाया इत्यङ्गाङ्गिभावो बोध्यः ॥ ३६१ ॥

समकक्षतायां सङ्कीर्णं निदर्शयति लिम्पतीति। तमः

श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम्।
भिन्नं द्विधा स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम्॥३६३॥
तद् भाविकमिति प्राहुः प्रबन्धविषयं गुणम्।
भावः कवेरभिप्रायः काव्येष्वासिद्धि संस्थितः॥३६४॥
परस्परोपकारित्वं सर्वेषां वस्तुपर्वणाम्।
विशेषणानां व्यर्थानामक्रिया स्थानवर्णना॥३६५॥

अङ्गानि लिम्पतीव, नभः अञ्जनं वर्षतीव, दृष्टिः असत्पुरुषस्य नीचस्य सेवेव विफलतां गता। अत्र पूर्वार्द्धे उत्प्रेक्षायाः उत्तरार्द्धे उपमायाश्च निरपेक्षतया परस्परं प्राधान्येनावस्थानात् समकक्षतेति बोध्यम्॥ ३६२॥

श्लेषस्य बहुषु सद्भावं दर्शयति श्लेष इति। श्लेषः सर्वासु वक्रोक्तिषु वचनभङ्गिरूपासु अलङ्कृतिषु श्रियं शोभां पुष्णाति। अतः वाङ्मयं काव्यं स्वभावोक्तिर्वस्तुस्वभाववर्णनरूपा वक्रोक्तिश्च इति भेदद्वयात् द्विधा भिन्नं द्विविधं स्वभावोक्तिमत् वक्रोक्तिमच्चेति॥ ३६३॥

इदानीं सर्वालङ्कारसंग्राहकं भाविकं निरूपयति तदिति। प्रबन्धा महाकाव्यादयः तद्विषयं तद्गतं गुणं चमत्कारजनकधर्मविशेषं तत् प्रसिद्धं भाविकं तदाख्यमलङ्कारं प्राहुः। तथाहि कवेरभिप्रायः भावः तत्सम्बन्धितया भाविकमित्यर्थसंज्ञा। स च भावः काव्येषु आसिद्धि समाप्तिपर्य्यन्तं स्थितः। एतेनास्य केवलं पदवाक्यगतत्वं न, महावाक्यघटितप्रबन्धगतत्वमपीति बोध्यम्॥ ३६४॥

कवेरभिप्रायस्य प्रबन्धगतत्वे उदाहरति परस्परेत्यादि।

व्यक्तिरुक्तिक्रमबलाद् गम्भीरस्यापि वस्तुनः।
भावायत्तमिदं सर्वमिति तद् भाविकं विदुः॥२६६॥
यच्च सन्ध्यङ्गवृत्त्यङ्गलक्षणाद्यागमान्तरे।
व्यावर्णितमिदञ्चेष्टमलङ्कारतयैव नः॥ २६७॥

भाविकम्।

सर्वेषां वस्तूनाम् आधिकारिकेतिवृत्तानां पर्वणां तदुपयोगिनां प्रासङ्गिकेति वृत्तानाञ्च। उक्तञ्च, नखकुट्टेन, इदं पुनर्वस्तु बुधैर्द्विविधं परिकल्प्यते। आधिकारिकमेकं स्यात् प्रासङ्गिकमथापरमिति। परस्परोपकारित्वम् अस्तीति शेषः। यथा, रामायणे रामचरितम् आधिकारिकं सुग्रीवादिचरितं प्रासङ्गिकं तयोश्च अङ्गाङ्गिभावेन परस्परोपकारित्वम्। एवमन्यत्रापि साक्षात् परम्परया वा वेदितव्यम्। तथा व्यर्थानां प्रकृतानुपयोगिनां विशेषणानाम् अक्रिया अननुष्ठानम् अप्रयोग इत्यर्थः साभिप्रायविशेषणोपन्यास इत्यर्थः अयञ्च परिकर इति प्रकाशकारः यथा विशेषणैर्यत् साकूतैरुक्तिः परिकरो मत इति। तथा स्थानानां प्रकृतोपयोगिविषयाणां वर्णना। किञ्च, उक्तिक्रमबलात् वचनपरिपाट्या गम्भीरस्यापि वस्तुनः व्यक्तिः प्रस्फुटत्वं या हि नव्यैरलङ्कारभेदरूपेण निर्दिष्टेति भावः। तत् इदं सर्वं भावायत्तम् अभिप्रायाधीनमिति भाविकं विदुः। भाविकालङ्कार एव तेषामन्तर्भाव इति भावः॥ २६५॥२६६॥

यच्चेति। किञ्चेति चार्थः। सन्धयः मुखादयः पञ्च, तदङ्गानि उपक्षेपादीनि चतुःषष्टिप्रकाराणि, वृत्तयः कौशिकीत्यादयश्चतस्रः, तदङ्गानि नर्मादीनि षोड़श, लक्षणानि भूषणादीनि षट्त्रिंशत् प्रकाराणि आदिपदेन नाट्यालङ्कारादीनां

पन्थाः स एष विवृतः परिमाणवृत्त्या
संहृत्य विस्तरमनन्तमलङ्क्रियाणाम् ।
वाचामतीत्य विषयं परिवर्त्तमानान्
अभ्यास एव विवरीतुमलं विशेषान् ॥ ३६८ ॥

इति आचार्य्यदण्डिनः कृतौ काव्यादर्शे
अर्थालङ्कारविभागो नाम
द्वितीयः परिच्छेदः ।

ग्रहणं ते च आशीरादयस्त्रयस्त्रिंशत्, वीथ्यङ्गानि उद्घात्यकादीनि त्रयोदश, लास्याङ्गानि गेयादीनि दश । एतत् सर्वं यत् आगमान्तरे ग्रन्थान्तरे व्यावर्णितं विशेषेण व्याख्यातं तदिदं नः अस्माकम् अलङ्कारतयैव इष्टम् अभिलषितम् अलङ्कारनाम्नैव कथितमित्यर्थः तेषाञ्च यथायथमुक्तेष्वन्तर्भाव इति भावः ॥ ३६७ ॥

उपसंहरति पन्था इति । अलङ्क्रियाणां स्वभावोक्त्याद्यलङ्काराणाम् अनन्तम् अशेषं विस्तरं प्रपञ्चं संहृत्य संगृह्य परिमाणवृत्त्या परिमितत्वेन एषः सः प्रसिद्धः पन्थाः मार्गः विवृतः । अनेनैव पथा अनुसरणे अपरेऽपि ज्ञातव्या इत्याह वाचामिति । वाचां विषयम् अतीत्य परिवर्त्तमानान् वक्तुमशक्यानित्यर्थः तान् विशेषान् भेदान् विवरीतुं प्रकाशयितुम् अभ्यास एव अलं शक्तः । पुनः पुनरभ्यासेनैव अपरेऽपि वेदितव्या इति भावः ॥ ३६८ ॥

इति श्रीजीवानन्दविद्यासागरभट्टाचार्य्यविरचितायां
काव्यादर्शटीकायां द्वितीयः परिच्छेदः ।

तृतीयः परिच्छेदः ।

अव्यपेतव्यपेतात्मा व्यावृत्तिर्वर्णसंहतेः ।
यमकं तच्च पादानामादिमध्यान्तगोचरम् ॥ १ ॥
एकद्वित्रिचतुष्पादयमकानां विकल्पनाः ।
आदिमध्यान्तमध्यान्तमध्याद्याद्यन्तसर्वतः ॥ २ ॥

सम्प्रति अर्थालङ्कारेषु निरूपितेषु प्रथमपरिच्छेदे सामान्यतो निरूपितेष्वपि शब्दालङ्कारेषु प्राप्तावसरतया तद्विशेषान् निरूपयिष्यन् प्रथमं यमकमनुवदति अव्यपेतेति। अव्यपेतः अव्यवहितः व्यपेतः व्यवहितश्च आत्मा स्वरूपं यस्यास्तथाभूताया वर्णसंहतेः स्वरव्यञ्जनसङ्घातस्य व्यावृत्तिः विशेषेण पुनरावृत्तिः यमकमित्यर्थः। अस्य विशेषेषु पूर्वोक्तेष्वपि अव्यहितत्वव्यवहितत्वभेदेन पुनर्द्वैविध्यं पूर्वोच्चारितवर्णसङ्घस्य क्वचिदव्यवधानेन, क्वचिद् व्यवधानेन पुनरावृत्तिरिति। तच्च पादानाम् आदिगतं मध्यगतम् अन्तगतञ्च। एतदुपलक्षणं पादगतमपि बोध्यम् उक्तञ्च वामनेन, पादः पादस्यादिमध्यान्तभागाः स्थानानीति। अत्रापि पाद इत्युपलक्षणं तेन पादः पादखण्डाः पद्यार्द्धं समस्तपद्यञ्च यमकस्य स्थानानीति बोध्यम् ॥ १ ॥

क्रमेण तत्तद्भेदान् निर्दिशति एकेत्यादि। एकद्वित्रिचतुष्पादयमकानां विकल्पनाः प्रभेदाः पद्यस्य प्रतिपादं चत्वारश्चत्वारः भेदा इत्यर्थः ते च अमिश्रयमके एव वेदितव्याः।

अत्यन्तबहवस्तेषां भेदाः सम्भेदयोनयः ।
सुकरा दुष्कराश्चैव दर्श्यन्ते तेऽत्र केचन ॥ ३ ॥
मानेन मानेन सखि ! प्रणयोऽभूत् प्रिये जने ।
खण्डिता कण्ठमाश्लिष्य तमेव कुरु सत्रपम् ॥ ४ ॥
मेघनादेन हंसानां मदनो मदनोदिना ।

तथाहि, अमिश्रितमादिभागयमकं प्रथमादिपादगतत्वात् चतुर्विधम् । तथा मध्यादिभागयमकमपि । अयञ्च भेदः अव्यपेतव्यपेतसाधारणः । सम्भेदः संमिश्रणं योनिर्येषां तादृशाः विमिश्रा इत्यर्थः तेषां यमकानां भेदाः आदिमध्यान्तमध्यान्तमध्याद्याद्यन्तसर्वतः स्थितत्वेन अत्यन्तबहवः अतिविस्तराः ज्ञेया इत्यर्थः, पदच्छेदस्तु आदिमध्यान्तेषु मध्यान्तेषु मध्याद्येषु आद्यन्तेषु सर्वेषु चेति । ते च सुकराः सुसाध्याः सुबोधाश्च, दुष्कराः दुःसाध्याः दुर्बोधाश्च कविबोद्धृणामिति शेषः । अत्र केचन दर्श्यन्ते उदाह्रियन्ते इत्यर्थः ॥ २ ॥ ३ ॥

तत्र प्रथमपादस्थमव्यवहितमसिश्रमादिभागयमकं निर्दिशति । हे सखि ! प्रिये जने अनेन ईदृशेन मानेन प्रणयः मा भूत् । प्रियजनं प्रति एतादृशं मानं मा कुरु इत्यर्थः । खण्डिता, पार्श्वमेति प्रियो यस्या अन्यसम्भोगचिह्नितः । सा खण्डितेति कथिता धीरैरीर्ष्याकषायितेत्युक्तलक्षणापि त्वं कण्ठमाश्लिष्य आलिङ्ग्य तं प्रियमेव सत्रपं सलज्जं कुरु, अपकारिणि प्रणयदर्शनमेव तस्य लज्जाकरत्वात् गुरुशासनमिति भावः । अतिमानिनीं खण्डितां प्रति तत्सख्या उक्तिरियम् । अत्र मानेन मानेन इति अव्यवहितमादिपादमादिभागयमकम् ॥ ४ ॥

द्वितीयपादगतं निर्दिशति मेघनादेनेति । मदनः कामः

नुन्नमानं मनः स्त्रीणां सह रत्या विगाहते ॥ ५ ॥
राजन्वत्यः प्रजा जाता भवन्तं प्राप्य सत्पतिम् ।
चतुरं चतुरम्भोधिरसनोर्वीकरग्रहे ॥ ६ ॥
अरण्यं कैश्चिदाक्रान्तं कैश्चित् सद्म दिवौकसाम् ।
पदातिरथनागाश्वरहितैरहितैस्तव ॥ ७ ॥

रत्या कामपत्न्या अनुरागेण च सह पुंसानां मदनोदिना मदमपनयता मेघनादेन मेघगर्जितेन नुन्नः अपनीतः मानो यस्मात् तथोक्तं स्त्रीणां मनः विगाहते आलोड़यति व्याकुलयतीत्यर्थः, मेघगर्जनस्य उद्दीपकत्वात् वर्षासु प्रमदानां मनः सानुरागं सकामञ्च भवतीति भावः । अत्र मदनो मदनो इति द्वितीयपादगतमव्यवहितमादिभागयमकम् ॥ ५ ॥

तृतीयपादगतमुदाहरति राजन्वत्य इति । चतुरम्भोधिरसनायाः चतुःसागरपरिच्छिन्नायाः उर्व्याः पृथिव्याः करग्रहे स्वप्राप्यांशग्रहणे पाणिग्रहे च चतुरम् आसमुद्रकरग्राहिणमित्यर्थः भवन्तं सत्पतिं प्राप्य प्रजाः राजन्वत्यः जाताः, सुराज्ञि देशे राजन्वान् स्यात् ततोऽन्यत्र राजवानित्यमरः । अत्र चतुरं चतुरमिति तृतीयपादगतमव्यवहितमादिभागयमकम् ॥ ६ ॥

चतुर्थपादगतं निर्दिशति अरण्यमिति । तव कैश्चित् अहितैः शत्रुभिः पदातिरथनागाश्वरहितैः चतुरङ्गबलविहीनैरित्यर्थः सद्भिः अरण्यम् आक्रान्तं पलायितत्वादिति भावः, कैश्चित् तथाभूतैः दिवौकसां सद्म सुरलोकः आक्रान्तं युद्धमरणादिति भावः, जितो वा प्राप्स्यसे स्वर्गं जित्वा वा भोक्ष्यसे महीमिति महाभारतीयगीताध्याये भगवदुक्तेः । अत्र रहितैरहितैरिति चतुर्थपादगतमव्यवहितमादिभागयमकम् ॥ ७ ॥

मधुरं मधुरम्भोजवदने ! वद नेत्रयोः ।
विभ्रमं भ्रमरभ्रान्त्या विडम्बयति किं नु ते ॥८॥
वारणो वा रणोद्दामो हयो वा स्मर ! दुर्द्धरः ।
न यतो नयतोऽन्तं नस्तदहो विक्रमस्तव ॥ ९ ॥
राजितैराजितैक्ष्ण्येन जीयते त्वादृशैर्नृपैः ।

अथ सम्भेदयोनीन् यमकभेदान् दर्शयन् तद्भेदान् क्रमेण दर्शयति मधुरमिति। हे अम्भोजवदने ! पद्ममुखि ! मधुर्वसन्तः भ्रमरभ्रान्त्या भ्रमराविमौ इति भ्रमेण ते तव नेत्रयोः मधुरं विभ्रमं विडम्बयति अनुकरोति किम् ? वद कथय। वसन्तोदये समुत्पन्ने अम्भोजे भ्रमरविलाससम्भवात् नु इति वितर्कबोधकं पदमत्र युज्यत एव। वसन्तस्तव मुखपद्मं नेत्रभ्रमरविलसितं दृष्ट्वा निजमुखभूतमम्भोजं भ्रमरविलासेन शोभयतीति तर्कयामीति भावः। केचित् तु अम्भोजवदने इति सप्तम्यन्तं पदमुक्त्वा तत्र वर्त्तमानयोर्नेत्रयोरिति योजयन्ति। नु इत्यत्र नेति च पाठः तदा न विडम्बयति किम् अपितु विडम्बयत्येवेत्यर्थः। अत्र मधुरं मधुरमिति वदने वदने इति च प्रथमद्वितीयपादगतमव्यवहितमादिभागयमकम् ॥८॥

वारण इति। हे स्मर ! यतः यस्मात् तव रणोद्दामो युद्धदुर्मदः वारणः हस्ती वा दुर्द्धरः दुर्धर्षः हयः अश्वो वा न अस्तीति शेषः, तत् तस्मात् युद्धोपकरणाभावादपीत्यर्थः नः अस्मान् विरहिणः इत्यर्थः अन्तं नाशं नयतः प्रापयतः तव विक्रमः अहो आश्चर्य्यभूत इत्यर्थः। अत्र प्रथमतृतीयपादगतमिश्रमव्यवहितमादिभागयमकम् ॥ ९ ॥

राजितैरिति। त्वादृशैः राजितैः शोभितैः नृपैः आजि-

नीयते च पुनस्तृप्तिं वसुधा वसुधारया ॥ १० ॥
करोति सहकारस्य कलिकोत्कलिकोत्तरम् ।
मन्मनो मन्मनोऽप्येष मत्तकोकिलनिस्वनः ॥ ११ ॥
कथं त्वदुपलम्भाशाविहताविह तादृशी ।
अवस्था नालमारोढुमङ्गनामङ्गनाशिनी ॥ १२ ॥

तेनोऽन युद्धदुर्मदत्वेन वसुधा पृथिवी जायते, वसुधारया वसूनां धनानां धारया धारावर्षणेन पुनस्तृप्तिं नीयते च। अत्र प्रथमचतुर्थपादगतमिश्रमव्यवहितमादिभागयमकम् ॥ १० ॥

करोतीति। सहकारस्य आम्रस्य कलिका तथा एष मन्मनः, सुरते कर्णमूले तु निजदेशीयभाषया। दम्पत्योः कथनं यत् तु मन्मनं तं प्रचक्षते इत्युक्तरहस्यालापरूपः मत्तानां कोकिलानां निस्वनश्च मन्मनः मम मानसम् उत्कलिकोत्तरम् उत्कण्ठाकुलमित्यर्थः करोति। विरहिण उक्तिरियम्। आम्रकलिकायाः कोकिलालापस्य च अतीवोद्दीपकत्वातिति भावः। अत्र द्वितीयतृतीयपादगतं मिश्रमध्यरहितमादिभागयमकम्। अत्र उत्कलिकोत्कलिकेति तकारस्य मध्यपातित्वेऽपि स्वरशून्यत्वात् व्यवधानमध्ये अगणनं सस्वरस्यैव व्यञ्जनस्य व्यवधायकत्वाभ्युपगमात् इति बोध्यम् ॥ ११ ॥

कथमिति। इह अस्मिन् प्रदेशे तव उपलम्भः प्राप्तिः तस्य आशा प्रत्याशा तस्याः विहतौ अभावे इत्यर्थः अङ्गनाशिनी शरीरनिकृन्तनी तादृशी अवस्था अङ्गनाम् अबलां माम् आरोढुम् आक्रमितुं न अलं न समर्था ? अपितु समर्था एव, त्वद्विरहे अहं मृतप्राया जातास्मीति तात्पर्य्यार्थः। अत्र द्वितीयचतुर्थपादगतं मिश्रमव्यवहितमादिभागयमकम् ॥ १२ ॥

निगृह्य नेत्रे कर्षन्ति बालपल्लवशोभिना ।
तरुणा तरुणान् कृष्टानलिनो नलिनोन्मुखाः॥१३॥
विशदा विशदामत्तसारसे सारसे जले ।
कुरुते कुरुतेनेयं हंसी मामन्तकामिषम् ॥ १४ ॥
विषमं विषमन्वेति मदनं मदनन्दनः ।
सहेन्दुकलयापोढमलया मलयानिलः ॥ १५ ॥

निगृह्येति । नलिनेषु पद्मेषु उन्मुखाः पतनाभिमुखाः अलिनः भ्रमराः बालपल्लवैः नवपल्लवैः शोभते इति तथोक्तेन तरुणा वृक्षेण कृष्टान् आकृष्टान् तद्दर्शनोत्सुकान् इत्यर्थः तरुणान् यूनः नेत्रे निगृह्य कर्षन्ति निजदर्शनोत्सुकनयनान् कुर्वन्तीत्यर्थः । अत्र तृतीयचतुर्थपादगतं मिश्रमव्यवहितादिभागयमकम् ॥ १३ ॥

विशदेति । विशन्तः आमत्ताः सारसाः जलपक्षिविशेषा यस्मिन् तादृशे सारसे जले सरोवरजले इयं विशदा शुभ्रवर्णा हंसी राजहंसीत्यर्थः कुरुतेन कुत्सितरवेण रवस्य कुत्सितत्वमुद्दीपकत्वेन विरहिणामसह्यत्वात् इति भावः, मां विरहिणमिति यावत् अन्तकस्य यमस्य अमिषं भोग्यवस्तु कुरुते । अत्र प्रथमद्वितीयतृतीयपादगतं मिश्रमव्यवहितमादिभागयमकम् ॥ १४ ॥

विषममिति । मलयानिलः अपोढमलया परित्यक्तमालिन्यया हिमात्ययादिति भावः, इन्दुकलया सह मदनन्दनः मां न नन्दयतीति तथोक्तः मदप्रीतिजनन इत्यर्थः सन् विषमम् असह्यं विषं विषरूपं मदनं कामम् अन्वेति अनुगच्छति उद्दी

मानिनी मा निनीषुस्ते निषङ्गत्वमनङ्ग ! मे ।
हारिणी हारिणी शर्म तनुतां तनुतां यतः ॥ १६ ॥
जयता त्वन्मुखेनास्मानकथं न कथं जितम् ।
कमलं कमलं कुर्वद्दलिमद्दलि मत्प्रिये ! ॥ १७ ॥
रमणी रमणीया मे पाटलापाटलांशुका ।

पयतीत्यर्थः । अत्र प्रथमद्वितीयचतुर्थपादगतं मिश्रमव्यवहितमादिभागयमकम् ॥ १५ ॥

मानिनीति । हे अनङ्ग ! मा मां ते तव निषङ्गत्वं तूणत्वम् अनवरतशरसम्पातेन तदाधारत्वं निनीषुः प्रापयितुमिच्छुः सती हारिणी हारालङ्कारशोभिनी हारिणी मनोहारिणी इयं मानिनी मानवती नारी तनुतां क्षीणताम् अस्याः प्रत्याख्यानादिति भावः, यतः गच्छतः प्राप्नुवतः मे मम शर्म तनुतां यथेयं मानिनी मानं विहाय मामाश्रयति तथानुग्रहः कार्य्य इति भावः । अत्र प्रथमतृतीयचतुर्थपादगतं मिश्रमव्यवहितमादिभागयमकम् ॥ १६ ॥

जयतेति । हे मत्प्रिये ! मम प्रेयसि ! अस्मान् जयता वशीकुर्वता तव मुखेन कं जनम् अलंकुर्वत् शोभयत् तथा अलिमन्ति भ्रमरयुक्तानि दलानि अस्य सन्तीति तथाभूतं कमलम् अकथं कथारहितं यथा तथा कथं न जितम् ? अपितु जितमेवेत्यर्थः, अस्माकं चेतनानामपि जयिना ते मुखेन अचेतनानि तादृशानि कथनानि जितानीति का कथेति भावः । अत्र द्वितीयतृतीयचतुर्थपादगतं मिश्रमव्यवहितमादिभागयमकम् ॥ १७ ॥

रमणीति । पाटलावत् तदाख्यतरुकुसुमवत् पाटलम्

वारुणीवारुणीभूतसौरभा सौरभास्पदम् ॥ १८ ॥

इति पादादियमकमव्यपेतं विकल्पितम् ।
व्यपेतस्यापि वर्ण्यन्ते विकल्पास्तस्य केचन ॥ १९ ॥

मधुरेणदृशां मानं मधुरेण सुगन्धिना ।
सहकारोद्गमेनैव शब्दशेषं करिष्यति ॥ २० ॥

करोऽतिताम्रो रामाणां तन्त्रीताड़नविभ्रमम् ।
करोति सेर्ष्यं कान्ते च श्रवणोत्पलताड़नम् ॥२१॥

आरक्तश्वेतम् अंशुकं यस्याः तादृशी सौरभास्पदं शोभनगन्धि सा रमणी अरुणीभूता सौरी सूर्य्यसम्बन्धिनी भा दीप्तिर्यस्याः तथाभूता वारुणीव सुरेव मे मम रमणीया रतिप्रिया भवत्विति शेषः। प्रथमद्वितीयचतुर्थपादगतं मिश्रमव्यवहितमादिभागयमकम् ॥ १८ ॥

इतीति। इति उक्तरूपेण पादादिगतम् अव्यपेतम् अव्यवहितं यमकं विकल्पितं सप्रभेदम् उदाहृतम्, इदानीं तस्य पूर्वोक्तस्य व्यपेतस्य व्यवहितस्य केचन विकल्पा भेदाः वर्ण्यन्ते ॥ १९ ॥

मधुरिति। मधुर्वसन्तः मधुरेण मनोहरेण सुगन्धिना सहकारोद्गमेनैव आम्रमुकुलोदयेनैव एणदृशां हरिणाक्षीणां मानम् ईर्षाकोपं शब्दशेषं मानेति शब्दमात्रावशिष्टं करिष्यति न त्वर्थतः रक्षिष्यतीति भावः। अत्र प्रथमद्वितीयपादगतं व्यवहितं मिश्रमादिभागयमकम् ॥ २० ॥

कर इति। रामाणां रमणीनाम् अतिताम्रः अतिरक्तः करः तन्त्रीताड़नविभ्रमं वीणावादनविलासं तथा कान्ते सेर्ष्यं

सकलापोल्लसनया कलापिन्यानु नृत्यते।
मेघाली नर्त्तिता वातैः सकलापो विमुञ्चति॥२२॥
स्वयमेव गलन्मानकलि कामिनि! ते मनः।
कलिकामिह नीपस्य दृष्ट्वा कां न स्पृशेद्दशाम्॥२३॥
आरुह्याक्रीड़शैलस्य चन्द्रकान्तस्थलीमिमाम्।
नृत्यत्येष चलच्चारुचन्द्रकान्तः शिखावलः॥२४॥

सप्रणयकोपं यथा तथा श्रवणोत्पलताड़नं कर्णोत्पलाभ्यां प्रहारं करोति। अत्र प्रथमतृतीयपादगतं व्यवहितं मिश्रमादिभागयमकम्॥२१॥

सकलेति। वातैः नर्त्तिता सकला मेघाली घनश्रेणी अपः जलानि विमुञ्चति वर्षति, अनु पश्चात् अनन्तरमेव कलापस्य पिच्छस्य उल्लसनेन वर्त्तमानया कलापिन्या मयूर्य्या नृत्यते। वर्षावर्णनमिदम्। अत्र प्रथमचतुर्थपादगतं मिश्रं व्यवहितमादिभागयमकम्॥२२॥

स्वयमिति। हे कामिनि! स्वयमेव कान्तानुनयं विनैव गलन् मानरूपः कलिः कलहः यस्मात् तादृशं तव मनः इह वर्षासु इत्यर्थः नीपस्य कलिकां कोरकं दृष्ट्वा कां दशाम् अवस्थां न स्पृशेत्? अपितु सर्वामेवेत्यर्थः। वर्षासु अतिकोमलं मनः विरहे कथं सान्त्वयिष्यसीति भावः। अत्र द्वितीयतृतीयपादगतं मिश्रं व्यवहितमादिभागयमकम्॥२३॥

अरुह्येति। आक्रीड़शैलस्य क्रीड़ापर्वतस्य इमां चन्द्रकान्तमणिविशेषनिर्मितां स्थलीं स्थानम् आरुह्य एष शिखावलः मयूरः चलत् चारु मनोज्ञं यत् चन्द्रकं मेचकं तेन अन्तः

उद्धृत्य राजकादुर्वी ध्रियतेऽद्य भुजेन ते ।
वराहेणोद्धृता यासौ वराहेरुपरिस्थिता ॥ २५ ॥
करेण ते रणेष्वन्तकरेण द्विषतां हताः ।
करेणवः क्षरद्रक्ता भान्ति सन्ध्याघना इव ॥ २६ ॥
परागतरुराजीव वातैर्ध्वस्ता भटैश्चमूः ।
परागतमिव क्वापि परागततमम्बरम् ॥ २७ ॥

रमणीयः मनोहरः सन् नृत्यति। अत्र द्वितीयचतुर्थपादगतं मिश्रं व्यवहितमादिभागयमकम् ॥ २४ ॥

उद्धृत्येति। हे राजन्! या असौ उर्वी वराहेण शूकरमूर्त्तिना भगवता उद्धृता सती वराहेः श्रेष्ठनागस्य वासुकेः उपरि स्थिता, अद्य ते तव भुजेन सा उर्वी राजकात् राजसमूहात् उद्धृत्य ध्रियते। अत्र तृतीयचतुर्थपादगतं मिश्रं व्यवहितमादिभागयमकम् ॥ २५ ॥

करेणेति। हे राजन्! रणेषु द्विषताम् अन्तकरेण विनाशकेन ते तव करेण हस्तेन हताः, अतएव क्षरद्रक्ताः रक्तस्राविणः करेणवः गजेन्द्राः करेणुरिभ्यां स्त्री नेभे इत्यमरः। सन्ध्याघना इव सन्ध्याकालीनमेघा इव भान्ति। अत्र प्रथमद्वितीयतृतीयपादगतं मिश्रं व्यवहितमादिभागयमकम् ॥ २६ ॥

परागेति। हे राजन्! वातैः ध्वस्ताः पातिताः अगस्य पर्वतस्य तरुराजीव वृक्षश्रेणीव परा शत्रुपक्षीया चमूः सेना भटैः तव सैनिकैः ध्वस्ता नाशिता, अतश्च परागैः पलायनपराणां शत्रुसैनिकानां पदरेणुभिः ततं व्याप्तम् अम्बरमाकाशं क्वापि परागतमिव पलायितमिव धूलिभिरम्बरतलस्यादृश्य-

पातु वो भगवान् विष्णुः सदा नवघनद्युतिः ।
स दानवकुलध्वंसी सदानवरदन्तिहा ॥ २८ ॥
कमलैः समकेशन्ते कमलेर्ष्याकरं मुखम् ।
कमलेख्यं करोषि त्वं कमलेवोन्मदिष्णुषु ॥ २९ ॥
मुदा रमणमन्वीतमुदारमणिभूषणाः ।
मदभ्रमद्दृशः कर्त्तुमदभ्रजघनाः क्षमाः ॥ ३० ॥

त्वादिति भावः । अत्र प्रथमतृतीयचतुर्थपादगतं मिश्रं व्यवहितमादियमकम् ॥ २७ ॥

पात्विति । सदानः समदः यः वरदन्ती श्रेष्ठहस्ती कुवलयापीड़ाख्यः तं हतवान् इति तथोक्तः सः प्रसिद्धः दानवकुलध्वंसी नवघनद्युतिः भगवान् विष्णुः वः युष्मान् सदा पातु । अत्र द्वितीयतृतीयचतुर्थपादगतं मिश्रं व्यवहितमादिभागयमकम् ॥ २८ ॥

कमिति । हे प्रिये ! ते तव कं शिरः अलेः भ्रमरस्य समाः केशा यत्र तादृशं, तथा मुखं कमलेर्ष्याकरं कमलस्य द्वेषकरम् अतस्त्वं कमलेव लक्ष्मीरिव कं जलम् उन्मदिष्णुषु उन्मत्तेषु मध्ये अलेख्यम् अगण्यं करोषि ? अपितु सर्वानेव उन्मादयसीत्यर्थः । अत्र सर्वपादगतं मिश्रं व्यवहितमादिभागयमकम् ॥ २९ ॥

मुदेति । उदारा मणयः रत्नानि भूषणं यासां ताः, मदेन भ्रमन्त्यः घूर्णन्त्यः दृशो यासां तथोक्ताः, तथा अदभ्रं विशालं जघनं यासां तथाभूताः प्रमदाः मुदा रमणं प्रियम् अन्वीतम् अनुगतम् अधीनमित्यर्थः कर्त्तुं क्षमाः शक्ताः । अत्र प्रथम-

उदितैरन्यपुष्टानामारुतैर्मे हतं मनः ।
उदितैरपि ते दूति ! मारुतैरपि दक्षिणैः ॥ ३१ ॥
सुराजितह्रियो यूनां तनुमध्यासते स्त्रियः ।
तनुमध्याः क्षरत्स्वेदसुराजितमुखेन्दवः ॥ ३२ ॥
इति व्यपेत यमकप्रभेदोऽप्येष दर्शितः ।
अव्यपेतव्यपेतात्मा विकल्पोऽप्यस्ति तद्यथा ॥ ३३ ॥

द्वितीययोस्तृतीयचतुर्थयोश्च मिश्रं व्यवहितमादिभागयमकम् ॥ ३० ॥

उदितैरिति। हे दूति ! अन्यपुष्टानां कोकिलानाम् आरुतैः समन्तात् झङ्कारैः, ते तव उदितैः कथितैः प्रियाश्लेष-सूचकैर्वचनैरित्यर्थः, तथा दक्षिणैः मारुतैरपि मे मम मनः हतं व्यथितम्। अत्र प्रथमतृतीययोर्द्वितीयचतुर्थयोश्च मिश्रं व्यवहितमादिभागयमकम् ॥ ३१ ॥

सुरेति। तनु क्षीणं मध्यं यासां ताः, क्षरद्भिः गलद्भिः स्वेदैः सुराजिताः सुशोभिता मुखेन्दवः मुखचन्द्रा यासां तादृश्यः, तथा सुरया मद्यपानेन जिता ह्रीर्लज्जा यासां तथा-भूताः, स्त्रियः कामिन्यः यूनां तरुणानां तनुं शरीरम् अध्या-सते। अत्र प्रथमचतुर्थयोर्द्वितीयतृतीययोश्च मिश्रं व्यवहित-मादिभागयमकम् ॥ ३२ ॥

इतीति। इति उक्तप्रकारेण एषः व्यपेतानां व्यवहितानां यमकानां प्रभेदः दर्शितः उदाहृतः। अव्यपेतः अव्यवहितः व्यपेतः व्यवहितश्च आत्मा यस्य तादृशः उभयमिश्र इत्यर्थः विकल्पः प्रभेदः अपि अस्ति, तत् यथेति उदाहरणार्थम् ॥ ३३ ॥

सालं सालंवकलिकासालं सालं न वीक्षितुम् ।
नालीनालीनवकुलानाली नालीकिनीरपि ॥३४॥
कालं कालमनालक्ष्यतारतारकमीक्षितुम् ।
तारतारम्यरसितं कालं कालमहाघनम् ॥ ३५ ॥
याम यामलयाधीनायामया मरणं निशा ।

सेति । सा मम आली सखी सालम्बा लम्बमाना या कलिका कोरकः तया सलति शोभते इति तथोक्तं, सालं वृक्षभेदं वीक्षितुं द्रष्टुं न अलं न शक्ता, उद्दीपकत्वादिति भावः, आलीनवकुलान् वकुलासक्तान् अलीन् भ्रमरान् अपि वीक्षितुं न अलं, तथा अलीकं विद्यते यासां तादृशीः मिथ्यावचनेन प्रियस्ते आगमिष्यत्यचिरेणेत्यादिना सान्त्वयन्तीरपि सखीरिति शेषः वीक्षितुं न अलम् । विदेशस्थं नायकं प्रति नायिकाप्रेरितया दूत्या उक्तिरियम् । अत्र सर्वेषु पदेषु मिश्रमव्यवहितमादिभागयमकं परं प्रथमद्वितीययोस्तथा तृतीयचतुर्थयोः व्यवहितमपीति अव्यपेतव्यपेतत्वं बोध्यम् ॥ ३४ ॥

कालमिति । का विरहिणीति शेषः अनालक्ष्या मेघाच्छन्नत्वाददृश्याः तारा महत्यः समुज्ज्वला इत्यर्थः तारका नक्षत्राणि यत्र तथोक्तं तारतया अत्युच्चत्वेन रम्याणि रसितानि मेघगर्जितानि यस्मिन् तादृशं तथा कालाः कृष्णवर्णा महान्तः घना मेघा यस्मिन् तथाभूतं कालं विरहिणां प्राणनाशकत्वात् यमस्वरूपं कालं वर्षाकालम् ईक्षितुं द्रष्टुम् अलं समर्था न कापीत्यर्थः । अत्र सर्वेषु पादेषु मिश्रं व्यवहितं तथा प्रथमचतुर्थयोर्द्वितीयतृतीययोश्च व्यवहितमादिभागयमकम् ॥ ३५ ॥

यामेति । यामत्रयस्य प्रहरत्रितयस्य अधीनः आयामो

यामयाम धियाऽस्वर्त्या या मया मथितैव सा ॥३६॥
इति पादादियमकविकल्पस्येदृशी गतिः ।
एवमेव विकल्प्यानि यमकानीतराण्यपि ॥ ३७॥
न प्रपञ्चभयाद् भेदाः कार्त्स्न्येनाख्यातुमीहिताः।
दुष्कराभिमता ये तु वर्ण्यन्ते तेऽत्र केचन ॥३८॥
स्थिरायते ! यतेन्द्रियो न हीयते यतेर्भवान् ।

दैर्घ्यं यस्याः तादृश्या त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयमिति वचनात् निशा रजन्या मरणं याम मृत्युं प्राप्नुवाम वयमिति शेषः निशायां सातिशयोद्दीपकत्वाद्विरहस्येति भावः किन्तु धिया मनसा यां कान्ताम् अयाम अगच्छाम यस्याश्चिन्तया कालमयापयाम इत्यर्थः सा अस्वर्त्या या अस्वर्त्तिं प्राणव्यथाम् आयाति प्राप्नोतीति तथाभूता सती आङ्पूर्वकात् याधातोः क्विपि रूपम्। मया मथितैव नाशितैव, मम तु मरणमस्तु, किन्तु सा तपस्विनी मद्वियोगेन म्रियत एवेति भावः। विरहिणः स्वावस्थानुभवेन विलापोक्तिरियम्। अत्र सर्वेषु पदेषु मिश्रमव्यवहितं व्यवहितञ्चादिभागयमकम् ॥३६॥

इतीति। पादादिस्थयमकानां विकल्पस्य भेदस्य इति उक्तरूपा ईदृशी एवम्प्रकारा गतिः नियमः। इतराणि अपि यमकानि एव विकल्प्यानि भेद्यानि ॥ ३७ ॥

नेति। प्रपञ्चभयात् विस्तारभयात् कार्त्स्न्येन साकल्येन भेदाः आख्यातुं न ईहिताः न चेष्टिताः, ये तु भेदा दुष्करत्वेन अभिमताः ख्याताः, अत्र ते केचन वर्ण्यन्ते उदाह्रियन्ते ॥३८॥

स्थिरायत इति। स्थिरा आयतिरुत्तरकालो यस्य तत्सम्बुद्धौ

अमायतेयतेऽप्यभूत् सुखाय तेऽयते चयम् ॥३९॥

सभासु राजन्नसुराहतैर्मुखैः
महीसुराणां वसुराजितैः स्तुताः ।
न भासुराः यान्ति सुरान् नते गुणाः
प्रजासु रागात्मसु राशितां गताः ॥ ४० ॥

तव प्रियाऽसच्चरित ! प्रमत्त ! या
विभूषणं धार्य्यमिहांशुमत् तया ।

उत्तरः काल आयतिरित्यमरः। हे स्थिरायते ! निश्चलचित्त ! इत्यर्थः भवान् यतेन्द्रियः जितेन्द्रियः अतः यतेः संयमात् न हीयते च्युतो भवति, ते तव अमायता अमायित्वं मायाराहित्यमित्यर्थः इयते एतत्परिमाणाय चयं नाशम् अयते अगच्छते अक्षयाय इत्यर्थः सुखाय अपि अभूत्। अत्र सर्वेषु पादेषु मिश्रमव्यवहितं व्यवहितञ्च मध्यभागयमकम् ॥ ३९ ॥

सभास्विति। हे राजन् ! महीसुराणां भूदेवानां ब्राह्मणानाम् असुराहतैः सुरापानेन अहतैः अनाश्रितैः पवित्रैरिति यावत् वसुना तेजसा भवद्दत्तधनलाभेन वा राजितैः शोभितैः प्रफुल्लैर्वा मुखैः सभासु स्तुताः कीर्त्तिताः भासुराः समुज्ज्वलाः तथा रागात्मसु अनुरागपरासु प्रजासु राशितां बहुलीभावं गताः ते तव गुणाः सुरान् देवान् न यान्ति न प्राप्नुवन्ति, सुरा अपि एतादृग्गुणवन्तो न सन्तीति भावः। अत्र सर्वेषु पादेषु मिश्रं व्यपेतञ्च मध्यभागयमकम् ॥ ४० ॥

तवेति। हे असच्चरित ! धूर्त्त ! हे प्रमत्त ! अनवहित ! या तव प्रिया, त्वया प्रेमास्पदत्वेन कीर्त्त्यमाना इत्यर्थः तया

रतोत्सवानन्दविशेषमत्तया
प्रयोजनं नास्ति हि कान्तिमत्तया ॥ ४१ ॥
भवादृशा नाथ ! न जानते नते
रसं विरुद्धे खलु सन्नतेनते ।
य एव दीनाः शिरसा नतेन ते
चरन्त्यलं दैन्यरसेन तेन ते ॥ ४२ ॥

इह रतोत्सवेन यः आनन्दविशेषः तेन मत्तया सत्या अंशुमत् समुज्ज्वलं विभूषणं धार्य्यं, तथाच विभूषणधारणस्य रतोत्सवानन्दविधायकताप्रयोजनं न तु शोभार्थमिति भावः। ननु शोभार्थमपि विभूषणधारणमस्तु इत्यत आह प्रयोजनमिति। कान्तिमत्तया स्वाभाविकसौन्दर्य्यवत्तया हेतुना प्रयोजनं विभूषणधारणस्येति शेषः नास्ति हि न विद्यते एवेत्यर्थः। अन्यासक्तं शठनायकमलङ्कारधारणे कथमस्या विराग इति पृच्छन्तं प्रति सख्या उक्तिरियम्। अत्र सर्वेषु पादेषु मिश्रं व्यवहितमन्तभागयमकम् ॥ ४१ ॥

भवादृशेति। हे नाथ प्रभो! भवादृशा जनाः नतेः नतभावस्य रसम् आस्वादं न जानते न विदन्ति, यतः सन्नतता इनता प्रभुता च ते सन्नतेनते नतिः प्रभुता चेत्यर्थः विरुद्धे खलु नैकाधारे वर्त्तेते इति भावः, ये जनाः दीना एव दरिद्राः केवलं, ते तेन दैन्यरसेन दैन्यरूपेण विषेण हेतुना नतेन शिरसा ते तव अलम् अत्यर्थं चरन्ति अतिशयेन त्वां सेवन्ते इत्यर्थः तवेति कर्मणि षष्ठी। अत्र सर्वेषु पादेषु मिश्रमव्यवहितञ्च अन्तभागयमकम् ॥ ४२ ॥

लीलास्मितेन शुचिना मृदुनोदितेन
व्यालोकितेन लघुना गुरुणा गतेन ।
व्याजृम्भितेन जघनेन च दर्शितेन
सा हन्ति तेन गलितं मम जीवितेन ॥ ४३ ॥

श्रीमानमानमरवर्त्मसमानमान-
मात्मानमानतजगत्प्रथमानमानम् ।
भूमानमानमत यः स्थितिमाननमान-
नामानमानमतमप्रतिमानमानम् ॥ ४४ ॥

लीलेति । सा नायिका शुचिना निर्मलेन लीलास्मितेन विलासहसितेन, मृदुना उदितेन वचनेन, लघुना व्यालोकितेन अपाङ्गदर्शनेनेत्यर्थः, गुरुणा नितम्बादिभरमन्थरेण गतेन गमनेन, व्याजृम्भितेन विशेषतो जृम्भया, जृम्भायाश्च अनुरागव्यञ्जकत्वमुक्तं यथा जृम्भते स्फोटयत्यङ्गं बालमाश्लिष्य चुम्बतीति । तथा, दर्शितेन जघनेन जघनदर्शनेनेत्यर्थः हन्ति व्यथयति मामिति शेषः, तेन च मम जीवितेन जीवनेन गलितं गतं, भावे क्तप्रत्ययः । अत्र सर्वेषु पादेषु मिश्रं व्यवहितं मध्यान्तयमकम् ॥ ४३ ॥

श्रीमाविति । हे भक्ताः ! यः श्रीमान् अमान् अपरिमितः, तथा स्थितिमान् स्थायी सच्चिदानन्दरूपतया सततमवतिष्ठते इत्यर्थः, अमरवर्त्म आकाशं तस्य समानं मानं परिमाणं यस्य तथोक्तम् आकाशवत् सर्वव्यापिनमित्यर्थः, आनतेषु प्रह्वीभूतेषु जगत्सु प्रथमानः विस्तारं गतः मानः सम्मानो यस्य तादृशं सर्वजगत्पूज्यमानमित्यर्थः, भूमानं महात्मम्, अमानम् अपरि-

सारयन्तमुरसा रमयन्ती
सारभूतमुरुसारधरा तम् ।
सारसानुकृतसारसकाञ्ची
सा रसायनसारमवैति ॥ ४५ ॥

नयानयालोचनयानयानया-
नयानयान्धान् विनयानयायते ! ।
न यानयासीर्जिनयानयानया-
नयानयांस्तान् जनयानयाश्रितान् ॥ ४६ ॥

मितम् असङ्ख्यमित्यर्थः नाम यस्य तथाभूतं तथा अप्रतिमानः असदृशः मानो यस्य तादृशं सर्वाभिमतमित्यर्थः । आत्मानं परमात्मानमित्यर्थः आनमत नमस्कुरुत । अत्र सर्वेषु पादेषु अव्यवहितं व्यवहितञ्च मिश्रं मध्यान्तयमकम् ॥ ४४ ॥

सारेति । उरुसाराणि स्वर्णभूषणानि धरतीति तथोक्ता, उरुसारं सुवर्णं स्यादिति व्याड़िः । तथा सारसैः पक्षिविशेषैरनुकृता सारसा सशब्दा काञ्ची यस्यास्तथाभूता, सा रमणी सारयन्तम् आश्लिष्यन्तं सारभूतं जगत्सु सारत्वेन गणितं तं पतिम् उरसा वक्षःस्थलेन रमयन्ती प्रत्यालिङ्गनेन सुखयन्ती सती रसायनम् अमृतम् असारम् अवैति, प्रियालिङ्गनसुखादमृतं तुच्छमवगच्छतीत्यर्थः । अत्र सर्वेषु पादेषु मिश्रं व्यवहितमादिमध्ययमकम् ॥ ४५ ॥

नयेति । हे अनयायते ! अनया अपायरहिता आयतिर्यस्य तत्सम्बोधनम् । हे प्रभो ! अनया नयानयालोचनया

रविण भौमो ध्वजवर्त्तिवीरवे-
रवेजि संयत्यतुलास्त्रगौरवे।
रवेरिवोग्रस्य पुरो हरेरवे-
रवेत तुल्यं रिपुमस्य भैरवे॥ ४७॥

नयः नीतिः अनयः दुर्नीतिः तयोरालोचना तया सदसद्विवेके-नेत्यर्थः अनयान् नयरहितान् अयस्य शुभावहविधेरानये आ-नयने अनुष्ठाने अन्धान् जनान् विनय विनीतान् कुरु, भव-न्नीतिमार्गानुसारिणस्तान् विधेहि। किञ्च जिनयानं जैनमार्गं यान्तीति तथोक्तान् बौद्धमतावलम्बिनः अयानम् अमार्गम् अपन्थानमित्यर्थः यान्तीति तादृशान् अपथगामिनः अत एव अनयाश्रितान् दुर्नयानुसारिणः यान् जनान् अयासीः गत-वानसि यैः सङ्गं कृतवानसि तान् अं विष्णुं यान्तीति तथा-भूतान् वैष्णवधर्मावलम्बिनः जनय कुरु। इति समुदायार्थः। अत्र प्रथमतृतीययोरव्यवहितमाद्यन्तयमकं मिश्रं द्वितीय-चतुर्थयोरव्यवहितं मिश्रमादिमध्ययमकञ्च॥ ४६॥

रविणेति। भौमः भूमिसुतः नरकासुरः ध्वजवर्त्तिनः श्री-कृष्णरथध्वजस्थितस्य वीरस्य वीर्य्यशालिनः वेः पक्षिणः गरुड़स्य रवेण नादेन अतुलम् अनुपमम् अस्त्राणां गौरवं यस्मिन् तादृशे भैरवे भयङ्करे संयति संग्रामे अवेजि उद्वेजितः त्रासित इत्यर्थः। तथाहि, रवेः सूर्य्यस्येव उग्रस्य अस्य हरेः श्रीकृष्णस्य सिंहस्य च पुरः अग्रे रिपुं नरकम् अवेर्मेषस्य तुल्यम् अवेत जानीत। श्रीकृष्णस्य नरकासुरेण युद्धवृत्तमिदम्। अत्र सर्वेषु पादेषु मिश्रं व्यवहितमाद्यन्तयमकम्॥ ४७॥

मयामयालम्बाकलामयामया-
मयामयातव्यविरामया मया ।
मयामयार्त्तिं निशयामयामया-
मयामयामूं करुणामयामया ॥ ४८ ॥

मयेति । अत्रायं पदविभागः । मयामयालम्बाकलामया-मयाम् । अयाम्, अयातव्यविरामया मया । मया, अमयार्त्तिं निशया, अमया, अमया । अमय, आमय, अमूं, करुणामय, आमया । हे अमय ! नास्ति माया यस्य तत्सम्बुद्धौ, हे अकपट ! इत्यर्थः आकारलोपो महाकविप्रयोगादविरुद्धः । हे करुणामय ! सखे ! आमं रोगं कामपीड़ां याति प्राप्नोतीति आमयाः तेन आमया धातोराल्लुक् शसाद्यचीति आकारलोपः । कामार्त्तेन इत्यर्थः मया सह मयः अपचयः अमयः उपचयः ताभ्याम् अपचयोपचयाभ्याम् आलम्बाः आश्रयणीयः वृद्धिक्षयशीलत्वात् इति भावः, यः कलामयश्चन्द्रः तस्मात् आमयः रोगः कामपीड़ा यस्याः तादृशीं चन्द्रस्य कामोद्दीपकत्वादिति भावः, अमूं रमणीम् आमय योजय । यतः अहम् अयातव्यः विरामोऽवसानं येषां तादृशा यामाः प्रहरा यस्यास्तादृश्या दीर्घयामया इत्यर्थः, नास्ति मा परिमाणं यस्यास्तथाभूतया सुदीर्घया इत्यर्थः, तथा अमया नास्ति मा शोभा यस्याः तथोक्तया अतिकुत्सितया विरहिणामिति भावः निशया रजन्या हेतुना अमयेन अप्राप्त्या तस्या इति भावः, अर्त्तिं पीड़ां तदप्राप्त्या सातिशयां पीड़ामित्यर्थः अयाम् अप्राप्नवम् । इति समुदायार्थः । सखायं प्रत्युक्तिरियम्, अत्र सर्वेषु पादेषु अव्यवहितं मिश्रमाद्यन्तयमकम् ॥ ४८ ॥

मताम्धुनानारमतामकामता-
मतापलब्धाग्रिमतानुलोमता ।
मतावयत्युत्तमता विलोमता-
मताम्यतस्ते समता न वामता ॥ ४८ ॥

कालकालगलकालकालमुखकालकाल !
कालकालघनकालकालपनकाल ! काल ! ।

मतामिति । पदविभागस्त्वेष: । मतां धुनाना, आरमताम् अकामताम् । अतापलब्धा, अग्रिमानुलोमता । मती अयती, उत्तमताविलोमताम् । अताम्यत: ते समता न, वामता । हे साधो ! अताम्यत: अक्लिष्टकर्मणस्ते तव मती आरमतां विषयव्यावृत्तानां योगिनां मतां सम्मताम् अकामतां निस्पृहतां धुनाना कम्पयन्ती तिरस्कुर्वतीत्यर्थ: अतापेन अक्लेशेन लब्धा प्राप्ता स्वाभाविकीत्यर्थ: अग्रिमताया: श्रेष्ठताया: अनुलोमता आनुकूल्यं मया तादृशी श्रेष्ठत्वसम्पादिनी तथा उत्तमताया गुणवत्ताया: विलोमतां प्रतिकूलताम् अयती अगच्छन्ती गुणवत्त्वसमानाधिकरणा समता अपक्षपातित्वं सर्वत्र समदर्शित्वमित्यर्थ: विद्यते, वामता प्रतिकूलता नेत्यर्थ: । कस्यचित् साधोर्गुणकीर्त्तनमिदम् । अत्र सर्वेषु पादेषु व्यवहितमादिमध्यान्तयमकम् ॥ ४८ ॥

कालेति । पदच्छेदस्त्वयम् । प्रथमपादे एकं पदम् । कालकालघनकालकालपनकाल, काल । कालकालसितकालका, ललनिका, अलकालकालका, आगलतु, कालकाल, कलिकालकाल । हे कालकालगलकालकालमुखकालकाल ! काल:

कालकालसितकालकाललनिकालकाल
कालकालगतु कालकाल कलिकालकाल ! ॥५०॥

संहारकः, कलनात् सर्वभूतानां स कालः परिकीर्त्तित इति वचनात्, कालगलः नीलकण्ठः, कालः यमः तथा कालमुखः वानरविशेषः तेषां द्वन्द्वः कालकालगलकालकालमुखाः तेषां कालकं कृष्णत्वम् आलाति आदत्ते इति तत्सम्बुद्धौ, तथा हे कालकालघनकालकालपनकाल ! कं जलम् आलाति गृह्णातीति कालः सजलः अत एव कालः कृष्णवर्णो यो घनः मेघः तस्य काले समये वर्षास्वित्यर्थः कायन्ति शब्दायन्ते इति कालकालघनकालकाः मयूरा इत्यर्थः कै शब्दे इत्यस्य क्विपि रूपम्। तेषाम् आलपनानि मुखानि कालकालघनकालकालपनानि तद्वत् कलते शब्दायते इति तत्सम्बुद्धौ मयूरनादिन्, इत्यर्थः पुनश्च, हे कालकाल ! कालस्य यमस्य कालः संहारकः तत्सम्बुद्धौ, यमभयनिवर्त्तक इत्यर्थः। किञ्च, हे कलिकालकाल ! कलिकालस्य कालः कल्किरूपेण दण्डयिता तत्सम्बुद्धौ, हे काल ! हे कृष्ण ! कालकालसितकालका कालकेन कृष्णवर्णतया आलसितं शोभितं कं शिवः यैः, तादृशाः अलकाः चूर्णकुन्तलाः यस्यास्तादृशी, अलकालकालका अलकान् चूर्णकुन्तलान् अलते मुक्तादिभिर्भूषयतीति अलकाली अलङ् भूषायामित्यस्य षणि रूपम्। तथा कलमेव कालं मधुरं यथा तथा कायतीति कालका मधुरभाषिणीत्यर्थः ततश्च अलकाली चासौ कालका चेति कर्मधारयः, ललनिका ललना राधा इत्यर्थः आगलतु तव अनुकम्पनीया भवतु इति निर्गलितोऽर्थः। श्रीकृष्णं प्रति राधायाः सख्युक्तिरियम्। अत्र सर्वेषु पादेषु अव्यवहितम् आदिमध्यान्तयमकम् ॥ ५० ॥

सन्दष्टयमकस्थानमन्तादी पादयोर्द्वयोः ।
उक्तान्तर्गतमप्येतत् स्वातन्त्र्येण कीर्त्त्यते ॥५१॥

उपोढ़रागाप्यबला मदेन सा
मदेनसा मन्युरसेन योजिता ।
न योजितात्मानमनङ्गतापिता-
ङ्गतापि तापाय ममास नेयते ॥ ५२ ॥

सम्प्रति सन्दष्टयमकस्थानं निर्दिशति सन्दष्टेति । सन्दष्टयमकं सन्दंशाकृति यमकं द्वयोः पादयोः अन्तादी प्रथमपादस्य अन्तं द्वितीयपादस्य आदिं तथा तृतीयपादस्य अन्तं चतुर्थपादस्यादिञ्च आक्रम्य स्थितमिति शेषः । एतत् उक्तेषु यमकेषु अन्तर्गतमपि रवेण भीम इत्यादी पतितमपीत्यर्थः स्वातन्त्र्येण पृथग्भावेन कीर्त्त्यते विशेषादिति भावः ॥ ५१ ॥

उपोढ़ेति । सा अवला मदेन यौवनजनितविकारेण उपोढ़ः उद्रिक्तः रागः अनुरागो यस्यास्तादृशी मय्यनुरागिणी अपिमदेनसा ममापराधेन हेतुना मन्युरसेन क्रोधावेगेन योजिता क्रोधपरवशा अत एव योजितः अभिनिवेशितः आत्मा मनः यस्यां तथाभूताम् अनङ्गतापिताम् अनङ्गं कामम् अङ्गतार्थतया तापयतीति अनङ्गतापिनी तस्या भावः तां गतापि सती मम इयते एतादृशाय तापाय न आस, न बभूव, न अपितु बभूव एवेत्यर्थः । सखायं प्रति कस्यचित् मानिन्या प्रत्याख्यातस्य उक्तिरियम् । अत्र पूर्वार्द्धे मदेन सा मदेनसा इति उत्तरार्द्धे च ङ्गतापिता ङ्गतापितेति सन्दष्टयमकम् ॥ ५२ ॥

अर्द्धाभ्यासः समुद्गः स्यादस्य भेदास्त्रयो मताः।
पादाभ्यासोऽप्यनेकात्मा व्यज्यते स निदर्शनैः ॥५३॥
नास्थेयःसत्वया वर्ज्यः परमायतमानया ।
नास्थेयः स त्वया वर्ज्यः परमायतमानया ॥ ५४ ॥

इत्थं पादभागयमकानि दर्शयित्वा सम्प्रति समस्तपादगतयमकानि दर्शयितुमाह अर्द्धाभ्यास इति। अर्द्धस्य पादद्वयस्य अभ्यासः पुनरावृत्तिः समुद्गः स्यात् समुद्गशब्देन सम्पुटक उच्यते। स यथा भागद्वयात्मकः तथा अयं पादद्वयात्मक इति तथा व्यपदेशः। अस्य समुद्गस्य त्रयो भेदाः मताः ख्याताः। तथाच, प्रथमद्वितीयौ तृतीयचतुर्थौ च पादौ तुल्यौ इत्येकः, प्रथमतृतीयौ द्वितीयचतुर्थौ च तथा इति द्वितीयः तथा प्रथमचतुर्थौ द्वितीयतृतीयौ इति तृतीयः। पादाभ्यासः अपि अनेकात्मा अनेकविधः तथाच प्रथमो द्वितीये तृतीये चतुर्थे च इति त्रयः। द्वितीयः तृतीये चतुर्थे चेति द्वौ। तृतीयचतुर्थे इत्येकः। पुनश्च प्रथमः द्वितीये तृतीये च, द्वितीये चतुर्थे च, तथा तृतीये चतुर्थे च इति षट्। मिलित्वा च एकादशविध इत्यर्थः स निदर्शनैः वक्ष्यमाणैरुदाहरणैः व्यज्यते व्यक्तीक्रियते ॥ ५३ ॥

नेति। परमायातः अतिदीर्घः मानो यस्याः तादृश्यापि अस्थेयः न अतिस्थिरं सत्वं स्वभावः व्यवसायश्च यस्याः तथाभूतया त्वया स वा पुरुषः न वर्ज्यः न प्रत्याख्येयः। परम् आयतमानया यत्नवत्या सत्या आस्थेयः आदर्त्तव्यः तथा आवर्ज्यः वशीभूतः कार्य्यः। तवायमुद्यमः न स्थिरतरः अतः प्रियपरित्यागे पश्चात्ताप एव फलं तस्मात् यथायं स्ववशे तिष्ठेत्

नरा जिता माननया समेत्य
न राजिता माननयासमेत्य ।
विनाशिता वै भवताऽयनेन
विनाऽशिता वैभवतायनेन ॥ ५५ ॥

कलापिनां चारुतयोपयान्ति
वृन्दानि लापोढ़घनागमानाम् ।
वृन्दानिलापोढ़घनागमानां
कलापिनां चारुतयोऽपयान्ति ॥ ५६ ॥

तथा यत्नः क्रियतामिति मानिनीं प्रति तत्सख्या उक्तिः । अत्र प्रथमतृतीयौ द्वितीयचतुर्थौ च तुल्याविति समुद्गभेदः ॥ ५४ ॥

नरा इति । माननया सम्मानेन समेत्य सङ्गत्य स्थितेन इति अध्याहार्य्यं, मानवतेत्यर्थः भवता अयनेन संग्रामगमनेन जिताः पराभूताः नराः रिपव इत्यर्थः माननययोः सन्मान-नीत्योः आसं क्षेपम् अभावमित्यर्थः एत्य प्राप्य न राजिताः न शोभिताः । पलायमानानामेषा गतिरुक्ता, ये तु न तथा तेषां गतिमाह विनाशिता इति । तथा वैभवं विभुत्वं तायति विस्तारयति इति तथोक्तेन तायृञ पालनविस्तारयोरित्यस्मात् नन्दादित्वादनप्रत्ययः । भवता विनाशिता वै निहतास्तु रिपवः विना पक्षिणा गृध्रेण इत्यर्थः अशिता भक्षिताः । राज्ञः स्तुतिरियम् । अत्र प्रथमद्वितीयौ तथा तृतीयचतुर्थौ च तुल्यौ इति समुद्गभेदः ॥ ५५ ॥

कलापिनामिति । लापेन केकाध्वनिना ऊढ़ः सम्मानितः घनागमः वर्षाकालः यैः तादृशानां कलापिनां मयराणां

न मन्दयावर्जितमानसात्मया
नमन्दयावर्जितमानसात्मया ।
उरस्युपास्तीर्णपयोधरद्वयं
मया समालिङ्ग्यत जीवितेश्वरः ॥ ५७ ॥
सभा सुराणामबला विभूषिता
गुणैस्तवारोहि मृणालनिर्मलैः ।

वृन्दानि चारुतया शोभया उपयान्ति सङ्गच्छन्ते शोभां प्राप्नुवन्तीत्यर्थः । तथा वृन्दानिलेन सङ्घातवायुना अपोढ़ः निरस्तः घनस्य नृत्यविशेषस्य घनं स्यात् कांस्यतालादि वाद्यमध्यनृत्ययोरिति मेदिनी आगमो येषां तादृशानां परित्यक्तनृत्यानाम् इत्यर्थः वर्षासु हंसानां मदराहित्यादिति भावः के जले लपन्तीति तथोक्तानां कलापिनां हंसानां च आरुतयः मधुरस्वराः अपयान्ति । वर्षावर्णनमिदम् । अत्र प्रथमचतुर्थौ तथा द्वितीयतृतीयौ तुल्यौ इति समुद्गभेदः ॥ ५६ ॥

नेति । मन्दया मूढ़या, अवर्जिते अत्यक्ते माने सात्मया सयत्नया यत्नवत्या यत्नेन मानं रचन्त्या, तथा दयया वर्जितौ मानसम् आत्मा स्वभावश्च यस्याः तथाभूतया मया नमन् कृतापराधतया पादयोः पतन् जीवितेश्वरः उरसि वक्षसि उपास्तीर्णम् अर्पितं पयोधरद्वयं यस्मिन् तद् यथा तथा न समालिङ्ग्यत नाश्लिष्यत । नाहकं निराकृत्य गलितमानाया मानिन्या अनुतापोक्तिरियम् । अत्र प्रथमद्वितीयौ पादावभ्यस्तौ ॥ ५७ ॥

सभेति । हे राजन् ! तव मृणालनिर्मलैः मृणालवत् परिशुद्धैः गुणैः अबला बलासुररहिता इन्द्रेण निहतत्वात्

स भासुराणामबला विभूषिता
विहारयन् निर्विश सम्पदः पुराम् ॥ ५८ ॥

कलङ्कमुक्तं तनुमद्ध्यनामिका
स्तनद्वयी च त्वदृते न हन्त्यतः ।
न याति भूतं गणने भवन्मुखे
कलङ्कमुक्तं तनुमद्ध्यनामिका ॥ ५९ ॥

निहतत्वात् बलासुरोत्पातविहीना इत्यर्थः विभूषिता देव-भोग्यद्रव्यजातैः विशेषेण सज्जिता सुराणां देवानां सभा आरोहि आरूढ़ा स त्वं विभूषिताः विशेषेण अलङ्कृताः अबलाः विहारयन् रमयन् सन् भासुराणां दीप्यमानानां समृद्धानाम् इत्यर्थः पुरां नगराणां सम्पदः निर्विश उपभुङ्क्ष्व । राजानं प्रति वैतालिकस्योक्तिरियम् । प्रथमतृतीयौ अभ्यस्ताविति ॥ ५८ ॥

कलमिति । कलं मधुरम् उक्तं वचनं विलासिनीनामिति अध्याहार्य्यं तथा तनु क्षीणं मध्यं नमयतीति तथोक्ता स्तनद्वयी च क्वचित् मध्यशब्दस्य धकारद्विर्भावः । त्वदृते त्वां विना कं जनं न हन्ति न पीड़यतीति अपितु सर्वमेव इत्यर्थः, अतः कारणात् भवन्मुखे भवादृशे विषये गणने भवादृशां जितेन्द्रि-याणां गणनायामित्यर्थः हि निश्चितम् अनामिका अङ्गुष्ठत-श्चतुर्थी अङ्गुलिः कलङ्कमुक्तं निर्दोषं तनुमत् शरीरिभूतम् अपरं प्राणिनं न याति न गच्छति त्वां विना अन्यं न गणयति इत्यर्थः । कमपि महान्तं प्रत्युक्तिरियम् । अत्र प्रथमचतुर्थौ पादावभ्यस्ताविति ॥ ५९ ॥

यशश्च ते दिक्षु रजश्च सैनिका
वितन्वतेऽजोपम ! दंशिता युधा ।
वितन्वतेजोऽपमदं शितायुधा
द्विषाञ्च कुर्वन्ति कुलं तरस्विनः ॥ ६० ॥

बिभर्त्ति भूमेर्वलयं भुजेन ते
भुजङ्गमोऽमा स्मरतो मदञ्चितम् ।
शृणूक्तमेकं स्वमवेत्य भूधरं
भुजङ्गमो मास्म रतो मदञ्चितम् ॥ ६१ ॥

यश इति। हे अजोपम ! अजराजसदृश ! नारायणसम ! वा हरसम ! अजा विष्णुहरच्छागा इत्यमरः । दंशिताः सन्नाहवन्तः शितानि तीक्ष्णानि आयुधानि येषां ते तथोक्ताः, तथा तरस्विनः महाबलाः ते सैनिकाः योद्धृपुरुषाः युधा संग्रामेण दिक्षु यशश्च वितन्वते विस्तारयन्ति। तथा द्विषां शत्रूणां कुलञ्च वितनु देहरहितम् अतेजः तेजोहीनं तथा अपमदं निर्मदं निरहङ्कारं वा कुर्वन्ति। विजिगीषुस्तुतिरियम्। अत्र द्वितीयतृतीयावभ्यस्ताविति ॥ ६० ॥

बिभर्त्तीति। हे राजन् ! भुजङ्गमो वासुकिः ते तव भुजेन अमा सह त्वद्भुजसाहाय्येनेत्यर्थः भूमेर्वलयं भूमण्डलं बिभर्त्ति धत्ते, एतावता गर्वो न विधेय इत्याह स्मरत इति। स्मरतः पूर्ववृत्तं विजानत इत्यर्थः मत् मत्तः सकाशादित्यर्थः अञ्चितं पूजितम् एकम् उक्तं वचनं शृणु आकर्णय, स्वं भूधरं भुजम् अवेत्य ज्ञात्वा रतः प्रीतः सन् चितं प्रवृद्धम् अत्यन्तमित्यर्थः

स्मरानलो मानविवर्द्धितो यः
स निर्वृतिन्ते किमपाकरोति ।
समन्ततस्तामरसेक्षणे ! न
समन्ततस्तामरसे ! क्षणेन ॥ ६२ ॥

प्रभावतो नामन ! वासवस्य
प्रभावतो नाम नवासवस्य ।
प्रभावतोऽनाम ! न वा सवस्य
विच्छित्तिरासीत् त्वयि विष्टपस्य ॥ ६३ ॥

मदं गर्वं मास्म गमः गर्वं मा कुरु इत्यर्थः । राजानं प्रत्युपदेशगर्भस्तुतिरियम् । अत्र द्वितीयचतुर्थावभ्यस्ताविति ॥ ६१ ॥

स्मरानल इति । तामरसेक्षणे ! मानिन रक्तोत्पलनयने ! रक्तोत्पलं तामरसमित्यमरः । हे अरसे ! अरसिके ! मानेन विवर्द्धितः विशेषेण वृद्धिं गतः यः स्मरानलः कामाग्निः, स ततः विस्तारं गतः सन् क्षणेन उत्सवेन समं समन्ततः सर्वतो भावेनेत्यर्थः । तां पूर्वानुभूतां निर्वृतिं सुखं किं न अपाकरोति न निरस्यति अपि तु निरस्यत्येवेत्यर्थः अतः नितरां कामपीड़ितासि मानं मुञ्च विलम्बेनालमिति भावः । मानिनीं प्रति तत् सख्युक्तिरियम् । अत्र तृतीयचतुर्थावभ्यस्ताविति ॥ ६२ ॥

पादत्रयाभ्यासं क्रमशो दर्शयति प्रभावत इत्यादि । हे प्रभावतः प्रभावात् प्रभावतः प्रभा दीप्तिः तत्सम्पन्नस्य वासवस्य इन्द्रस्यापि नामन ! नमयतीति नतं करोतीति तत्सम्बुद्धौ, यज्ञभङ्गपारिजातहरणादिना इन्द्रस्य गर्वहरणादिति

परम्पराया बलवा रणानां
परम्पराया बलवारणानाम् ।
धूलीः स्थलीर्व्योम विधाय रुन्धन्
परम्परायाऽबलवारणानाम् ॥ ६४ ॥

न श्रद्दधे वाचमलज्ज ! मिथ्या
भवद्विधानामसमाहितानाम् ।

भाव: नामेति प्रसिद्धौ हे अनाम ! नास्ति आमो रोगो यस्य यस्माद्वा तत्सम्बुद्धौ। त्वयि अतः अस्य षष्ठयास्तस् विष्टपस्य भुवनस्य प्रभौ सति नवासवस्य नवस्य आसवस्य सुरायाः सवस्य यज्ञस्य वा विच्छित्तिर्विच्छेदः नासीत् भोगिनां सुरापानोत्सवः धर्मिष्ठानां यज्ञादिकं सततं प्रवृत्तमिति इत्यर्थः। श्रीकृष्णस्तुतिरियम्। अत्र प्रथमद्वितीयतृतीयपादानामभ्यासः ॥ ६३ ॥

परमिति। हे पराय! परः उत्कृष्टः अयः शुभावहविधिर्यस्य तत्सम्बुद्धौ, हे परमकल्याणिन्नित्यर्थः हे बलवाः! बलेन वारयति शत्रूनिति तत्सम्बुद्धौ वारयते क्विपि रूपम्। त्वं बलमेषामस्तीति बला बलवन्तः अर्शआदित्वादच्प्रत्ययः। वारणा हस्तिनः येषु तथोक्तानां तथा अबलान् दुर्बलान् वारयन्तीति अबलवारणाः तेषां रणानां परम्परायाः समूहस्य स्थलीः रणभूमीरित्यर्थः धूलीर्विधाय व्योम आकाशं रुन्धन् आच्छादयन् सन् परं श्रेष्ठं परं शत्रुं परायाः गतवान् जितवान् असीत्यर्थः परापूर्वकाद् याधातोर्ण्यां मध्यमपुरुषैकवचनम्। राज्ञः स्तुतिरियम्। अत्र प्रथमद्वितीयचतुर्थ्या अभ्यस्ता इति ॥ ६४ ॥

नेति। हे अलज्ज! निर्घृण! असमाहितानाम् अवहित-

भवद्विधानामसमाहितानां
भवद्विधानामसमाहितानाम् ॥ ६५ ॥
सन्नाहितोमानमराजसेन !
सन्नाहितोऽमानम ! राजसे न ।
सन्नाहितो मानम ! राजसेन
सन्ना हितोऽमानमराजसेन ! ॥ ६६ ॥

चित्तानाम् अव्यवहितानामित्यर्थः तथा असमा असदृशा अहिताः शत्रवः येषाम् अधिकशत्रूणामित्यर्थः भवद्विधानां मिथ्या भवत् असत्यं भवत् विधानं कार्य्यं यस्यास्तां कार्य्येषु अपरिणतामित्यर्थः। तथा असमः विषमः यः अहिः सर्पः तस्यैव तानो विस्तारो यस्याः तादृशीं अतिवक्रदारुणामित्यर्थः, पुनश्च भवे उत्पत्तौ अवणमात्र एवेत्यर्थः द्विधा द्विविधः अनः प्राणः अर्थरूपः यस्याः तथाभूताम् अर्थानामिव वाचां प्राणत्वात् इति भावः, वाचं न श्रद्दधे न विश्वसिमि। शठनायकं प्रति नायिकाया उक्तिरियम्। अत्र द्वितीयतृतीयचतुर्थपादानामभ्यासः॥ ६५ ॥

सन्निति। हे सन्! साधो! हे आहितोमानमराजसेन ! न नमन्तीति अनमाः ब्राह्मणाः पचादित्वादन्। अनमानां राजा अनमराजश्चन्द्रः, उमा च अनमराजश्च तौ उमानमराजौ आहितौ स्वाङ्गधृतौ उमानमराजौ येन सः, आहितोमानमराजः शिवः तेन सेनः इनः स्वामी तेन सह वर्त्तमानः सेश्वर इत्यर्थः तत्सम्बुद्धौ शैव इत्यर्थः, तथा हे अमानम! अमाना अपरिमाणा मा लक्ष्मीर्यस्य तत्सम्बुद्धौ, पुनश्च हे राजसेन!

सकृद् द्विस्त्रिश्चयोऽभ्यासः पादस्यैवं प्रदर्शितः ।
श्लोकद्वयन्तु युक्तार्थं श्लोकाभ्यासः स्मृतो यथा ॥६७॥
विनायकेन भवता वृत्तोपचितबाहुना ।
स्वमित्रोद्धारिणाऽभीता पृथ्वीयमतुलाश्रिता ॥६८॥

रजोगुणविकारेण मानममानस्यते इति तत्सम्बोधनं लोभाद्यनायत्तीकृत इत्यर्थः, किञ्च हे अमानामराजसेन ! मानः सम्मानः मा लक्ष्मीः ते मानमे न विद्यते मानमे यस्याः तादृशी राजसेना विपक्षराजचमूर्यस्य तत्सम्बुद्धौ । त्वं समाहितः कृतयुद्धोद्योगः सन् न राजसे न शोभसे, यतस्त्वं सन्नाहितः सन्ना अवसादं गता अहिताः शत्रवो यस्य तथोक्तः, तथा सन्ना सत्पुरुषः साधुः इत्यर्थः ततश्च हितः सर्वेषां हिते रत इत्यर्थः अतस्तव युद्धयात्रा न युज्यत इति भावः । एवं राजानं प्रति युद्धनिवर्त्तकवचनम् अत्र सर्व एव पादा अभ्यस्ताः ॥ ६६ ॥

सम्प्रति श्लोकाभ्यासं निर्दिशति सकृदिति । एवम् उक्तप्रकारेण पादस्य सकृत् द्विः त्रिश्च यः अभ्यासः पुनरावृत्तिः सः प्रदर्शितः उदाहृतः । तत्र सकृदभ्यासः पादद्वयगतः, द्विरभ्यासः पादत्रयगतः, त्रिरभ्यासः पादचतुष्टयगत इति । युक्तः अर्थो यस्य एकवाक्यतापन्नमित्यर्थः श्लोकद्वयं समानानुपूर्वपदवर्णघटितं पद्यद्वितयं श्लोकाभ्यासः स्मृतः कथितः । यथेति वक्ष्यमाणोदाहरणार्थम् ॥ ६७ ॥

विनायकेनेति । हे राजन् ! विनायकेन दुर्जनानां शास्त्रा, वृत्तौ वर्त्तुलौ उपचितौ पीनौ बाहू यस्य तथोक्तेन स्वमित्राणां शोभनानाम् अमित्राणां शत्रूणाम् उद्धारिणा विनाशकेन तथा अतुलाश्रिता अतुलाम् अतुल्यतां केनापीति भावः आश्रयतीति

विनायकेन भवता वृत्तोपचितबाहुना ।
स्वमित्रोद्धाऽरिणाऽभीता पृथ्वी यमतुलाश्रिता ॥६९

एकाकारचतुष्पादं तन्महायमकाह्वयम् ।
तत्रापि दृश्यतेऽभ्यासः सा परा यमकक्रिया ॥ ७० ॥

समानयास ! मानया समानयासमानया ।
समानया समानया समान या समानया ॥ ७१ ॥

तथोक्तेन निरुपमेण इत्यर्थः भवता हेतुना इयं पृथ्वी अभीता दुर्जनेभ्यो भयरहिता जाता इत्यर्थः ॥ ६८ ॥

किञ्च अभीता युद्धाय भवत्समीपमभ्यागच्छता अभिपूर्वादिण्धातोः क्विपि तृतीयैकवचनम् । तव अरिणा शत्रुणा विनायकेन नायकरहितेन भवता सता वृत्तौ जातौ उपचितौ श्मशानस्थचितामारूढौ इत्यर्थः बाहू यस्य तथोक्तेन, तथा स्वमित्राणि निजबन्धून् उज्जहातीति तथाभूतेन, स्वमित्रशब्दात् उत्पूर्वकस्य जहातेः क्विपि तृतीयैकवचनम् । पृथ्वी गुर्वी यमतुला यमस्य अन्तकस्य तुला परिमाणयन्त्रं विचारस्थानम् इत्यर्थः मानयन्त्रे न्यूनाधिकत्वनिश्चयवत् कृतान्तविचारालये पुण्यपापनिश्चय इति भावः, आश्रिता प्राप्ता यमसदनं गतम् इत्यर्थः । राज्ञः स्तुतिविषयकं श्लोकद्वयमिति श्लोकाभ्यासोऽयम् ॥ ६९ ॥

एकेति । एकाकाराः चत्वारः पादा यत्र तत् महायमकाह्वयं महायमकसंज्ञं तत्रापि महायमकेऽपि यत्र पादखण्डस्य अभ्यासः पुनरावृत्तिः दृश्यते सा परा श्रेष्ठा यमकक्रिया यमकवत् पद्यानुष्ठानमित्यर्थः ॥ ७० ॥

समानयेति । अत्रायं पदच्छेदः समानयास, मा अनया,

धराधराकारधराधराभुजां
भुजा महीं पातुमहीनविक्रमाः ।
क्रमात् सहन्ते सहसा हतारयो-
रयोद्धुरा मानधुरावलम्बिनः ॥ ७२ ॥

समानय, असमानया, समानया, समानया, समान, या समानया इति। हे समानयाम ! समानः यामः यत्नः यस्य तत्सम्बुद्धौ, सर्वत्र तुल्ययत्न इत्यर्थः तथा समान ! समदर्शिन्! सर्वत्र आत्मवद्दर्शन इत्यर्थः असमानया निरुपमया, समानया मानवत्या समानया सम्माननीयया अनया नायिकया मा मां समानय सङ्गमय, या नायिका समानया मा लक्ष्मीः शोभा नयः नीतिः विद्या इत्यर्थः ताभ्यां सह वर्त्तमाना सुन्दरी विदुषी चेत्यर्थः, अतोऽस्याः सङ्गमो अतीवादरणीय इति भावः। अत्र पादचतुष्टयाभ्यासे पादखण्डस्यापि अभ्यासात् महायमकम् ॥ ७१ ॥

पूर्वं सजातीयसंमिश्रजनितप्रभेदा दर्शिता इदानीं विजातीयमिश्रणोदाहरणं दर्शयति धरेति। धराधराकारधराः धारायाः धरः नागराजः तस्य आकारः धराधराकारः तस्य धराः अतिदीर्घा इत्यर्थः, अहीनविक्रमाः अहीनः अनल्पः विक्रमः येषां ते, अथवा अहीनस्य अहीनामीश्वरस्य विक्रम इव विक्रमो येषां तादृशाः, सहसा हतारयः हता नाशिता अरयः शत्रवः यैः तयोक्ताः रयोद्धुराः रयेण वेगेन उद्धुराः उत्कटाः अतिवेगवन्त इत्यर्थः तथा मानधुरावलम्बिनः मानस्य धुरां भारम् अवलम्बन्त इति तथाभूताः धराभुजां राज्ञां भुजाः क्रमात् महीं पातुं पालयितुं सहन्ते क्षमन्ते। अत

आवृत्तिः प्रातिलोम्येन पादार्द्धश्लोकगोचरा ।
यमकं प्रतिलोमत्वात् प्रतिलोममिति स्मृतम् ॥७३॥
या मताश ! कृतायासा सायाता कृशता मया ।
रमणारकता तेऽस्तु स्तुतेताकरणामर ! ॥ ७४ ॥

प्रथमे पादे अव्यवहितमादिमध्ययमकं, पादानाञ्च सन्धिषु अव्यवहितमन्तादियमकं सन्दंशयमकञ्च । तृतीये च पादे एकवर्णव्यवहितं सह सहेति चतुर्थे च वर्णद्वयव्यवहितं धुरा धुरेति मध्ययमकम् । इत्थं बहूनां विजातीयानां संमिश्रणमत्र इत्यवधेयम् ॥ ७२ ॥

इत्यम् अनुलोमे यमकभेदानुक्त्वा इदानीं प्रातिलोम्ये दर्शयन्नाह आवृत्तिरिति । प्रातिलोम्येन वैपरीत्येन पादार्द्ध-श्लोकगोचरा पादगोचरा, अर्द्धगोचरा, श्लोकगोचरा च एवं त्रिविधा आवृत्तिः प्रतिलोमत्वात् प्रतिलोमं यमकम् इति स्मृतम् । तथाच यत्र पूर्वपादस्य प्रतिलोमावृत्त्या उत्तरपादः, पूर्वार्द्धस्य प्रतिलोमावृत्त्या उत्तरार्द्धं तथा एकस्य श्लोकस्य प्रति-लोमावृत्त्या श्लोकान्तरं निष्पद्यते तत् प्रतिलोममिति निष्कर्षः । तस्य चोक्तरीत्या त्रैविध्यम् ॥ ७३ ॥

पादगोचरामुदाहरति येति । हे मताश ! मता ज्ञाता आशा अन्यासङ्गविषयिणी तस्य तत्सम्बुद्धौ मया या कृशता चौणता कृतायासा कृतः आयासः क्लेशः यया तथोक्ता, सा आयाता प्राप्ता तव दुश्चेष्टितेन महान् क्लेशोऽनुभूत इदानी-मपि यथारुचि क्रियतामित्यर्थः । हे स्तुतेत ! स्तुतं स्तवम् इतः प्राप्तः स्तवार्ह इत्यर्थः अथवा स्तुतात् इतः च्युतः अस्त-वार्हः निन्दिताचरणात् अप्रशंसनीय इत्यर्थः तत्सम्बुद्धौ हे

नादिनो मदनाधी स्वा न मे काचन कामिता।
तामिका न च कामेन स्वाधीना दमनोदिना॥७५

अकरणामर! अकरणे अकार्य्यानुष्ठाने अमरः देवसदृश इत्यर्थः तत्सम्बुद्धौ, देवानामकार्य्यकरणमहल्याजारत्वादिकं बोध्यं तथा हे रमण! ते तव आरकता ऋच्छतीति आरकः ऋण्गतावित्यस्मात् णकप्रत्ययः। यस्य भावः आरकता यथेच्छागामिता इत्यर्थः अस्तु भवतु त्वं यां कामयसे तामेव व्रज नात्र स्थातव्यमिति भावः। मानिन्या नायकं प्रति सकोपोक्तिरियम्। अत्र प्रथमपादस्य प्रतिलोमावृत्त्या द्वितीयपादस्तथा द्वितीयस्य प्रतिलोमावृत्त्या प्रथमपादः, एवं तृतीयचतुर्थयोरपि, तेनात्र पादविषयं प्रतिलोमयमकम्॥ ७४॥

श्लोकार्द्धविषयमुदाहरति नादिन इति। नादिनः नादरूपं ब्रह्म अस्यास्तीति तथोक्तस्य नादब्रह्मानुध्यानरतस्य इत्यर्थः मे मम मदनाधी मदनश्च आधिश्च तौ कामः कामजनिता मानसी व्यथा चेत्यर्थः तथा स्वा निजा काचन कामिता विषयाभिलाषश्च न विद्यते इत्यर्थः तथा दमः इन्द्रियसंयमः तं नुदति निरस्यतीति तथोक्तेन इन्द्रियसंयमध्वंसकारिणा कामेन च स्वाधीना स्वम् आत्मा अधीनं यस्यास्तादृशी आत्मव्याकुलकारिणी तामिका ताम्यति अनयेति तम्धातोर्भावे णकप्रत्ययः स्त्रीत्वञ्च। ग्लानिरित्यर्थः नास्तीत्यर्थः। तथाच, कामः कामपीड़ा विषयाभिलाषः ग्लानिश्चेति चत्वारो मम न विद्यन्ते इति निष्कर्षः। नादोत्पत्तिश्चोक्ता सुरेश्वराचार्य्येण यथा सरेचपूरैरनिलस्य कुम्भैः सर्वासु नाड़ीषु विशोधितासु। अनाहतादम्बुरुहादुदेति। स्वात्मावगम्यः स्वयमेव नाद इति।

यानमानय माराविकशोनानजनासना।
यामुदारशताधीनामायामायमनादि सा॥ ७६॥
सा दिनामयमायामा नाधीता शरदाऽमुया।
नासनाजनना शोकविरामायनमानया॥ ७७॥

यमकचक्रम्।

योगिनो वचनमिदम्। अत्र श्लोकार्द्धस्य प्रतिलोमावृत्त्या श्लोकार्द्धान्तरं निष्पन्नमिति प्रतिलोमयमकं श्लोकार्द्धविषयम्॥ ७५॥

श्लोकगोचरं प्रतिलोमं दर्शयति यानमिति। हे सखे! इति अध्याहार्य्यं, त्वं यानं वाहनं अश्वाद्यन्यतममित्यर्थः आनय। किमित्याह यामिति। अहम् उदारशताधीनाम् उदाराणां महतां धनिनामित्यर्थः शतम् अधीनं यस्यास्तादृशीं यां वेश्यामित्यर्थः आयां गतवानस्मि, माराविकशा मारः काम एव अविमेषः तस्य ताड़नी कामिनां कामार्त्तिहन्त्रीत्यर्थः तथा ऊनः हीनः धनाभावादिति भावः अनः प्राणः येषां ते ऊनानाः धनहीना इत्यर्थः ते च ते जनाश्चेति ऊनानजनाः तान् अस्यति निरस्यतीति ऊनानजनासना निर्धनान् वहिष्कुर्वतीत्यर्थः सा वेश्या आयम् आगमनम् अनादि उक्ता मयेति शेषः अद्य तव सन्निधावागमिष्यामीति अभिहिता इत्यर्थः॥ ७६॥

सापि मय्यनुरागिणीत्याह सेति। सा वेश्या असुया उपस्थितया इत्यर्थः शरदा शरत्कालेन आधीता आधिं मनःपीड़ां मद्विरहेणेति भावः इता प्राप्ता अतएव शोकविरामा

वर्णानामेकरूपत्वं यत्त्वेकान्तरमर्द्धयोः ।
गोमूत्रिकेति तत् प्राहुर्दुष्करं तद्विदो यथा ॥ ७८ ॥

शोकस्य विरहदुःखस्य विरामः अवसानं यस्याः तादृशी न भवतीति शेषः सततं विरहदुःखमनुभवतीत्यर्थः, तथा दिनामयमायामा, दिने दिवसे यः आमयः रोगः तस्य मायां छलम् अमति गच्छति प्रकाशयतीत्यर्थः दिवसे सखीनां समक्षं रोगच्छलेन विरहदुःखं गोपयन्ती तिष्ठतीत्यर्थः किञ्च नासनाजनना नास्ति आसनाया उपवेशनस्य जननं क्रिया यस्याः तथोक्ता अस्थिरत्वात् विरहदुःखेनैकत्र उपविशतीत्यर्थः, पुनश्च अयनमानया अयनस्य मद्गमनस्य मानं ज्ञानं यातीति तथोक्ता मदीयगमनवर्त्मनिरीक्षमाणा तिष्ठतीत्यर्थः। सखायं प्रति अनुरागिण्यां वेश्यायामासक्तस्योक्तिरियम्। अत्र श्लोकस्य प्रतिलोमिनावृत्त्या श्लोकान्तरपूरणात् श्लोकगोचरं प्रतिलोमयमकम् ॥ ७७ ॥

अथ चित्रालङ्कारान् कांश्चित् निरूपयिष्यन् प्रथमं गोमूत्रिकां निर्दिशति वर्णानामिति। अर्द्धयोः श्लोकस्य यथाक्रमं पूर्वार्द्धोत्तरार्द्धयोः एकान्तरम् एकाक्षरव्यवहितं यत् एकरूपत्वम् अभिन्नाकारत्वं दुष्करं सहसा कर्त्तुमशक्यं तद्विदः चित्रालङ्कारज्ञाः गोमूत्रिकां चलतो गोमूत्राकारत्वेन घटितत्वात् गोमूत्रिकासंज्ञं प्राहुः। तदित्यत्र तमिति च पाठः, तदा तम् अलङ्कारमित्यर्थः। गोमूत्रिका च त्रिविधा पादगोमूत्रिका, अर्द्धगोमूत्रिका, श्लोकगोमूत्रिका च। इयन्तु अर्द्धगोमूत्रिकेति वेदितव्या। यथेति उदाहरणार्थम् ॥ ७८ ॥

म द नो म दि रा क्षी णा म पा ङ्गा स्त्रो ज ये द यम् ।
++ + + + + + + + + + + + + + + +
म दे ना य दि त त्क्षी ण म न ङ्गा याञ् ज लिं द दे ७९

इति गोमूत्रिका ।

प्राहुरर्द्धभ्रमं नाम श्लोकार्द्धभ्रमणं यदि ।
तदिष्टं सर्वतोभद्रं भ्रमणं यदि सर्वतः ॥ ८० ॥

अर्द्धगोमूत्रिकामुदाहरति मदन इति। अयं मदनः मदिराक्षीणां मत्तखञ्जननयनानाम् अपाङ्गमेव अस्त्रं यस्य तथाभूतः सन् यदि जयेत् मां प्रहरेत्, तत् तदा मदेनः मम पापं क्षीणं स्यादिति शेषः तदा च अनङ्गाय अहम् अञ्जलिं ददे पुष्पाञ्जलिं ददामि इत्यर्थः यदि अहं कामिनीभिः सकटाक्षमीक्ष्ये तदा कृतार्थो भवामि इति भावः। अत्र अर्द्धयोर्विषमवर्णानि एकरूपाणि, तथा उत्तरार्द्धस्य विषमाक्षराणि पूर्वार्द्धस्य समाक्षराणि यथाक्रमसमावर्त्तनीयानि अपि श्लोकरूपाणि इति अर्द्धगोमूत्रिका। एतद्विपरीतानि अपि उदाहरणानि सम्भवन्ति तानि च मृग्याणीति ॥ ७९ ॥

अथ अर्द्धभ्रमं सर्वतोभद्रञ्च निरूपयति प्राहुरिति। श्लोकार्द्धभ्रमणं श्लोकस्य अर्द्धेण अर्द्धमार्गेण अनुलोमेनेति शेषः यदि भ्रमणं भ्रमणेन पादोपस्थितिरिति यावत् तदा अर्द्धभ्रमं नाम चित्रं प्राहुः। यदि सर्वतः अनुलोमप्रतिलोमाभ्यां मार्गाभ्याम् इत्यर्थः भ्रमणं तदा तत् सर्वतोभद्रं नाम चित्रम् इष्टम्। तथाहि, द्विविधमिदम् अष्टाक्षरवृत्तिघटितमेव प्रायशो दृश्यते, तत्र प्रथमं चतुःषष्टिः कोष्ठानि अष्टपङ्क्तिघटितानि लेख्यानि, ततः आद्यपङ्क्तिचतुष्टये क्रमेण पादचतुष्टय वर्णा निवेशनीयाः,

म	नो	भ	व	त	वा	नी	कं
नो	द	या	य	न	मा	नि	नी
भ	या	द	मे	या	मा	मा	वा
व	य	मे	नो	म	या	न	त
त	न	या	म	नो	मे	य	व
वा	मा	मा	या	मे	द	या	भ
नी	नि	मा	न	य	या	द	नो
कं	नी	वा	त	व	भ	नो	म

॥ ८१ ॥

अर्द्धभ्रमः ।

ततश्च निम्नपङ्क्तिचतुष्टये चतुर्थतृतीयद्वितीयप्रथमपादा वैपरीत्येन लेख्याः । अर्द्धभ्रमे अधःपङ्क्तिचतुष्टये परावृत्त्या, सर्वतोभद्रे तु परावृत्त्या समावृत्त्या च चतुर्थादिपादलेखनम् इति भेदः तत्र आवृत्तिक्रमस्तु अर्द्धभ्रमे ऊर्द्ध्वपङ्क्तौ वामाद् दक्षिणतः, अधःपङ्क्तौ दक्षिणाद् वामतः । किञ्च, वामस्थोर्द्ध्व-कोष्ठादधःक्रमेण दक्षिणस्य अधःकोष्ठाद् ऊर्द्ध्वक्रमेण च अनु-लोमावृत्त्या प्रथमादिपादोपस्थितिः । सर्वतोभद्रे तु दक्षिणाद् वामतः वामाद्दक्षिणतश्च ऊर्द्ध्वादधःक्रमेण अधस्त ऊर्द्ध्वक्रमेण च अनुलोमप्रतिलोमाभ्यां सर्वत आवृत्त्या पादोपस्थितिरिति बोध्यम् ॥ ८० ॥

मनोभवेति । हे मनोभव ! हे नत ! कामिजननमस्कृत ! तव अनीकं सैन्यरूपा मानिनी इयं मानवती तव उदयाय

सा	मा	या	मा	मा	या	मा	सा
मा	रा	ना	या	या	ना	रा	मा
या	ना	वा	रा	रा	वा	ना	या
मा	या	रा	मा	मा	रा	या	मा
मा	या	रा	मा	मा	रा	या	मा
या	ना	वा	रा	रा	वा	ना	या
मा	रा	ना	या	या	ना	रा	मा
सा	मा	या	मा	मा	या	मा	सा

॥ ८२ ॥

सर्वतोभद्रम् ।

हृदये नो न अपितु उदयायैव, ननु विजयिनां सैन्यस् अपराधिदण्डकं तव अत्र किमित्याह वयम् एनोमया: पापिन: मा वा न वा, किन्तु भयात् अमेयामा: अमेय: आम: रोग: येषां तथोक्ता:, यदि च वयमनपराधिन: तथापि भृशं भयार्त्ता जाता: स्मेत्यर्थ: ॥ ८१ ॥

सेति । अमायायामासाया, अमायस्य अकपटस्य अमस्य अपरिमितस्य आमस्य रोगस्य कामपीड़ाया इत्यर्थ: आय: आगमनं यया तथोक्ता, तथा मारानायायानायामा मार: काम एव आनाय: जालं बन्धनहेतुत्वात् इति भाव: तस्य आयानेन आगमनेन आराम: प्रीति: यस्या: तादृशी, सततकामव्यापारवता इत्यर्थ:, किञ्च यानावारारावा यानं विदेशगमनम् आवारयती यानावार:, यानावार: आराव: वचनं यस्या: तथाभूता मम विदेशगमनं वारितवतीत्यर्थ: किञ्च अनाया नास्ति नाय: नीति: यस्या: तादृशी मम प्रवासाकरणे कार्य्यहानि:

य: स्वरस्थानवर्णानां नियमो दुष्करेष्वसौ।
इष्टश्चतु:प्रभृत्येषु दर्श्यते सुकर: पर: ॥ ८३ ॥
आम्नायानामाहान्त्या वाग्गीतीरीती: प्रीतीर्भीती:।
भोगो रोगो मोदो मोहो ध्येये धेच्छे देशे चेमे ॥८४॥

भवेन्न वेति विवेकरहिता इत्यर्थ: पुनश्च माया मां लक्ष्मीं यातीति तथोक्ता अतिसुन्दरीत्यर्थ:। सा रामा मत्प्रेयसी मासा चन्द्रेण अमा सह छायामृगधरो राजा मा: इति त्रिकाण्डशेष:। माराय मम विनाशाय, तस्या: स्मरणं चन्द्रोदयश्च सम्प्रति मां भृशं व्याकुलयतीत्यर्थ:। विरहिणो वचनमिदम् ॥ ८२ ॥

य इति। दुष्करेषु मध्ये स्वरस्थानवर्णानां स्वरा: आकारादय: स्थानानि कण्ठादीनि वर्णा: व्यञ्जनानि तेषां योऽसौ नियम: प्राचीनैरलङ्कारतया उक्त इति शेष:, एषु मध्ये इष्ट: दुष्करत्वेन अभिमत: चतु:प्रभृति दर्श्यते चतु:प्रभृतीत्यनेन चतुस्त्रिद्व्येकरूपत्वात् चत्वारो भेदा दर्श्यन्ते इत्यर्थ: पर: अन्य: पञ्चादि: सुकर: अतस्तदुदाहरणं यथायथं मृग्यं दुष्करसाधनार्थमेव मम प्रयास इति ध्वन्यते ॥ ८३ ॥

तत्र प्रथमं चतु:स्वरमुदाहरति आम्नायानामिति। आम्नायानां श्रुतीनाम् अन्त्या चरमा वाक् गीति: गानानि ईती: अतिवृष्ट्याद्युपप्लवरूपा:, तथा प्रीती: पुत्रदारादिषु प्रणयान् भीती: भयङ्करीरित्यर्थ: वियोगादिनेति भाव: आह ब्रवीति, अत:कारणात् भोग: सङ्गीतादिविषयोपभोग: रोग: व्याधिस्वरूप: तथा मोद: वैषयिकानन्द: मोह: अज्ञानमेव तस्मात् चेमे देशे पुण्यभूमौ ध्येये परमात्मनि धेच्छे धा मन:समाधानम्

क्षितिविजितिस्थितिविहितिव्रतरतयः परगतयः ।
उरु रुरुधुर्गुरु दुधुवुर्युधि कुरवः स्वमरिकुलम् ॥८५॥
श्रीदीप्ती ह्रीकीर्त्ती धीनीती गीःप्रीती ।
एधेते द्वे द्वे ते ये नेमे देवेशे ॥ ८६ ॥
सामायामामाया मासा मारानायायानारामा ।
यानावारारावानाया माया रामा मारायामा ॥८७

स्वरनियमः ।

इच्छा तत्रास्त्यभिलाषः ते विधेये इति शेषः धेच्छे इत्यत्र धेच्छे इति पाठे ध्या ध्यानमित्यर्थः । अत्र आ ई ओ ए इति चतुर्भिरेव स्वरैः पद्यबन्धः । विद्युन्मालावृत्तमिदम् ॥ ८४ ॥

त्रिस्वरमुदाहरति क्षितीति । क्षितेः पृथिव्याः विजितिः विजयः स्थितेर्मर्य्यादाया विहितिः विधानं ते एव व्रते क्षितिविजितिस्थितिविहितिव्रते तयोः रतिः अनुरागो येषां तथोक्ताः तथा परा उत्तमा गतिर्येषां तादृशाः कुरवः युधि युद्धे स्वम् अरिकुलम् उरु अत्यर्थं रुरुधुः तथा गुरु यथा तथा दुधुवुः कम्पितवन्तः । अत्र इ अ उ इति त्रिभिरेव स्वरैः पद्यबन्धः । त्वरितगतिर्वृत्तमिदम् ॥ ८५ ॥

द्विस्वरमुदाहरति श्रीदीप्ती इति । श्रीः लक्ष्मीः दीप्तिः कान्तिश्च ते ह्रीः लज्जा कीर्त्तिश्च ते, धीर्बुद्धिः नीतिश्च ते, गीः मधुरवाक् प्रीतिश्च सन्तोषश्च ते द्वे द्वे ते तव एधेते वर्द्धेते, ये इमे द्वे द्वे देवेशे देवानामीश्वरे इन्द्रे इत्यर्थः न विद्यते इति शेषः । अत्र ई ए इति द्वाभ्यामेव स्वराभ्यां पद्यबन्धः । वाणीवृत्तमिदम् ॥ ८६ ॥

नयनानन्दजनने नक्षत्रगणशालिनि ।
अघने गगने दृष्टिरङ्गने ! दीयतां सकृत् ॥ ८८ ॥
अलिनीलालकलतं कं न हन्ति घनस्तनि ! ।
आननं नलिनच्छायनयनं शशिकान्ति ते ॥ ८९ ॥
अनङ्गलङ्घनालग्ननानातङ्का सदङ्गना ।
सदानघ ! सदानन्दनताङ्गासङ्गसङ्गतः ॥ ९० ॥

सेति। पद्यमिदं सर्वतोभद्रोदाहरणत्वेन पूर्वं लिखितं व्याख्यातञ्च। आ इत्येनैव स्वरेण पद्यबन्धः ॥ ८७ ॥

अथ स्थाननियमे दर्शयितव्ये प्रथमं चतुःस्थानं दर्शयति नयनेति। हे नयनानन्दजनने अङ्गने! सुन्दरि! अघने मेघरहिते अतएव नक्षत्रगणशालिनि तारानिकरभूषिते गगने सकृत् एकवारं दृष्टिः दीयतां नयनानन्दजनने इति गगने इत्यस्यापि विशेषणं सङ्गच्छते। मानिनीं सान्त्वयतो नायकस्य तादृशगगने दृष्टिपातोक्तेः कामोद्दीपकत्वादनायासेनैव मानभङ्गः स्यादिति तत्पर्य्यम्। अत्र दन्त्यतालव्यकण्ठ्यमूर्द्धन्यैरेव वर्णैः पद्यबन्धः ॥ ८८ ॥

त्रिस्थानं दर्शयति अलीति। हे घनस्तनि। अलय इव नीला अलका लता यत्र तत्, नलिनच्छाये पद्मसदृशे नयने यत्र तादृशं तथा शशिनः कान्तिरिव कान्तिर्यस्य तथाभूतं ते तव आननं कं जनं न हन्ति नाकुलयति अपितु सर्वमेवेत्यर्थः। अत्र कण्ठ्यदन्त्यतालव्यैरेव वर्णैः पद्यबन्धः ॥ ८९ ॥

द्विस्थानमुदाहरति अनङ्गेति। हे सदानघ! सदा अनघ! अपाप! व्यथारहितेत्यर्थः, तथा हे सदानन्दनताङ्ग! सदा

अगा गाङ्गाङ्गकाकाकगाहकाघककाकहा ।
अहाहाङ्ग ! खगाङ्कागकङ्कागखगकाकक ! ॥ ९१ ॥

स्थाननियमः ।

आनन्देन गीतवादित्राद्यामोदेन नतानि व्याप्टतानि अङ्गानि यस्य तत्सम्बुद्धौ, सदङ्गना साध्वी नारी असङ्गसङ्गतः नास्ति सङ्गो येषां ते असङ्गाः दुर्जनाः तेषां सङ्गः तस्मात् अनङ्ग-लङ्घनेन कामपीड़या लग्नाः जाताः नाना विविधाः आतङ्काः सन्देहाः यस्यां तादृशी भवति, भर्त्तृविरहेण सती अपि दुर्ज-नासङ्गेन भ्रश्यतीति भावः। तस्मात् भार्य्यां प्रतिचिन्तय केवलं वृथामोदेनालमिति सखायं प्रति कस्यचिदुक्तिः। अत्र दन्त्यकण्ठैरेव पद्यरचना ॥ ९० ॥

एकस्थानमुदाहरति अगा इति। हे गाङ्गकाकाकगाहक! गङ्गाया इदं गाङ्गं यत् कं जलं तस्य आकाकः सशब्दवक्रगतिः आङ्पूर्वात् कै शब्दे इत्यस्मात् भावे क्विपि आकाः अक कुटिलगतावित्यस्मात् भावे ङप्रत्यये अकः आका सह अकः आकाकः तरङ्ग इत्यर्थः तं गाहते इति तथोक्तः तत्सम्बुद्धौ तथा हे अहाहाङ्ग! हाहां दीनतासूचकं ध्वनिविशेषं गच्छतीति हाहाङ्गः न हाहाङ्गः अहाहाङ्गः तत्सम्बुद्धौ, किञ्च हे खगा-ङ्कागकङ्क! खं गच्छन्तीति खगाः सूर्य्यादयः, ते अङ्काश्चिह्नानि यस्य स खगाङ्कः, स च असौ अगः पर्वतश्चेति खगाङ्कागः सुमेरु-रित्यर्थः तं कङ्कते गच्छतीति तथोक्तः ककिगतावित्यस्मात् अन्-प्रत्ययः। तत्सम्बुद्धौ, पुनश्च हे अगखगकाकक! अगति गच्छति इति अगं नश्वरमित्यर्थः खानि इन्द्रियाणि गच्छतीति खगम्, इन्द्रियविषयं ततश्च अगं खगञ्च यत् कं सुखं तदर्थं न ककते

रे रे रोरुरुरूरोरुगागोगोऽगाङ्गगोऽगगुः ।
किं केकाकाकुकः काको मामा मामम मामम ! ९२

अभिलपतीति अगखगकाकः तत्सम्बुद्धौ, इन्द्रियसुखेषु अनासक्त इत्यर्थः त्वम् अघककाकहा अघकानि पापानि एव काकाः तान् हन्तीति तथोक्तः अपापः सन् गां पृथिवीम् अगाः गतवानसि प्रदक्षिणीचकर्थेत्यर्थः। अत्र कण्ठ्यैरेव वर्णैः पद्यरचना। कस्यचिद्देशपर्य्यटकस्य स्तुतिरियम् ॥ ९१ ॥

अथ वर्णनियमे दर्शयितव्ये प्रथमं चतुर्वर्णमुदाहरति रे इति। रे रे इति नीचसम्बोधनसूचकमव्ययम्। रे रे मामम ! मायां लक्ष्म्यां ममेत्यव्ययं ममता इत्यर्थः यस्य सः तत्सम्बुद्धौ, कृपण इत्यर्थः, त्वं मां मा मा इति निषेधवाचकं सम्भ्रमाद्यतिरेके द्विरुक्तिरिति, अम गच्छ, मत्समीपं मा गच्छेत्यर्थः। यतः काकः किं केकाकाकुकः भवति अपि तु नैवेत्यर्थः, केका मयूरध्वनिः तस्याः काकुः मदजनितविकारः तं कायति शब्दायति शब्देन प्रकाशयतीत्यर्थः, कै शब्दे इत्यस्मात् डप्रत्ययः। न हि काको मयूरवृत्तिं लभते इति भावः, किञ्च रोरुरुरोरुगागोगः रोरूयते पुनः पुनरतिशयेन वा रौतीति रोरुः रौतेर्यङ्लुगन्तात् क्विप्। स च असौ रुरुर्मृगविशेषश्चेति रोरुरुः तस्य उरसः वक्षसः या रुक् शरवेधजनिता व्यथा सा एव आगः अपराधः पापमित्यर्थः तद् गच्छति प्राप्नोतीति तथाभूतः निरीहजीवहिंसकत्वात् पापीयांस्त्वं न मे योग्य इति भावः। पुनश्च त्वम् अगाङ्गगः अगस्य पर्वतस्य अङ्गम् एकदेशं गच्छति अधिवसतीत्यर्थः तथोक्तः पार्वत्य इत्यर्थः, तथा अगगुः न गच्छति न सङ्गच्छते इति अगा असम्बद्धा इत्यर्थः गौः वाणी

देवानां नन्दनो देवो नोदनो वेदनिन्दिनः ।
दिवं दुदाव नादेन दाने दानवनन्दिनः ॥ ९३ ॥
सूरिः सुरासुरासारिसारः सारससारसाः ।
ससार सरसीः सीरी ससूरुः स सुरारसी ॥ ९४ ॥

यस्य तादृशः असम्बद्धभाषीत्यर्थः अतस्त्वं न मे योग्य इति भावः। वाराङ्गनामभिलषन्तं कञ्चित् व्याधकुमारं प्रति तस्याः प्रत्याख्यानोक्तिरियम्। अत्र र क ग म इति चतुर्भिरेव वर्णैः पद्यबन्धः। वर्णपदेन च पद्यपूरकवर्णानां ग्रहणं, तेन अङ्गेति ङकारयोगेऽपि न चातुर्वर्ण्यव्याघातः, तस्य पद्यपूरकत्वाभावात् ॥ ९२ ॥

त्रिवर्णमुदाहरति देवानामिति। देवानाम् इन्द्रादीनां नन्दनो दैत्यदमनात् प्रीतिजननः, तथा वेदनिन्दिनो वेदनिन्दकस्य नास्तिकजनस्य नोदनः निरासकः देवः नृसिंहरूपी भगवान्, दानवान् नन्दयति त्रिभुवनविजयेन सन्तोषयतीति तथोक्तस्य दानवनन्दिनः हिरण्यकशिपोः दाने वक्षोविदारणे दोय खण्डने इत्यस्मात् अनट्प्रत्ययः। नादेन सिंहनादेन दिवम् अन्तरीक्षं दुदाव तापितवान्। अत्र दवन इति त्रिभिरेव वर्णैः पद्यबन्धः ॥ ९३ ॥

द्विवर्णमुदाहरति सूरिरिति। सूरिः विद्वान् तथा सुरासुरासारिसारः सुरान् असुरांश्च आसरति आस्कन्दति इति तथोक्तः सारो बलं यस्य तादृशः, किञ्च ससूरुः शोभनौ ऊरू सूरू ताभ्यां सहितः वामोरुरित्यर्थः, पुनश्च सुरारसी सुरायां रसः आस्वादः अनुराग इत्यर्थः विद्यते अस्येति सुरारसी स प्रसिद्धः सीरी सीरं लाङ्गलमस्यास्तीति तथोक्तः बलदेवः सारस-

नूनं नुन्नानि नानेन नाननेनाननानि नः ।
नाऽनेना ननु नाऽनूनेनैनेनानानिनो निनीः ॥९५॥

वर्णनियमः ।

इति दुष्करमार्गेऽपि कश्चिदादर्शितः क्रमः ।
प्रहेलिकाप्रकाराणां पुनरुद्दिश्यते गतिः ॥ ९६ ॥

सारसाः आरसेन शब्देन सह वर्त्तमानाः सारसाः पक्षिविशेषाः यासु ताः सरसीः ससार जलक्रीड़ार्थं गतवान् । बलदेवस्य जल-क्रीड़ाप्रकरणोक्तं पद्यमिदम् । अत्र द्वाभ्यामेव स र इति वर्णाभ्यां पद्यबन्धः ॥ ९४ ॥

एकवर्णमुदाहरति नूनमिति । अनेनेन प्रबलेन एनेन अ इनः प्रभुः एनः तेन अप्रभुणा सामान्यशत्रुणा इत्यर्थः, अनेन आननेन मुखेन भ्रूकुटिमतेति भावः करणेन नः अस्माकम् अनानि प्राणाः नूनं निश्चितं नुन्नानि अपनीतानि न न अपितु नुन्नान्येव अस्य भ्रूभङ्गिं दृष्ट्वैव वयं मृता एव का कथा सम्प्रहारे इति भावः । ननु तथापि इत्यर्थः इनः ना पुरुषः अस्माकं प्रभुरित्यर्थः अनान् प्राणान् निनीः नेतुमिच्छतीति नीधातोः सनन्तात् क्विपि प्रथमैकवचनम् । रक्षितुमिच्छुः सन्नित्यर्थः, न अनेनाः अपापः न भवति, शत्रुविजितस्य युद्धे मरणं जीविताद्द वरमिति अतोऽनेन यथाशक्ति युद्धं कर्त्तव्यमिति भावः । रिपुपराजितस्य कस्यचित् नृपसैन्यस्य दैन्योक्तिरियम् । अत्र नकाररूपवर्णैरेव पद्यबन्धः ॥ ९५ ॥

अथ प्रहेलिकां निर्दिशति इतीति । इति उक्तप्रकारेण दुष्करमार्गे चतुस्त्रिद्व्येकरूपनियमेऽपि कश्चित् अल्पमात्र इत्यर्थः क्रमः नियमः आदर्शितः उदाहृतः, एतावता अन्येऽपि

क्रीड़ागोष्ठीविनोदेषु तज्ज्ञैराकीर्णमन्त्रणे ।
परव्यामोहने चापि सोपयोगाः प्रहेलिकाः ॥ ९७ ॥
आहुः समागतां नाम गूढ़ार्थां पदसन्धिना ।
वञ्चितान्यत्र रूढ़ेन यत्र शब्देन वस्तुना ॥ ९८ ॥

दुष्कराश्चित्रालङ्काराः पद्मबन्धादयः प्राचीनोक्ताः ग्रन्थविस्तार-भयेन नात्रोक्ताः ग्रन्थान्तरतः ते ज्ञातव्या इति भावः, पुनः इदानीं प्रहेलिकानां प्रकाराणां विशेषाणां गतिः नियमः उद्दिश्यते निरूप्यते। तल्लक्षणन्तु सामान्यत उक्तम्। यथा, प्रहेलिका तु सा ज्ञेया वचः संवृतिकारि यदिति ॥ ९६ ॥

यदि च प्रहेलिकाया यमकादिवत् शब्दार्थोपस्कारकत्वेन रसानुगुण्याभावात् नालङ्कारत्वं, यदुक्तं रसस्य परिपन्थित्वात् नालङ्कारः प्रहेलिकेति, तथापि अस्या उपयोगित्वमाह क्रीड़ेति। क्रीड़ागोष्ठीषु विहारसभासु ये विनोदाः प्रमोदाः तेषु विषये तज्ज्ञैः प्रहेलिकाभिज्ञैः सह आकीर्णे जनसङ्कुले देशे यत् मन्त्रणं गुप्तभावेन परस्परसंलापः तस्मिन्, तथा परस्य व्यामोहने विशेषरूपेण अर्थावबोधवशेन मनसः व्याकुलतायाम् अथवा परस्य बोद्धव्यतिरिक्तस्य जनस्य व्यामोहने अव-रोधनिराकरणे विषये प्रहेलिकाः सोपयोगाः सप्रयोजनाः उपकारिण्य इत्यर्थः तस्मात् अस्या उपयोगित्वे अलङ्कारत्वम् अन्यच्च दोषावहत्वमिति बोध्यम् ॥ ९७ ॥

अस्या भेदान् क्रमेणाह आहुरिति। पदसन्धिना पदयोः सन्धिना सान्निध्यजनितसन्धिकार्य्येण गूढ़ः दुर्बोधः अर्थो यस्यास्तां समागतां नाम प्रहेलिकामाहुः, अन्यत्र यत्र विव-

व्युत्क्रान्तातिव्यवहितप्रयोगान्मोहकारिणी ।
सा स्यात् प्रमुषिता यस्यां दुर्बोधार्था पदावली ९९
समानरूपा गौणार्थारोपितैर्ग्रथिता पदैः ।
परुषा लक्षणास्तित्वमात्रव्युत्पादितश्रुतिः ॥ १०० ॥
सङ्ख्याता नाम सङ्ख्यानं यत्र व्यामोहकारणम् ।
अन्यथा भासते यत्र वाक्यार्थः सा प्रकल्पिता १०१

च्छितार्थभिन्नस्थले रूढ़ेन प्रसिद्धेन शब्देन या वञ्चना प्रतारणा सा वञ्चिता वञ्चिताख्या प्रहेलिकेत्यर्थः ॥ ९८ ॥

व्युत्क्रान्तेति । अतिव्यवहितानां पदानां प्रयोगात् मोहकारिणी अर्थावबोधवैधुर्य्यविधायिनी या सा व्युत्क्रान्ता नाम, यस्याञ्च पदावली पदानीत्यर्थः दुर्बोधः अर्थो यस्यास्तादृशी प्रमुषिता नाम प्रकर्षेण बुद्धेर्मुषितत्वादित्यर्थः । वञ्चितायान्तु एकं पदं दुर्बोधार्थमिह तु पदानीत्यनयोर्भेदः ॥९९॥

समानरूपेति । गौणार्थेन लाक्षणिकार्थेन आरोपितैः उपचारितैः पदैः ग्रथिता विरचिता या सा समानरूपा नाम सादृश्यनिबन्धनत्वादित्यर्थः लक्षणस्य सूत्रस्य अस्तित्वमात्रेण लक्षणानुसारेण न तु शक्ताशक्तविवेचनया इत्यर्थः व्युत्पादिता श्रुतिः शब्दः यत्र तादृशी या सा परुषा नाम अशक्तिनिबन्धनत्वेन श्रोत्रयोः पारुष्यावबोधादिति भावः ॥ १०० ॥

संख्यातेति । यत्र संख्यानं वर्णगणना वा संख्यावाचकशब्दः व्यामोहस्य अर्थावबोधवैधुर्य्यस्य कारणं सा संख्याता नाम, यत्र वाक्यार्थः अन्यथा भासते आपाततः प्रतीयमानादर्थात् अन्यरूपः प्रतीयते सा प्रकल्पिता नाम ॥ १०१ ॥

सा नामान्तरिता यस्यां नाम्नि नानार्थकल्पना ।
निभृता निभृतान्यार्था तुल्यधर्मस्पृशा गिरा ॥१०२
समानशब्दोपन्यस्तशब्दपर्य्यायसाधिता ।
संमूढ़ा नाम, या साक्षान्निर्दिष्टार्थापि मूढ़ये॥१०३
योगमालात्मिका नाम या स्यात् सा परिहारिका ।
एकच्छन्नाश्रितं व्यक्तं यस्यामाश्रयगोपनम्॥ १०४ ॥

सेति । यस्यां नाम्नि संज्ञाविषये नानार्थकल्पना नानार्थानां बहूनामर्थानां कल्पना सा नामान्तरिता नाम, यस्याञ्च तुल्यधर्मस्पृशा प्रस्तुताप्रस्तुतयोः साधारणधर्मं स्पृशन्त्या गिरा वाचा निभृतः गोपितः अन्य अपरः अर्थो यत्र सा निभृता नाम । अस्याश्च साधारणधर्मबलेन विषयस्य सूचनात् समासोक्तिमूलता बोध्येति ॥ १०२ ॥

समानशब्देति । उपन्यस्तेन उक्तेन शब्दानां प्रकृतार्थबोधकपदानां पर्य्यायेण नामान्तरेण साधिता विरचिता समानशब्दा नाम, अत्र च लक्षणया एकार्थशब्दस्यैव ग्रहणं न तु अभिधालभ्यार्थस्य, तथात्वे संवरणीयत्वाभावेन प्रकृतानुपयोगित्वादिति ध्येयम् । या साक्षात् अभिधायकशब्देन निर्दिष्टः निरूपितः अर्थो यत्र तादृशी अपि मूढ़ये व्यामोहाय भवतीति शेषः, सा संमूढ़ा नाम ॥ १०३ ॥

योगमालेति । या योगानां यौगिकपदानां माला समूहो यस्यां सा परिहारिका नाम स्यात् परिहरति झटित्यर्थबोधं वारयतीति व्युत्पत्त्या तथा व्यपदेशः शक्तिलभ्यार्थात् यौगिकार्थस्य नानाकष्टकल्पनामूलत्वेन सहसावबोधविरहादिति

सा भवेदुभयच्छन्ना यस्यामुभयगोपनम् ।
सङ्कीर्णा नाम सा यस्यां नानालक्षणसङ्करः ॥१०५॥
एताः षोड़श निर्दिष्टाः पूर्वाचार्य्यैः प्रहेलिकाः ।
दुष्टप्रहेलिकाश्चान्यास्तैरधीताश्चतुर्द्दश ॥ १०६ ॥
दोषानपरिसङ्ख्येयान् मन्यमाना वयं पुनः ।
साध्वीरेवाभिधास्यामस्ता दुष्टा यास्त्वलक्षणाः १०७

भावः । यस्याम् आश्रितम् आधेयं व्यक्तं स्फुटम् आश्रयस्य आधारस्य तु गोपनं सा एकच्छन्ना नाम ॥ १०४ ॥

सेति । यस्याम् उभयस्य आधेयस्य आधारस्य च गोपनं सा उभयच्छन्ना नाम भवेत् उभयोरपि निभृतत्वात्, यस्यां नानालक्षणानाम् उक्तानां प्रहेलिकाभेदकलक्षणानां सङ्करः साहित्येनावस्थितिः सा सङ्कीर्णा नाम ॥ १०५ ॥

एता इति । एताः समागतप्रभृतयः षोड़श प्रहेलिकाः पूर्वाचार्य्यैः निर्दिष्टाः अदुष्टत्वेन कथिता इत्यर्थः, तैः पूर्वाचार्य्यैरेव अन्याः चतुर्दश दुष्टाः प्रहेलिकाः च्युताक्षरादिकाः अधीताः पठिताः सदोषत्वेन कीर्त्तिता इत्यर्थः ॥ १०६ ॥

यदिच दुष्टाः प्रहेलिकाः पूर्वाचार्य्यैरुक्तास्तथाप्यस्माकं न तास्वभिरुचिरित्याह दोषानिति । वयं पुनः अपरिसंख्येयान् बहून् दोषान् मन्यमानाः जानन्तः सन्तः साध्वीरेव उत्कृष्टा एव निर्दोषा एव प्रहेलिकाः अभिधास्यामः उदाहरिष्यामः । यास्तु अलक्षणाः पूर्वोक्तलक्षणानन्तर्भूताः ताः दुष्टाः सदोषाः, तासामुदाहरणे न मम प्रयास इति भावः ॥ १०७ ॥

न मयागोरसाभिज्ञं चेतः, कस्मात् प्रकुप्यसि ।
अस्थानरुदितैरेभिरलमालोहितेक्षणे ! ॥ १०८ ॥
कुब्जामासेवमानस्य यथा ते वर्द्धते रतिः ।
नैवं निर्विशतो नारीरमरस्त्रीविड़म्बिनीः ॥ १०९ ॥
दण्डे चुम्बति पद्मिन्या हंसः कर्कशकण्टके ।

अत्र समागतामुदाहरति नेति। हे आलोहितेक्षणे ! आरक्तनयने ! कोपादिति भावः, मया ममेत्यर्थः षष्ठ्यर्थे तृतीया। चेतः गोरसस्य दुग्धादेः अभिज्ञं रसज्ञं न, दुग्धादिकं मया न हृतमित्यर्थः, कस्मात् प्रकुप्यसि, एभिः अस्थानरुदितैः अकारणरोदनैः अलम् इति सहजोऽर्थः संवृतिकारकः गूढ़ार्थस्तु मे चेतः आगसः अपराधस्य नायिकान्तरसङ्गरूपस्य रसस्य प्रमोदस्य अभिज्ञं न नाहम् अन्यां कामये कथं तवेदृशो मान इति अत्र मे आगोरसाभिज्ञमिति सन्धिसूत्रेण एकारस्य अयादेशेन मयागोरसाभिज्ञमिति निष्पन्नत्वात् प्रकृतार्थस्य संवरणम्। काञ्चित् गोपीं प्रति श्रीकृष्णस्य जनसमाजे उक्तिरियम् ॥ १०८ ॥

वञ्चितामुदाहरति कुब्जामिति। कुब्जां भुग्नपृष्ठां कामपि नारीम् आसेवमानस्य उपभुञ्जानस्य ते तव यथा रतिः सन्तोषः वर्द्धते, अमरस्त्रीविड़म्बिनीः सुरकामिनीसदृशीः अन्याः नारीः निर्विशतः उपभुञ्जानस्य एवं रतिः न वर्द्धते इति सहजोऽर्थः गूढ़ार्थस्तु कुब्जां कान्यकुब्जनगरीं तत्रत्यनारीं वेत्यादिः। अत्र कुब्जाशब्दो भुग्नपृष्ठनार्य्यामेव प्रसिद्धः अन्यत्र तु नेत्यप्रसिद्धार्थस्य प्रतिपादनम्। कान्यकुब्जनगरीं वा तत्रत्यनारीं प्रति अनुरक्तजने उक्तिरियम् ॥ १०९ ॥

मुखं वल्गुरवं कुर्वंस्तुण्डेनाङ्गानि घट्टयन् ॥ ११० ॥
खातयः कनि ! काले ते स्फातयः स्फार्हवल्गवः ।
चन्द्रे साक्षाद्भवन्त्यत्र वायवो मम धारिणः ॥१११॥
अत्रोद्याने मया दृष्टा वल्लरी पञ्चपल्लवा ।
पल्लवे पल्लवे ताम्रा यस्यां कुसुममञ्जरी ॥ ११२ ॥

व्युत्क्रान्तामुदाहरति दण्डे इति। हंसः कर्कशकण्टके पद्मिन्या दण्डे नाले अङ्गानि घट्टयन् वल्गुरवं मनोज्ञं नादं कुर्वन् पद्मिन्या मुखं चुम्बतीत्यन्वयः। अत्रान्वयबोधे आसत्तेर्व्यतिक्रमः ॥ ११० ॥

प्रमुषितां दर्शयति खातय इति। हे कनि ! कुमारि ! कन्या कनी कुमारी चेति हेमचन्द्रः। ते तव काल्यते क्षिप्यते इति कालः पादः तस्मिन् कल प्रेरणे इत्यस्य घञन्तस्य रूपं स्फातयः स्फाः वृद्धिः तस्य अतिः गतिः यत्र ते स्फीता इत्यर्थः बहव इति यावत् अत्सातत्यगताविल्यस्य क्विप्प्रत्ययान्तस्य रूपम्। खातयः खम् आकाशं तस्यायं गुणः खः खशब्दादिदमर्थे षणः। अतिर्गतिः। खस्य अतिः येषु ते नूपुरादयोऽलङ्काराः इत्यर्थः। स्फार्हवल्गवः स्फां स्फीतताम् अर्हन्तीति स्फार्हाः प्रभूताः वल्गवः वल्गनात् चलनात् जाताः ध्वनय इत्यर्थः ततश्च स्फार्हा वल्गवः येषां तथोक्ताः भवन्तीति शेषः, चन्दति आह्लादयति इति चन्द्रे तस्मिन् नूपुराद्यलङ्कृते सिञ्जितवति तव पादे साक्षात् प्रत्यक्षीकृत इत्यर्थः मम वायवः प्राणाः धारिणः सुस्थिरा भवन्ति। अत्र अप्रसिद्धैः बहुभिः पदैः प्रकृतार्थस्य संवरणात् प्रमोषणम् ॥ १११ ॥

समानरूपां दर्शयति। अत्रेति अत्र उद्याने मया पञ्च-

सुराः सुरालये स्वैरं भ्रमन्ति दशनार्च्चिषा।
मज्जन्त इव मत्तास्ते सौरे सरसि सम्प्रति॥ ११३॥
नासिक्यमध्या परितश्चतुर्वर्णविभूषिता।
अस्ति काचित् पुरी, यस्यामष्टवर्णाह्वया नृपाः ११४

वल्लर्या वल्लरी लता दृष्टा, यस्यां कुसुममञ्जरी पल्लवे पल्लवे प्रतिपल्लवमित्यर्थः। ताम्रा रक्ता। अत्र नायिका काचित् उद्यानत्वेन अध्यारोपिता तस्या बाहुः बल्लरीत्वेन, अङ्गुलयः पल्लवत्वेन, नखाश्च कुसुममञ्जरीत्वेन। तेषाञ्च ताम्रत्वं रक्ताङ्गुलिप्रभयेति बोध्यम्। अत्र पदानां गौणार्थारोपितत्वम्॥ ११२॥

परुषां दर्शयति सुरा इति। सुराः शोभना राः शब्दो गीतध्वनिरिति यावत् येषां ते रै शब्दे इत्यस्य क्विबन्तस्य रूपम्। शोभनं गायन्तः इत्यर्थः सुरापा इति कर्त्तृपदमूह्यम्। तथा दशनार्चिषा हास्येन विवृतास्यतया दन्तकिरणेनोपलक्षिताः सन्तः सम्प्रति सौरे सुरामये सरसि मज्जन्तः अतएव मत्ता इव सुरालये शुण्डिकालये स्वैरं भ्रमन्ति। सुरा इति पदं देवतावाचकमेव अनुशासनबलात् सुस्वरगायके प्रयुक्तम् इति पारुष्यम्॥ ११३॥

संख्यातामुदाहरति नासिक्यमध्येति। नासिक्यः नासिकायां भवः ञकार इत्यर्थः स मध्ये यस्याः सा मध्यस्थञकारा इत्यर्थः तथा परितः उभयतः चतुर्भिः वर्णैः विभूषिता विरचिता आदौ द्वौ वर्णौ अन्ते च द्वौ मध्ये ञकार एवंरूपा इति यावत् काचित् पुरी नगरी काञ्चीत्यर्थः अस्ति, यस्यां नृपाः राजानः अष्टवर्णाह्वयाः अष्टाभिर्वर्णैः निबद्धः आह्वयः आख्या येषां तादृशाः पुण्ड्रका इति ख्याता इति प्रसिद्धिः। पुण्ड्रक-

गिरा स्खलन्त्या नम्रेण शिरसा दीनया दृशा।
तिष्ठन्तमपि सोत्कम्पं वृद्धे ! मां नानुकम्पसे ॥११५॥
आदौ राजेत्यधीराक्षि ! पार्थिवः कोऽपि गीयते।
सनातनश्च, नैवासौ राजा नापि सनातनः॥११६॥

शब्दश्च प ड ण ड र अ क अ इत्यष्टभिर्वर्णैर्निबद्ध इति चतुरष्टभिर्वर्णैः संख्यावाचकैर्वा मोहनम् ॥ ११४ ॥

प्रकल्पितां दर्शयति गिरेति। हे वृद्धे ! स्थविरे ! स्खलन्त्या गिरा वाचा, नम्रेण शिरसा, दीनया कातरया दृशा चक्षुषा चोपलक्षितापि त्वं विशेषणे तृतीया। सोत्कम्पं सभयं तिष्ठन्तमपि मां नानुकम्पसे न दयसे। सहजोऽर्थः, गूढार्थस्तु हे वृद्धे ! हे लक्ष्मि ! ऋद्धिः सिद्धिलक्ष्म्यौ वृद्धेरप्याह्वया इमे इत्यमरः। अन्यं समानम्। अत्र प्रथमं प्रतीयमानादर्थात् अपरार्थकल्पना॥ ११५ ॥

नामान्तरितां दर्शयति आदाविति। हे अधीराक्षि ! चञ्चलनेत्रे ! कोऽपि पार्थिवः पार्थिवशब्दप्रतिपाद्यः आदौ तथा स सनातनश्च गीयते, किन्तु असौ नैव राजा भूपतिः नापि सनातनः नित्य इत्यर्थः। इति प्रश्नार्थः सहजः उत्तरार्थस्तु राजातनवृक्षरूपः गूढ़ः। तथाहि, राजातनशब्दस्यादिः राजा अथच सः पार्थिवः पृथिवीविकारजः, स च नातनः अतनः तनशब्दरहितो न भवतीति नातनः मिलित्वा राजातनो भवति। राजातनशब्देन पियालवृक्ष उच्यते। यथा, राजातनं पियालः स्यादित्यमरः। अत्र राजातनेति नाम्नि वक्तव्ये नानार्थनामकल्पनम्। लक्षणे नामपदं वस्तुमात्रपरत्वेन विवक्षितं तेन तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमा-

हृतद्रव्यं नरं त्यक्त्वा धनवन्तं व्रजन्ति काः ।
नानाभङ्गिसमाकृष्टलोका वेश्या न दुर्द्धराः ॥११७॥
जितप्रकृष्टकेशाख्यो यस्तवाभूमिसाह्वयः ।
स मामद्य प्रभूतोत्कं करोति कलभाषिणि ! ११८

श्रितः । गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः इत्यत्र सजलकुम्भरूपवस्तुनि प्रतिपाद्ये नानार्थकल्पनान्नामान्तरिता इति बोध्यम् ॥ ११६ ॥

निभृतामुदाहरति हृतद्रव्यमिति । नानाभङ्गिभिः बहुविधविलासचेष्टितैः समाकृष्टाः लोकाः याभिः तथोक्ताः तथा दुर्द्धराः दुःखेन ध्रियमाणाः कथञ्चिदपि अवश्याः काः हृतानि द्रव्याणि यस्य तादृशं नरं त्यक्त्वा धनवन्तं व्रजन्ति ? वेश्या न वेश्या मम प्रश्नविषया नेत्यर्थः सहजः । संवरणीयार्थस्तु नाना विविधा भङ्गास्तरङ्गाः सन्त्यस्मिन्निति नानाभङ्गि जलं तेन समाकृष्टा लोका अवतरणोत्सुका जना याभिस्ताः दुर्द्धराः धरात् पर्वतात् दुःखेन गताः कष्टेन निर्गता इत्यर्थः हृतानि स्रोतोवेगेन ध्वंसितानि द्रव्याणि पार्वतीयानि यस्य तं नरं नरसदृशम् आश्रयभूतं पर्वतमित्यर्थादायातं त्यक्त्वा धनवन्तं रत्नाकरं व्रजन्ति । अत्र विशेषणसाधारण्यात् एकतरनिषेधे अन्यतरप्रतीतिर्युक्तेति नद्य इति प्रश्नविषयोऽर्थः । अस्य तुल्यविशेषणप्रतीतौ वाचकशब्दानुपादानात् निभृतात्वमित्यपि बोध्यम् ॥ ११७ ॥

समानशब्दां दर्शयति जितेति । हे कलभाषिणि ! मधुरभाषिणि ! प्रकृष्टस्य केशस्य आख्या नाम शवालः, जिता

शयनीये परावृत्य शयितौ कामिनौ क्रुधा।
तथैव शयितौ रागात् स्वैरं मुखमचुम्बताम् ॥११९

विजितात्मभवद्वेषिगुरुपादहतो जनः।
हिमापहामित्रधरैर्व्याप्तं व्योमाभिनन्दति ॥ १२०॥

प्रकृष्टकेशाख्या येन सः यः तव भूमिर्धरा नास्ति भूमिर्यत्र सः अधरः तत्साह्वयः तस्य समाननामा ओष्ठ इत्यर्थः, सः अद्य मां प्रभूतोत्कम् अत्युत्सुकं करोति प्रबालसदृशस्तवाधरो मां व्यथयतीत्यर्थः। अत्र प्रकृष्टकेशाख्या अभूमिशब्दश्च लक्षितलक्षणया प्रबालाधरौ बोधयत इति प्रकृतस्य समानशब्देनोपस्थितिः समानशब्देयम् ॥ ११८ ॥

संमूढ़ां दर्शयति शयनीये इति। कामिनौ क्रुधा कोपेन परावृत्य शयनीये शय्यायां शयितौ रागात् तथैव शयितौ सन्तौ स्वैरं स्वच्छन्दं मुखम् अचुम्बताम्। अत्र क्रुधा परावृत्य शयितयोः स्वैरं मुखचुम्बनस्य दुर्घटत्वादापाततो मोहः पर्यवसाने तथैव शयिताविति पुनः परावृत्य पार्श्वान्तरेण शयितयोः सम्मुखीनत्वात् मुखचुम्बनं सुघटमेवेति संमूढ़ेयम् ॥ ११९ ॥

परिहारिकां दर्शयति विजितेति। विना पक्षिणा गरुड़ेनेत्यर्थः, जितः इन्द्र इत्यर्थः तस्य आत्मभवः पुत्रः अर्जुन इत्यर्थः, तस्य द्वेषी शत्रुः कर्ण इत्यर्थः, तस्य गुरुः पिता सूर्य्य इत्यर्थः, तस्य पादैः किरणैः हतः सन्तप्तः जनः हिमम् अपहन्तीति हिमापहः अग्निः तस्य अमित्राः शत्रवः जलानि इत्यर्थः, तेषां धराः अम्भोधराः तैः व्याप्तं व्योम आकाशम् अभिनन्दति। अत्र यौगिकशब्दैः प्रकृतार्थस्य हरणात् परिहारिका ॥ १२० ॥

न स्पृशत्यायुधं जातु न स्त्रीणां स्तनमण्डलम् ।
अमनुष्यस्य कस्यापि हस्तोऽयं न किलाफलः ॥१२१

केन कः सह सम्भूय सर्वकार्य्येषु सन्निधिम् ।
लब्ध्वा भोजनकाले तु यदि दृष्टो निरस्यते ॥१२२

सहया सगजा सेना सभटेयं न चेज्जिता ।

एकच्छन्नां दर्शयति नेति। कस्यापि अमनुष्यस्य कापुरुषस्य इत्यर्थः हस्तः जातु कदाचित् आयुधं न स्पृशति स्त्रीणां स्तनमण्डलञ्च न स्पृशति, तथापि अयं हस्तः न अफलः किल, अपि तु सफल एवेति आपाततः प्रतीयते परन्तु आयुधस्त्रीस्तनस्पर्शाभावेन नायं वीरः न वा विलासीत्यतः कथमस्य हस्तस्य फलवत्त्वमिति पर्य्यवसानात् अमनुष्यशब्देन गन्धर्वो लक्ष्यते, तस्य हस्तः गन्धर्वहस्तः एरण्डवृक्ष इत्यर्थः। उक्तञ्च हारावल्याम्, अमण्डपञ्चाङ्गुलवर्द्धमानो गन्धर्वहस्तस्त्रिपुटीफलञ्च इति तस्य फलवत्ता विद्यत एवेति आश्रितस्य फलस्य स्फुटत्वं न तु आश्रयस्य वृक्षस्येति एकच्छन्नेयम् ॥ १२१ ॥

उभयच्छन्नां दर्शयति केनेति। कः पदार्थः केन पदार्थेन सह सम्भूय मिलित्वा सर्वकार्य्येषु सन्निधिं सम्पर्कं लब्ध्वा भोजनकाले तु, तुशब्दोऽवधारणे। भोजनकाल एव यदि दृष्टो भवति तदा निरस्यते निराक्रियते ? उत्तरमिदम्। यथा, कस्य अयं कः केशः कशब्दार्थे ष्णप्रत्ययः। केन मस्तकेन सह सम्भूय तथा सर्वकार्य्येषु सन्निधिं समादरं लब्ध्वा भोजनकाले एव दृष्टो निरस्यते इति अत्र आश्रयाश्रयिणोर्मस्तककेशयोरेव छन्नतेति उभयच्छन्ना ॥ १२२ ॥

सङ्कीर्णां दर्शयति सहया इति। सहया साश्वा सगजा

अमात्रिकोऽयं मूढ़: स्यादचरज्ञश्च न: सुत: ॥१२३॥
सा नामान्तरितामिश्रा वञ्चितारूपयोगिनी ।
एवमेवेतरासामप्युन्नेय: सङ्करक्रम: ॥ १२४ ॥

प्रहेलिकाचक्रम् ।

इति शब्दालङ्कारा: ।

सभटा भटै: योद्धृभि: सह वर्त्तमाना इयं सेना शात्रवी चमूरित्यर्थ: न जिता चेत् पराभूता न यदि, तदा अयं मे सुत: अमात्रिक: विषयज्ञानवर्जित: अत: अचरज्ञश्च अचरं ब्रह्म तज्ज्ञोऽपीत्यर्थ:, मूढ़: मूर्ख: स्यात् । इति सहजोऽर्थ:, गूढ़ार्थस्तु हकारयकारगकार जकारभकारटकारसहिता तथा सेना इन: स्वामी अधिष्ठाता इत्यर्थ: तेन सहिता साधिष्ठातृका इयं वर्णमाला इत्यर्थ: न जिता अभ्यस्ता चेत्, तदा अमात्रिक: मात्रा स्वरादिवर्णानामुच्चारणकाल: तां वेत्तीति मात्रिक: न न मात्रिक: अमात्रिक: वर्णज्ञानरहित इत्यर्थ: अत: अचरं वेदं जानातीति अचरज्ञ: अभ्यस्तवेद: अपि मूढ़: मूर्ख इत्यर्थ:। यद्वा जिता लेखितुं शिक्षिता इत्यर्थ: अचरज्ञ: वर्णज्ञ: तथापि मूर्ख एवेति सङ्कीर्णेति ॥ १२३ ॥

अत्र सङ्कीर्णतां घटयति सेति । सा पूर्वोक्ता सङ्कीर्णाख्या प्रहेलिका अत्र नामान्तरितामिश्रा हयादिशब्दानां नानार्थकल्पनादिति भाव:, तथा सेनाशब्दस्य चमूरूपार्थस्य प्रसिद्धस्य वञ्चनात् वञ्चिताया: प्रहेलिकाया रूपयोगिनी तन्मिलिता इत्यर्थ: उल्लिखिते पद्ये प्रहेलिकाया: सङ्कीर्णतेति इतरासाम् अन्यासामपि प्रहेलिकानां सङ्करक्रम: एवमेव उन्नेय: अन्वेषणीय इत्यर्थ: ॥ १२४ ॥

अपार्थं व्यर्थमेकार्थं ससंशयमपक्रमम् ।
शब्दहीनं यतिभ्रष्टं भिन्नवृत्तं विसन्धिकम् ॥१२५॥
देशकालकलालोकन्यायागमविरोधि च ।
इति दोषा दशैवैते वर्ज्याः काव्येषु सूरिभिः १२६
प्रतिज्ञाहेतुदृष्टान्तहानिर्दोषो न वेत्यसौ ।
विचारः कर्कशः प्रायस्तेनालीढ़ेन किं फलम् १२७

इत्थं काव्यशोभाकरान् धर्मान् गुणालङ्कारान् निरूप्य काव्यस्य हेयत्वप्रतिपादकानां धर्माणां बहूनां दोषाणां सविस्तरवर्णने ग्रन्थबाहुल्यभिया प्राधान्येन नितान्तत्याज्यान् दश दोषानुद्दिशति अपार्थमित्यादि। अपार्थं निरर्थकं व्यर्थं विरुद्धार्थम् एकार्थम् अभिन्नार्थं ससंशयं सन्दिग्धम् अपक्रमं यथाक्रमरहितं, शब्दहीनम् ऊहादिना पूर्य्यं, यतिभ्रष्टं विच्छेदरहितं, भिन्नवृत्तम् असमवृत्तं विसन्धिकम् अकृतसन्धि देशादिविरोधि च काव्यं दुष्टमित्यर्थः तस्मात् सूरिभिः विद्वद्भिः इति उक्तरूपा एते अपार्थतादयः दश एव दोषाः काव्येषु वर्ज्याः त्याज्याः शाब्दबोधप्रतिकूलतया प्रयोक्तुरज्ञताप्रकटनात्। उक्तञ्च, दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसतीति। एवकारेण किञ्चिद्वैरस्यप्रतिपादकानां श्रुतिकटुप्रभृतीनां व्यवच्छेदः तेषां अन्वयबोधाप्रतिकूल्येन नात्यन्तं हेयत्वप्रतिपादकत्वात् इति निष्कर्षः ॥ १२५ ॥ १२६ ॥

ननु दशैवेति अवधारणमनुचितं प्रतिज्ञाहान्यादेरपि दोषत्वकीर्त्तनात्। उक्तञ्च, भगवता गोतमेन, प्रतिज्ञाहानिः प्रतिज्ञानन्तरं प्रतिज्ञाविरोध इति। यथोदाहृतं, यावज्जीवमहं

समुदायार्थशून्यं यत्तदपार्थमितीष्यते ।
उन्मत्तमत्तबालानामुक्तेरन्यत्र दुष्यति ॥ १२८ ॥

मौनी ब्रह्मचारी पिता मम। माता च मम बन्ध्यासीदपुत्रश्च पितामह इति। भामहादयस्तु तथा नेच्छन्ति। यथा प्रतिज्ञाहेतुदृष्टान्तहीनं दुष्टञ्च नेष्यत इति। तदेतं संशयमाशङ्क्याह प्रतिज्ञेति। प्रतिज्ञा साध्यनिर्देशः, हेतुस्तत्साधनं दृष्टान्तः प्रसिद्धोदाहरणविन्यासः, तेषां हानिः विरोधः अभावश्च दोषः काव्यस्य हेयत्वप्रतिपादको न वा इति संशये असौ प्रश्नविषयो विचारः निश्चयः एकपक्षावधारणं प्रायः कर्कशः नैयायिकत्वात् कठिनः वा नीरस इत्यर्थः, तस्मात् तेन विचारेण आलीढ़ेन आस्वादितेन ज्ञातेन इत्यर्थः किं फलं न किमपि फलमस्ति इत्यर्थः। तथाहि काव्यस्य वैरस्यजनकधर्म एव दोषपदार्थः, स च स्वत एव प्रतीयते नात्र विचारप्रयासेन फलं केवलम् अत्यन्तपरिहार्य्या एव कतिपये दर्श्यन्ते प्रतिज्ञाहान्यादीनाञ्च नात्यन्तपरिहार्य्यता दृश्यते अप्रतिज्ञातानाम् अपि प्रसङ्गसङ्गत्या कविभिर्वर्णितत्वात्, हेतुभावश्च प्रसिद्धवर्णने न वैरस्यमाहरति, दृष्टान्तश्च अलङ्कारस्वरूप एव तदभावेन न काव्यत्वं व्याहन्यते अनलङ्काराणाम् अपि काव्यत्वस्य सर्वैरेवाङ्गीकृतत्वात् इति ध्येयम् ॥ १२७ ॥

तत्र अपार्थं निरूपयति समुदायेति। समुदायस्य वाक्यघटकपदसमूहस्य यः अर्थः शाब्दबोधेन एकतामापन्नः प्रतिपाद्यः तेन शून्यं यत् काव्यं तत् अपार्थम् इति इष्यते, तच्च उन्मत्तानां वातुलानां मत्तानां सुरापानेन विकृतानां तथा बालानां शिशूनाम् उक्तेः वचनात् अन्यत्र दुष्यति, उन्मत्तादिवचने तु न दोष इत्यर्थः ॥ १२८ ॥

समुद्रः पीयते देवैरहमस्मि जरातुरः।
अमी गर्जन्ति जीमूता हरेरैरावणः प्रियः ॥१२९॥
इदमस्वस्थचित्तानामभिधानमनिन्दितम्।
इतरत्र कविः को वा प्रयुञ्जीतैवमादिकम् ॥१३०॥
एकवाक्ये प्रबन्धे वा पूर्वापरपराहतम्।
विरुद्धार्थतया व्यर्थमिति दोषेषु पठ्यते ॥ १३१ ॥

अपार्थत्वं दर्शयति समुद्र इति। देवैः सुरैः मेघैर्वा समुद्रः पीयते, देवैरित्यत्र सोऽर्यामिति पाठश्च दृश्यते। अहं जरातुरः अस्मि, अमी जीमूता मेघा गर्जन्ति, ऐरावणः ऐरावतनामा हस्ती हरेरिन्द्रस्य प्रियः। अत्र वाक्यचतुष्टयस्य परस्पराकाङ्क्षाभावेन अङ्गाङ्गित्वाभावात् एकवाक्यता नास्तीत्यतः समुदायस्य एकरूपोऽर्थो नास्ति। उक्तञ्च, स्वार्थबोधसमाप्तानाम् अङ्गाङ्गित्वव्यपेक्षया। वाक्यानाम् एकवाक्यत्वं पुनः संहत्य जायत इति इदञ्च बहुवाक्यगतम् अपार्थत्वं बहुपदगतमपि दृश्यते। यथा, वह्निना सिञ्चतीत्यादौ योग्यताभावेन नैकार्थता इति बोध्यम् ॥ १२९ ॥

इदमिति। अस्वस्थचित्तानाम् उन्मत्तादीनाम् इदं पूर्वोक्तम् अभिधानं समुद्रः पीयत इत्यादि वचनम् अनिन्दितम् अदुष्टत्वेन परिगृहीतं भवतीति शेषः, इतरत्र अस्वस्थचित्तादिभ्य इति शेषः उन्मत्तादीन् विना इत्यर्थः को वा कविः एवमादिकं प्रयुञ्जीत न कोऽपि कविः प्रयुञ्जीतेत्यर्थः ॥ १३० ॥

व्यर्थं निरूपयति एकवाक्ये इति। एकवाक्ये एकस्मिन् वाक्ये वा प्रबन्धे महावाक्ये विरुद्धार्थतया विपरीतार्थत्वेन यत्

जहि शत्रुबलं कृत्स्नं जय विश्वम्भरामिमाम् ।
तव नैकोऽपि विद्वेष्टा सर्वभूतानुकम्पिनः ॥१३२॥
अस्ति काचिदवस्था सा साभिषङ्गस्य चेतसः ।
यस्यां भवेदभिमता विरुद्धार्थापि भारती ॥१३३॥
परदाराभिलाषो मे कथमार्य्यस्य युज्यते ।
पिबामि तरलं तस्याः कदा नु दशनच्छदम्॥१३४॥

पूर्वापरपराहतं पूर्वापरयोः आद्यन्तभागयोः पराहतं सङ्गति-रहितं तत् काव्यं व्यर्थम् इति दोषेषु मध्ये पठ्यते गण्यते। अर्थविरोधश्च शाब्दबोधानन्तरं पर्य्यालोचनया प्रतीयते, अपार्थे तु आकाङ्क्षादीनाम् अभावेन शाब्दबोध एव नास्तीत्यनयो-र्भेदः ॥ १३१ ॥

व्यर्थतां दर्शयति जहीति। कृत्स्नं समग्रं शत्रुबलं जहि नाशय, इमां विश्वम्भरां जय, सर्वभूतानुकम्पिनः सर्वभूतेषु दयावतस्तव एकोऽपि विद्वेष्टा शत्रुः न अस्तीति शेषः। अत्र शत्रुशून्यस्य समग्रशत्रुहननं सर्वभूतानुकम्पिनश्च पृथिवीविजयः पर्य्यालोचनया विरुद्धतया प्रतीयते ॥ १३२ ॥

कदाचिद् व्यर्थताया गुणत्वमपीत्याह अस्तीति साभि-षङ्गस्य वियोगादिदुर्घटनाभिभूतस्य, अभिषङ्गः पराभवे इत्य-मरः। चेतसः काचित् अनिर्वचनीया अवस्था अस्ति भवति, यस्यां सा विरुद्धार्थापि भारती वाणी अभिमता समादृता भवेत् ॥ १३३ ॥

अस्या गुणत्वं दर्शयति परेति। आर्य्यस्य साधोः मे मम परदाराभिलाषः परस्त्रीषु अभिरतिः कथं युज्यते, तस्याः पर-

अविशेषेण पूर्वोक्तं यदि भूयोऽपि कीर्त्त्यते।
अर्थतः शब्दतो वापि तदेकार्थं मतं यथा ॥१३५॥

उत्कामुन्मनयन्त्येते बालां तदलकत्विषः।
अम्भोधरास्तड़िल्वन्तो गम्भीराः स्तनयित्नवः ॥१३६॥

अनुकम्पाद्यतिशयो यदि कश्चिद् विवच्यते।
न दोषः पुनरुक्तोऽपि प्रत्युतेयमलङ्क्रिया ॥ १३७॥

नार्य्याः तरलं लज्जाभयजनितसम्भ्रमात् सकम्पं दशनच्छदं कदा नु पिबामि। अत्र पूर्वार्द्धे शान्तभावः उत्तरार्द्धे तु पुनः परदारौत्सुक्यमिति विरोधोऽपि प्रयोक्तुर्वियोगाभिभूततया गुणत्वे सङ्गच्छते इति बोध्यम् ॥ १३४ ॥

एकार्थं दर्शयति अविशेषेणेति। यदि पूर्वोक्तं वचः अर्थतः शब्दतः वापि अविशेषेण अभिन्नतया भूयोऽपि पुनः कीर्त्त्यते तत् एकार्थं मतम्, एवञ्च दोषोऽयं अर्थगतः एकार्थकशब्दगतश्चेति, तथाच अर्थस्य एकार्थत्वमिति बोध्यम्। यथेति उदाहरणप्रदर्शनार्थम् ॥ १३५ ॥

अर्थगतमेकार्थं दर्शयति उत्कामिति। तस्याः बालायाः अलकानामिव त्विषो येषां तादृशाः स्तनयित्नवः गर्जनशीलाः तड़िल्वन्तः सौदामिनीसहिताः गम्भीराः एते अम्भोधराः मेघाः उत्कां विरहेणोत्कण्ठितां बालाम् उन्मनयन्ति उन्मनसं कुर्वन्ति उद्दीपकत्वादिति भावः। अत्र उत्कोन्मनःशब्दौ अम्भोधरादिशब्दाश्च स्वरूपाभेदेऽपि एकार्थशक्तत्वात् पुनरुक्तार्थाः। एवं शब्दगतम् अपि यथायथमूहनीयम् ॥ १३६ ॥

अस्य प्रतिप्रसवमाह अनुकम्पेति। यदि कश्चित् अनु-

हन्यते सा वरारोहा स्मरेणाकाण्डवैरिणा ।
हन्यते चारुसर्वाङ्गी हन्यते मञ्जुभाषिणी ॥१३८॥
निर्णयार्थं प्रयुक्तानि संशयं जनयन्ति चेत् ।
वचांसि दोष एवासौ ससंशय इति स्मृतः ॥१३९॥
मनोरथप्रियालोकरसलोलेक्षणे ! सखि ! ।
आरात् वृत्तिरसौ माता न क्षमा द्रष्टुमीदृशम् १४०

कम्पाद्यतिशयः अनुकम्पादीनाम् अतिशयः प्रकृतस्येति शेषः विवक्ष्यते वक्तुमिष्यते, तदा पुनरुक्तोऽपि न दोषः, प्रत्युत अलङ्क्रिया अलङ्कारः काव्यशोभाधायकत्वात् । यदुक्तं गुण इत्यधिकृत्य दर्पणकारेण, कथितञ्च पदं पुनः । विहितस्यानुवाद्यत्वे विषादे विस्मये क्रुधि । दैन्येऽथ लाटानुप्रासेऽनुकम्पायां प्रसादने । अर्थान्तरसंक्रमितवाच्ये हर्षेऽवधारणे इति । एवञ्च उन्मत्ताद्युक्तावपि पौनरुक्त्यं गुण एवेति ज्ञेयम् ॥ १३७ ॥

अनुकम्पायामुदाहरति हन्यते इति । सा वरारोहा अकाण्डवैरिणा अकारणरिपुणा स्मरेण कामेन हन्यते, सा चारुसर्वाङ्गी हन्यते, सा मञ्जुभाषिणी हन्यते । अत्र हन्यते इति क्रियावाचकं पदं पुनः पुनरुक्तमपि प्रस्तुताया नायिकाया अनुकम्पनीयत्वादिप्रकटनात् वैचित्र्यमेव जनयतीति नात्र दोषावहम् । एवमन्यत्रापि उदाहरणानि मृग्याणि ॥ १३८ ॥

ससंशयं निरूपयति निर्णयार्थमिति । निर्णयार्थं निश्चयार्थं प्रयुक्तानि वचांसि चेत् यदि संशयं जनयन्ति सन्देहयन्ति, असौ एव दोषः ससंशयः, ससंशयदोषेण लिप्त इत्यर्थः ॥ १३९ ॥

ससंशयमुदाहरति मनोरथेति । हे मनोरथप्रियालोक-

ईदृशं संशयायैव यदि वातु प्रयुज्यते ।
स्यादलङ्कार एवासौ न दोषस्तत्र तद् यथा ॥१४१॥
पश्याम्यनङ्गजातङ्कलङ्घितां तामनिन्दिताम् ।
कालेनैव कठोरेण ग्रस्तां किं नस्त्वदाशया ॥१४२॥

रसलोलेक्षणे ! मनोरथप्रियः वाञ्छितप्रेमिकः तस्य आलोकः दर्शनं तस्मिन् यः रसः आवेशः तेन लोले चञ्चले ईक्षणे यस्याः तत्सम्बुद्धौ, जारदर्शनव्यापृतनयने ! सखि ! असौ तव माता आराद् वृत्तिः दूरवर्त्तिनीत्यर्थः अतः ईदृशं तव व्यवहारं द्रष्टुं न क्षमा, अथवा आराद्वृत्तिः समीपवर्त्तिनी अतस्तव ईदृशं दुर्व्यवहारमित्यर्थः द्रष्टुं न क्षमा, आराद् दूरसमीपयोरित्यमरः। अत्र प्रथमार्थे त्वं यथेच्छं विहरेति द्वितीयार्थे इदानीम् ईदृशं कर्म मा कुरु इत्येतयोरर्थयोः संशयः। जारं प्रत्यनुरागिणीं नायिकां प्रति तन्मातुस्तदाचरणपरिज्ञानशङ्कया सख्या उक्तिः ॥ १४० ॥

अस्य कदाचित् गुणमाह ईदृशमिति। यदि वातु यद्यपि ईदृशं ससंशयं वाक्यं संशयाय संशयप्रतिपादनाय एव प्रयुज्यते व्यवह्रियते, तदा असौ संशयः अलङ्कार एव स्यात्, तत्र न दोषः, तथाच यत्र संशय एव विवक्षितः तत्र असौ गुण एव अविवक्षितस्तु दोष एवेति भावः। तत् तस्य उदाहरणं यथेति वक्ष्यमाणसूचनार्थम्। वातु इत्यत्र जातु इत्यपि पाठो दृश्यते ॥ १४१ ॥

पश्यामीति। अनिन्दितां तां तव कान्तामित्यर्थः अनङ्गजेन आतङ्केन कामपीड़या इत्यर्थः लङ्घिताम् आक्रान्ताम् अत एव कठोरेण निर्दयेन कालेन मृत्युना ग्रस्तां पश्यामि, त्वदा-

कामार्त्ता घर्मतप्ता वेत्यनिश्चयकरं वचः ।
युवानमाकुलीकर्त्तुमिति दूत्याह नर्मणा ॥१४३॥
उद्देशानुगुणोऽर्थानामनूद्देशो न चेत् कृतः ।
अपक्रमाभिधानं तं दोषमाचक्षते बुधाः ॥१४४॥
स्थितिनिर्माणसंहारहेतवो जगताममी ।

शया तव प्रत्याशया नः अस्माकं किं फलम् ? इति अयमर्थः, अथवा अङ्गजेन आतङ्केन शारीरिकपीड़या न लङ्घितेति अनङ्गजातङ्कलङ्घिता तां कठोरेण कालेन ग्रीष्मेणेत्यर्थः ग्रस्तां पश्यामि, त्वदाशया नः किम् ? अपितु त्वदाशया एवेत्यर्थः। तस्याः शारीरिकी पीड़ा नास्ति, केवलं तदप्राप्तिजनित-चिन्तादिभिरान्तरिकौष्ण्यग्रस्य उद्रेकात् पीड्यते इत्ययमर्थः। संशयितश्च असौ दूत्याभिहितत्वात् गुण एव। प्रोषितं नायकं प्रति दूत्या उक्तिरियम् ॥ १४२ ॥

अत्र च अस्य गुणत्वमुपपादयति कामार्त्तेति। दूती युवानम् आकुलीकर्त्तुं नायिकासमीपगमनाय उत्सुकं कर्त्तुं नर्मणा भङ्ग्या कामार्त्ता घर्मतप्ता वा इति अनिश्चयकरं सन्देह-सङ्कुलम् इति वचः आह ॥ १४३ ॥

अपक्रमं निरूपयति उद्देशेति। अर्थानाम् उद्देशानुगुणः उद्देशः प्रतिज्ञा तस्य अनुगुणः अनुकूलः अनु पश्चात् उद्देशः उपन्यासः चेत् यदि न कृतः, तदा तम् अपक्रमः अभिधानं यस्य तथोक्तं क्रमलङ्घनात् अपक्रमाख्यं दोषं बुधाः आचक्षते इत्यन्वयः। तथाच, यथाक्रममुपन्यास एव गुणः, तल्लङ्घनन्तु दोष एवेति भावः ॥ १४४ ॥

अपक्रमं दर्शयति स्थितीति। जगतां स्थितिः पालनं

शम्भुनारायणाम्भोजयोनयः पालयन्तु वः ॥१४५॥
यत्नः सम्बन्धविज्ञानहेतुकोऽपि कृतो यदि।
क्रमलङ्घनमप्याहुः सूरयो नैव दूषणम् ॥ १४६ ॥
बन्धुत्यागस्तनुत्यागो देशत्याग इति त्रिषु।
आद्यन्तावायतक्लेशौ मध्यमः क्षणिकज्वरः॥ १४७ ॥
शब्दहीनमनालक्ष्यलक्ष्यलक्षणपद्धतिः।

निर्माणं सृष्टिः संहारः ध्वंसः तेषां हेतवः कर्त्तारः अमी शम्भु-नारायणाम्भोजयोनयः शिवविष्णुब्रह्माणः वः युष्मान् पालयन्तु। अत्र प्रथमोद्दिष्टानां स्थितिर्निर्माणसंहाराणां यथाक्रममन्वये कर्त्तव्ये नारायणाम्भोजयोनिसम्भव इति वक्तुमुचितं, परन्तु तद्विपरीतमुक्तमिति अपक्रमता ॥ १४५ ॥

अस्यादोषत्वमपि क्वचिदित्याह यत्न इति। यदि सम्बन्धस्य अन्वयस्य विज्ञानं विशेषेणावबोध एव हेतुर्यस्य तादृशः यत्नः विशिष्टसम्बन्धबोधायैव तादृशक्रमलङ्घनप्रयास इत्यर्थः कृतः कविनेति शेषः, तदा सूरयः विद्वांसः क्रमलङ्घनमपि दूषणं दोषावहं नैव आहुः ॥ १४६ ॥

अदोषत्वं दर्शयति बन्धुत्याग इति। बन्धुत्यागः तनुत्यागः देशत्यागः इति त्रिषु विषयेषु मध्ये आद्यन्तौ बन्धुत्यागदेशत्यागौ आयताः दीर्घाः क्लेशाः ययोः तौ, मध्यमस्तनुत्यागस्तु क्षणिकज्वरः क्षणमात्रक्लेशकर इत्यर्थः। अत्र यथाक्रममुद्दिष्टेऽपि बन्धुत्यागादिषु आयतक्लेशावित्यनेन आद्यन्तयोरेव अन्वययोगात् मध्यमलङ्घनं न दोषाय इत्यवधेयम् ॥ १४७ ॥

शब्दहीनं निरूपयति शब्दहीनमिति। अनालक्ष्या अदृष्टा लक्ष्यस्य उदाहरणस्य तथा लक्षणस्य नियामकस्य सूत्रादेः

पदाप्रयोगोऽशिष्टेष्टः शिष्टेष्टस्तु न दुष्यति ॥ १४८॥
अवते भवते बाहुर्महीमर्णवशक्करीम् ।
महाराजन्नजिज्ञासा, नास्तीत्यासां गिरां रसः १४९
दक्षिणाद्रेरुपसरन् मारुतश्चूतपादपान् ।
कुरुते ललिताधूतप्रबालाङ्कुरशोभिनः ॥ १५० ॥

पद्धतिः नियमः यत्र तादृशः अगणितानुशासन इत्यर्थः, पदानां पदयोः पदस्य वा प्रयोगः अशिष्टानाम् अज्ञानाम् इष्टः अनवबोधविजृम्भित इत्यर्थः, अतएव शब्दहीनं शब्देन अनुशासनशास्त्रेण हीनं तदाख्यदोषवानित्यर्थः पदप्रयोगस्य क्रताभिहितत्वात् द्रव्यपरत्वमिति प्रयुक्तं पदमिति वक्तव्यं तेन च शब्दहीनमित्यस्य अन्वयः कर्त्तव्य इत्यवधेयम्। शिष्टेष्टस्तु शिष्टैः साधुभिर्बहुभिरिष्टः व्यवहृतस्तु न दुष्यति न दोषमावहति ॥ १४८ ॥

शब्दहीनमुदाहरति अवते इति। हे महाराजन्! भवते भवतः बहुः अर्णवः शक्करी मेखला यस्याः तां ससागरामित्यर्थः, शक्करी छन्दसो भेदे नदीमेखलयोरपीति मेदिनी। महीम् अवते पालयति। अत्र अजिज्ञासा संशयाभावात् जिज्ञासा न विद्यते सत्यमेवैतदित्यर्थः, आसां गिरां वाचां रसः माधुर्य्यानुगुणः आस्वादः नास्ति। अत्र अवते इत्यात्मनेपदं, भवते इति षष्ठीस्थाने चतुर्थी, महाराजेत्यत्र महाराजन्निति कर्मधारयः अनुशासनविरुद्धः अशिष्टैरुपन्यस्तः ॥ १४९ ॥

अदूषितं शब्दहीनं दर्शयति दक्षिणाद्रेरित्यादि। दक्षिणाद्रेः मलयपर्वतस्य उपसरन् मलयाचलं गच्छन् मारुतः चूतपादपान् तत्रत्यान् आम्रतरून् ललितं सुन्दरं यथा तथा

इत्यादिशास्त्रमाहात्म्यदर्शनालसचेतसाम्।
अपभाषणवद् भाति न च सौभाग्यमुज्झति॥१५१
श्लोकेषु नियतस्थानं पदच्छेदं यतिं विदुः।
तदपेतं यतिभ्रष्टं श्रवणोद्वेजनं यथा॥ १५२॥

आधूताः ये प्रबालाः नवपल्लवाः अङ्कुराश्च तैः शोभिनः कुरुते इत्यन्वयः। इत्यादि वाक्यं शास्त्रस्य अनुशासनस्य यत् माहात्म्यं तस्य दर्शने अलसं चेतो येषां तथाभूतानां विदुषाम् इत्यर्थः अपभाषणवत् अपशब्दवत् भाति न तु अपशब्दरूपेण इत्यर्थः। अयं भावः, कर्मणि द्वितीयेति अनुशासनबलेन दक्षिणाद्रेरित्यत्र द्वितीया भवितुमर्हत्येव परं तां विहाय सम्बन्धविवक्षया षष्ठीविधानेऽपि न दोषः। उक्तञ्च अविवक्षिते कर्मादौ सम्बन्धविवक्षया षष्ठीति। द्वितीयाया अभावेऽपि श्रोतॄणां न वैरस्योदय इत्याह न चेति। सौभाग्यञ्च लालित्यञ्च न च उज्झति न त्यजति, तथाच ईदृशस्थले श्रोत्रविरागि दोष एवेति भावः। मलयपर्वतीयकम्पिततत्रत्य-चूततरोर्वायोर्वर्णनमिदम्। दक्षिणाद्रेरुपसर्पन्नित्यस्य दक्षिणाद्रेः मलयाचलात् उपसर्पन् आगच्छन्नित्यर्थकत्वेन कश्चित् पर्य्यनुयोग इति बोध्यम्॥ १५०॥ १५१॥

यतिं तद्भ्रष्टञ्च निरूपयति श्लोकेष्विति। श्लोकेषु पद्येषु न तु गद्येषु नियतं छन्दःशास्त्रज्ञैः निरूपितं स्थानं यस्य तादृशं पदस्य छेदं विरतिं यतिं विदुः जानन्ति बुधा इति शेषः, पदान्ते जिह्वेष्टविश्रामस्थानं यतिरिति निष्कर्षः। उक्तञ्च, यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते। तदपेतं तस्याः विच्युतं यतिभ्रष्टं श्रवणयोः श्रोत्रयोः उद्वेजनम् असुखजनकम् इत्यर्थः॥ १५२॥

स्त्रीणां सङ्गीतविधिमयमादित्यवंश्यो नरेन्द्रः
पश्यत्यक्लिष्टरसमिह शिष्टैरमेत्यादि दुष्टम् ।
कार्य्याकार्य्याण्ययमविकलान्यागमेनैव पश्यन्
वश्यामुर्वीं वहति नृप इत्यस्ति चैवं प्रयोगः ॥१५३
लुप्ते पदान्ते शिष्टस्य पदत्वं निश्चितं यथा ।
तथा सन्धिविकारान्तं पदमेवेति वर्ण्यते ॥ १५४ ॥

स्त्रीणामिति । अयम् आदित्यवंश्यः सूर्य्यवंशीयः नरेन्द्रः शिष्टैः सज्जनैः अमा सह अक्लिष्टाः पूर्णा रसाः आस्वादाः यस्य तादृशं स्त्रीणां सङ्गीतविधिं पश्यति । इत्यादि एवमादिकं पद्यं दुष्टं यतिभ्रष्टत्वादनादरणीयमित्यर्थः । तथाहि, सप्तदशाक्षरे मन्दाक्रान्तावृत्ते चतुर्थषष्ठसप्तमेषु यतिर्निवेशनीया । तथाचोक्तं, मन्दाक्रान्ताम्बुधिरसनगैर्मोभनौ तौ गयुग्ममिति । अत्र तु चतुर्थादिवर्णानां पदान्तर्गतत्वात् यतिभ्रष्टता । अस्य च क्वचिददोषत्वमाह कार्य्येति । अयं नृपः आगमेनैव नीतिशास्त्रेणैव न तु स्वेच्छाचारितयेति भावः, कार्य्याकार्य्याणि कर्त्तव्याकर्त्तव्याणि अविकलानि अव्याहतानि पश्यन् वश्यां वशतामापन्नाम् उर्वीं वहति इति एवं प्रयोगस्य अस्ति अदुष्टत्वेन वर्त्तते इत्यर्थः पदमध्ये स्वरसन्धिश्रयणे यतिभ्रंशस्य अदोषत्वकीर्त्तनात् । यदुक्तं, पदान्ते सा शोभां व्रजति पदमध्ये त्यजति च । पुनस्तत्रैवासौ स्वरविहितसन्धिः श्रयति ताम् । यथा कृष्णः पुष्णात्यतुलमहिमा मां करुणयेति ॥ १५३ ॥

उक्तविधं यतिभ्रंशस्य दोषत्वमदोषत्वञ्च प्रतिपादयति लुप्ते इति । लुप्ते लुप्तविभक्तिके पदान्ते शिष्टस्य अवशिष्टस्य

तथापि कटुवर्णानां कवयो न प्रयुञ्जते ।
ध्वजिनी तस्य राज्ञः केतूदस्तजलदेत्यदः ॥ १५५ ॥
वर्णानां न्यूनताधिक्ये गुरुलघ्वयथास्थितिः ।
तत्र तद्भिन्नवृत्तं स्यादेष दोषः सुनिन्दितः ॥ १५६ ॥
इन्दुपादाः शिशिराः स्पृशन्तीत्यूनवर्णता ।

पदांशस्य यथा पदत्वं निश्चितं सिद्धान्तितं, सन्धिः स्वरद्वय-सम्मेलनं तत्कृतो विकारः वर्णान्तरोत्पत्तिरूपः अन्ते यस्य तादृशं पदमेव पदमध्यमपीत्यर्थः, अत एवकारोऽप्यर्थः । पदान्ते इति वर्ण्यते कविभिरुच्यते । एतदुक्तमेव प्राक्, एतद्वैप-रीत्ये दोष एव, यथा स्त्रीणामित्यादि ॥ १५४ ॥

स्वरसन्धिश्रयणेऽपि दोषं क्वचिद् दर्शयति तथेति । तथापि स्वरसन्धिश्रयणेऽपि कवयः कर्णानां कटुं श्रोतासुखकरं तस्य राज्ञः ध्वजिनी सेना केतवः ध्वजाः तैः उदस्ता उत्चिप्ताः जलदा मेघा यया तादृशी इत्यदः एवमिदं पद्यं न प्रयुञ्जते न व्यवहरन्ति, तथाच स्वरसन्धिश्रयणेऽपि श्रुतिकटुर्यतिभ्रंशो दोष एवेति भावः ॥ १५५ ॥

भिन्नवृत्तं निर्दिशति वर्णानामिति । यत्रेत्यूह्यं, यत्र पद्ये वर्णानां वर्णस्य वर्णयोः वर्णानां वेत्यर्थः न्यूनता आधिक्यं वा तथा गुरूणां लघूनाञ्च अयथास्थितिः अनियमेन विन्यासः, तत्र पद्ये तत् भिन्नवृत्तं भिन्नं भग्नं वृत्तं छन्दः छन्दोभङ्ग इत्यर्थः स्यात्, एष छन्दोभङ्गाख्यः दोषः सुनिन्दितः कवयितुश्छन्दो-ऽनभिज्ञतया उपहासास्पदत्वज्ञापनादिति भावः ॥ १५६ ॥

न्यूनताधिक्ये उदाहरति इन्दुपादा इति । इन्दोश्चन्द्रस्य पादाः किरणाः शिशिरा शीतलाः स्पृशन्ति, इत्यत्र ऊनवर्णता

सहकारस्य किसलयान्यार्द्राणीत्यधिकाक्षरम्॥१५७

कामेन बाणा निशिता विमुक्ता
मृगेक्षणास्वित्ययथागुरुत्वम् ।
स्मरस्य बाणा निशिताः पतन्ति
वामेक्षणास्वित्ययथालघुत्वम् ॥ १५८ ॥

न संहितां विवक्षामीत्यसन्धानं पदेषु यत् ।

प्रथमे पादे अष्टाक्षरे वक्तव्ये सप्ताक्षराणीति एको वर्णः न्यून इत्यर्थः। सहकारस्य आम्रस्य किसलयानि आर्द्राणि, इति अत्रापि तृतीये पादे अष्टाक्षरे वक्तव्ये नवाक्षराणीति एको वर्णोऽधिक इत्यर्थः ॥ १५७ ॥

गुरुलघ्वयथास्थितिमुदाहरति कामेनेति। कामेन मृगेक्षणासु निशिता बाणा विमुक्ताः, इत्यत्र अयथागुरुत्वम्। तथाच, अत्र पूर्वार्द्धे उपेन्द्रवज्रावृत्तम् उपेन्द्रवज्रा जतजास्ततो गाविति लक्षणात् ततश्च जगणे प्रथमं निवेश्ये का इति गुरुवर्णो निवेशितः जगणश्च जो गुरुमध्यगत इत्युक्तत्वात् आद्यन्तौ लघू मध्यवर्णो गुरुरित्येवं वर्णत्रयात्मक इति बोध्यम्। तथा, स्मरस्य निशिता बाणा वामेक्षणासु पतन्ति, इत्यत्र अयथालघुत्वम्। तथाच, उत्तरार्द्धे इन्द्रवज्रावृत्तं स्यादिन्द्रवज्रा ततजास्ततोगाविति लक्षणात् ततश्च तगणे प्रथमं निवेश्ये स्मेति लघुवर्णो निवेशितः, तगणश्च अन्त्यलघुस्त इत्युक्तत्वात् प्रथमद्वितीयौ गुरू अन्त्यश्च लघुरित्येवं वर्णत्रयात्मक इति बोध्यम्। अत्र आदाविन्द्रवज्रा पश्चादुपेन्द्रवज्रा इत्येवमुपजातिश्छन्दसि वक्तव्ये नायं दूषणावसर इति ध्येयम् ॥ १५८ ॥

विसन्धिकं निर्दिशति नेति। संहितां वर्णयोर्मिलनरूपां

तद्विसन्धीति निर्दिष्टं न प्रगृह्यादिहेतुकम् ॥१५८॥
मन्दानिलेन चलता अङ्गनागण्डमण्डने।
लुप्तमुद्भेदि घर्माम्भो नभस्यस्मद्वपुष्यपि ॥ १६० ॥
मानेर्ष्ये इह शीर्य्येते स्त्रीणां हिमऋतौ प्रिये।
आसु रात्रिष्विति प्राज्ञैराम्नातं व्यस्तमीदृशम्॥१६१

सन्धिं न विवक्षामि वक्तुमिच्छामि इति अभिप्रेत्य न प्रगृह्यादिहेतुकं प्रगृह्यादिहेतुं विनेत्यर्थः पदेषु यत् असन्धानं असंयोजनं सन्ध्यभाव इत्यर्थः तत् विसन्धि विसन्ध्याख्यदोष इत्यर्थः प्रगृह्यं नाम सन्धिसूत्रेण यत्र सन्धिर्निषिद्धः। तद् यथा, अमी ईशा इत्यादि ॥ १५८ ॥

विसन्धिदोषमुदाहरति मन्दानिलेनेति। नभसि आकाशे चलता मन्दानिलेन अङ्गनायाः गण्डमण्डले कपोलदेशे अस्मद्वपुषि अस्माकं शरीरेऽपि उद्भेदि घर्माम्भः स्वेदजलं लुप्तम् अपनीतम्। अत्र चलता इत्याकारस्य अङ्गनेत्यकारेण सह दीर्घत्वविधायकसूत्रे सत्यपि सन्धिर्न कृत इति ॥ १६० ॥

प्रगृह्यादिहेतुकं दर्शयति मानेर्ष्ये इति। इह हिमऋतौ हेमन्ते आसु रात्रिषु हेमन्तनिशासु इत्यर्थः प्रिये प्रणयिनि स्त्रीणां मानेर्ष्ये मानः प्रणयकोपः ईर्ष्या नायिकान्तरासङ्गजनितः कोपविशेषश्च शीर्य्येते शीर्णे भवतः नश्यत इत्यर्थः। इत्यत्र ईदृशं व्यस्तं सन्ध्यभावः प्राज्ञैः सूत्रकृद्भिः पण्डितैः आम्नातं कथितम्। तथाच, मानेर्ष्ये इहेति व्वद्देऽमीयु इति सूत्रेण द्विवचननिष्पन्नस्य एकारस्य सन्धिर्निषिद्धः, तथा हिमऋतौ इत्यत्र ऋत्यगिति सूत्रेण ऋकारे परे अकारस्य विकल्पेन सन्धिर्निषिद्ध इति बोध्यम् ॥ १६१ ॥

देशोऽद्रिवनराष्ट्रादिः कालोरात्रिन्दिवर्त्तवः ।
नृत्यगीतप्रभृतयः कला कामार्थसंश्रयाः ॥ १६२ ॥
चराचराणां भूतानां प्रवृत्तिर्लोकसंज्ञिता ।
हेतुविद्यात्मको न्यायः सस्मृतिः श्रुतिरागमः॥१६३
तेषु तेष्वयथा रूढ़ं यदि किञ्चित् प्रवर्त्तते ।
कवेः प्रामादाद्देशादिविरोधीत्येतदुच्यते ॥ १६४ ॥
कर्पूरपादपामर्शसुरभिर्मलयानिलः ।

अथ देशादीन् निरूप्य तद्विरोधं निर्दिशति देश इति। अद्रिः पर्वतः वनं राष्ट्रं राज्यम् इत्येवमादिर्देशः, रात्रिर्दिवा ऋतवश्च कालः बहुवचनात् मासवत्सरादीनां ग्रहणम्। कामार्थसंश्रयाः कामश्च अर्थश्च तौ संश्रयौ येषां तथोक्ताः कामसाधकाः अर्थसाधकाश्च नृत्यगीतप्रभृतयः प्रभृतिशब्देन वादित्रादि परिग्रहः चतुःषष्टिप्रकाराः तन्त्रोक्ताः कलाः ॥ १६२ ॥

चराचराणां जङ्गमस्थावराणां भूतानां प्रवृत्तिः वार्त्ता लोकसंज्ञिता लोक इति संज्ञा जाता अस्या इति अस्य जातार्थे इतप्रत्ययः। लोकशब्दप्रतिपाद्या, न्यायः हेतुविद्यात्मकः हेतुः कारणं तद्घटिता या विद्या युक्तिमूलकशास्त्रमित्यर्थः तदात्मकः तन्मय इत्यर्थः तथा सस्मृतिः स्मृतिः वेदार्थस्मरणजन्यम् ऋषिवाक्यं तत्सहिता मन्वादिसंहितासहिता इत्यर्थः श्रुतिर्वेदः आगमः आगमशब्दवाच्य इत्यर्थः ॥ १६३ ॥

तेषु तेषु उक्तेषु देशादिषु अयथारूढ़म् अप्रसिद्धं किञ्चित् यदि कवेः प्रमादात् अनवधानात् प्रवर्त्तते उपन्यस्यते तदा एतत् देशादिविरोधि तदाख्यदोषवदित्यर्थः इति उच्यते ॥१६४

कलिङ्गवनसम्भूता मृगप्राया मतङ्गजाः ॥ १६५ ॥
चोलाः कालागुरुश्यामकावेरीतीरभूमयः ।
इति देशविरोधिन्या वाचः प्रस्थानमीदृशम् ॥ १६६ ॥
पद्मिनी नक्तमुन्निद्रा स्फुटत्यह्नि कुमुद्वती ।
मधुरुत्फुल्लनिचुलो निदाघो मेघदुर्दिनः ॥ १६७ ॥

देशविरोधमुदाहरति कर्पूरेति । मलयानिलः कर्पूरपादपानाम् आमर्शेन सम्पर्केण सुरभिः सुगन्धिः, तथा कलिङ्गवनसम्भूता मतङ्गजा हस्तिनः मृगप्रायाः मृगवत् अतिक्षुद्रा इत्यर्थः अत्र मलयाद्रौ कर्पूरपादपानां नोत्पत्तिः, चीनादिदेशे एव तदुत्पत्तिरिति तथा कलिङ्गवने मतङ्गजानां सम्भवो न प्रसिद्ध इत्युभयत्र मलयपर्वतः तथा कलिङ्गवनरूपो देशविरोधः ॥ १६५ ॥

चोला इति । चोलाः कर्णाटान्तर्गतदेशभेदाः कालागुरुभिः श्यामाः कावेरीनद्याः तीरभूमयः येषु तथोक्ताः । अत्र कावेरीतीरे कालागुरवो न जायन्ते इति राष्ट्ररूपो देशविरोधः । देशविरोधिन्याः वाचः इति ईदृशम् उक्तरूपं प्रस्थानं नियम इत्यर्थः ॥ १६६ ॥

कालविरोधं दर्शयति । पद्मिनी नक्तं रात्रौ उन्निद्रा विकसिता इति दिवस एव पद्मिन्या विकासस्य प्रसिद्धेः रात्राविति कालविरोधः । कुमुद्वती अह्नि स्फुटति इति रात्रावेव कुमुदिन्या विकासस्य प्रसिद्धेः अह्नि इति कालविरोधः । मधुः वसन्तः उत्फुल्लाः निचुला यत्र तथोक्तः, अत्र निचुलानां प्रावृष्येव विकासस्य प्रसिद्धेः मधुरिति कालविरोधः निदाघः ग्रीष्मः मेघेन दुर्दिनं यत्र तथोक्तः अत्र वर्षास्वेव दुर्दिनत्व-

अव्यहंसगिरो वर्षाः शरदो मत्तवर्हिणः ।
हेमन्तो निर्मलादित्यः शिशिरः श्लाघ्यचन्दनः ॥ १६८ ॥
इति कालविरोधस्य दर्शिता गतिरीदृशी ।
मार्गः कलाविरोधस्य मनागुद्दिश्यते यथा ॥ १६९ ॥
वीरशृङ्गारयोर्भावौ स्थायिनौ क्रोधविस्मयौ ।
पूर्णसप्तस्वरः सोऽयं भिन्नमार्गः प्रवर्त्तते ॥ १७० ॥

प्रसिद्धेः निदाघ इति कालविरोधः। निदाघेऽपि कदाचित् दुर्दिनत्वं सम्भवति वर्णितञ्च अकालदुर्दिनं मृच्छकटिकादौ इति शेषोक्तं चिन्त्यम् ॥ १६७ ॥

वर्षाः अव्या हंसानां गिरः यासु ताः, अत्र शरत्स्वेव हंसानां मधुरनादस्य प्रसिद्धेः वर्षा इति कालविरोधः। शरदः मत्ता वर्हिणः यासु ताः अत्र वर्षास्वेव मयूराणां मत्ततायाः प्रसिद्धेः शरद इति कालविरोधः। हेमन्तः निर्मलः आदित्यो यत्र तथाभूतः, अत्र हेमन्ते आदित्यस्य हिमावृतत्वात् निर्मलत्वम् अप्रसिद्धम् इति कालविरोधः, तथा शिशिरः शीतर्त्तुः श्लाघ्यम् आदरणीयं चन्दनं यस्मिन् सः अत्र चन्दनस्य शैत्यात् शिशिरे तस्य श्लाघ्यत्वम् अप्रसिद्धम् इति च कालविरोधः॥ १६७ ॥ १६८ ॥

कालविरोधमुपसंहृत्य कलाविरोधं दर्शयितुमाह इतीति। इति ईदृशी उक्तप्रकारा कालविरोधस्य गतिः नियमः दर्शिता, इदानीं कलाविरोधस्य मार्गः नियमः मनाक् अल्पं यथा तथा उद्दिश्यते प्रदर्श्यते यथेति उदाहरणार्थम् ॥ १६९ ॥

वीरेति। वीरशृङ्गारयोः रसयोः क्रोधविस्मयौ स्थायिनौ भावौ विरुद्धाविति शेषः तथाहि वीरे उत्साहः, शृङ्गारे रतिः

इत्थं कलाचतुःषष्टिविरोधः साधु नीयताम्।
तस्याः कलापरिच्छेदे रूपमाविर्भविष्यति॥ १७१॥

स्थायिभावत्वेन कथ्यते, क्रोधः रौद्ररसस्य विस्मयः अद्भुतरसस्य स्थायित्वेन निर्दिष्टौ तदेवं स्थिते तद्विरोधो दोष एवेति भावः। स्थायिभावश्च दर्पणकारेणोक्तः, यथा:, अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः। आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति कीर्त्त्यते इति रसावस्थः परं भावः स्थायितां प्रतिपद्यते इति च। क्रोधविस्मयौ च तेनैवोक्तौ यथा प्रतिकूलेषु तैक्ष्णस्य अवबोधः क्रोध इष्यते। तथा विविधेषु पदार्थेषु लोकसीमातिवर्त्तिषु। विस्फारश्चेतसो यस्तु स विस्मय उदाहृत इति, रसविवेकस्य भरतादिभिः नाट्यशास्त्र एव कृतत्वात् नाट्यरूपकलाविरोधोऽयम् इति बोध्यम्। गीतरूपकलाविरोधमाह पूर्णेति पूर्णाः सम्यक् प्रयुक्ताः सप्तस्वराः निषादादयः यत्र तथोक्तः सङ्गीतविधिरिति शेषः निषादर्षभगान्धार षड्जमध्यमधैवताः। पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिता इत्यमरः। भिन्नमार्गः भिन्नः तत्तत्कालनिषिद्धस्वरासम्बलितः मार्गः प्रयोगनियमः यस्य तादृशः सन् प्रवर्त्तते प्रचलति अतस्तद्वैपरीत्यं दोष एवेति फलितार्थः उक्तञ्च भरतेन प्रभाते सुरतो निन्द्यः ऋषभः पञ्चमोऽपि च। पञ्चमस्य विशेषोऽयं कथितः पूर्वसूरिभिः। प्रगे प्रगीतो जनयेद्दर्शनस्य विपर्य्ययम् इति॥ १७०॥

इत्थमिति। इत्थम् अनेन प्रकारेण कलानां चतुःषष्टिः तस्याः विरोधः साधु यथा तथा नीयतां यथा नाट्यगीतरूपयोः कलयोर्विरोधः प्रदर्शितः तथा तत्तदुदाहरणेषु अन्यासामपि कलानां विरोधः दृश्यतामित्यर्थः, कलापरिच्छेदे तदाख्यग्रन्थे तस्याः कलायाः रूपम् आविर्भविष्यति प्रकटिष्यति, अनन्तरं

आधूतकेशरो हस्ती तीक्ष्णशृङ्गस्तुरङ्गमः ।
गुरुसारोऽयमेरण्डो निःसारः खदिरद्रुमः ॥ १७२॥
इति लौकिक एवायं विरोधः सर्वगर्हितः ।
विरोधो हेतुविद्यासु न्यायाख्यासु निदर्श्यते ॥ १७३
सत्यमेवाह सुगतः संस्कारानविनश्वरान् ।
तथाहि सा चकोराक्षी स्थितैवाद्यापि मे हृदि १७४

कलापरिच्छेदं नाम ग्रन्थं करिष्यामि तत्रैव तासां विशेषो द्रष्टव्य इति भावः ॥ १७१ ॥

लोकविरुद्धतां दर्शयति आधूतेति । अयं हस्ती आधूताः केशरा जटाः यस्य तथोक्तः, तुरङ्गमः अश्वः तीक्ष्णे शृङ्गे यस्य तादृशः, एरण्डः तदाख्यवृक्षः गुरुः सारो यस्य तथाभूतः, खदिरद्रुमः नास्ति सारो यस्य तादृक् हस्तिनः सकेशरत्वं तुरङ्गमस्य तीक्ष्णशृङ्गत्वम् एरण्डस्य सारवत्त्वं तथा खदिरतरोः निःसारत्वं लोकविरुद्धम् । अत्र पूर्वार्द्धे चरयोरुत्तरार्द्धे अचरयोरित्यवगन्तव्यम् ॥ १७२ ॥

इतीति । इति उक्तरूपः लौकिकः लोकप्रसिद्ध एव अयं विरोधः सर्वैः विद्वद्भिः गर्हितः निन्दितः, तथा च देशादिविरोधापेक्षया लोकविरुद्धोपन्यासः प्रयोक्तुर्नितरां हास्यायेति भावः । सम्प्रति न्यायाख्याषु न्यायनाम्नीषु हेतुविद्यासु विरोधः निदर्श्यते उदाह्रियते ॥ १७३ ॥

सौगतदर्शनरूपन्यायविरोधं दर्शयति । सत्यमिति सुगतः बुद्धः संस्कारान् ज्ञानविशेषान् अविनश्वरान् चिरस्थायिनः सत्यमेव आह, तथाहि तमेवार्थं जानीहि सा पूर्वानुभूता

कापिलैरसदुद्भूतिः स्थान एवोपवर्ण्यते ।
असतामेव दृश्यन्ते यस्मादस्माभिरुद्भवाः ॥ १७५ ॥
गतिर्न्यायविरोधस्य सैषा सर्वत्र दृश्यते ।
अथागमविरोधस्य प्रस्थानमुपदिश्यते ॥ १७६ ॥
अनाहिताग्नयोऽप्येते जातपुत्रा वितन्वते ।
विप्रा वैश्वानरीमिष्टिमक्लिष्टाचारभूषणाः ॥ १७७ ॥

चकोराक्षी अद्यापि मे हृदि स्थितैव, स्मरणविषयी भवतीत्यर्थः स्मृतिं प्रति संस्कारस्य हेतुत्वात् तस्य चाविनश्वरत्वात् चेति भावः। पदार्थमात्रस्य क्षणभङ्गुरत्वमिति वादिनान्तु तेषां सौगतानां मतविरुद्धमेतदिति हेतुविद्याविरोधः ॥१७४॥

सांख्यदर्शनरूपन्यायविरोधं दर्शयति कापिलैरिति। कापिलैः कपिलमतानुसारिभिः सांख्यविद्भिः असदुद्भूतिः असतामनित्यानां दुष्टानाञ्च, उद्भूतिः उद्भवः स्थान एव युक्तमेव उपवर्ण्यते, यस्मात् अस्माभिः असतामेव दुष्टानामेव उद्भवा दृश्यन्ते प्रायेण दुर्जना एव जायन्ते न तु साधव इति भावः। अयं भावः कापिलानुसारिणः सतः सदेव जायते नत्वसदिति मन्यन्ते तथाचोक्तम् असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्। शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्य्यमिति तस्मादत्र असदुद्भूतिदर्शनं सांख्यविरुद्धमिति निष्कर्षः॥१७५॥

न्यायविरोधमुपसंहरति गतीति। सा एषा एवंप्रकारा न्यायविरोधस्य गतिः सर्वत्र वैशेषिकादिष्वपि दृश्यते अथ इदानीम् आगमविरोधस्य प्रस्थानं गतिः उपदिश्यते ॥ १७६ ॥

श्रुतिविरोधं दर्शयति। अनेति। एते अक्लिष्टाचारभूषणाः

असावनुपनीतोऽपि वेदानधिजगे गुरोः।
स्वभावशुद्धः स्फटिको न संस्कारमपेक्षते ॥ १७८॥
विरोधः सकलोऽप्येष कदाचित् कविकौशलात्।
उत्क्रम्य दोषगणनां गुणवीथीं विगाहते॥ १७९॥
तस्य राज्ञः प्रभावेण तदुद्यानानि जज्ञिरे।
आर्द्रांशुकप्रवालानामास्पदं सुरशाखिनाम्॥१८०॥

अक्षुण्णसर्वाचारसमन्विताः जातपुत्राः विप्राः अनाहिताग्नयः अकृताग्न्याधानाः अपि वैश्वानरीम् इष्टिं यागं वितन्वते कुर्वन्ति। अत्र च श्रुतौ कृताग्न्याधानादेरेव वैश्वानरेष्ट्यधिकारप्रतिपादनात् अनाहिताग्नीनां तद्वर्णनं श्रुतिविरुद्धम्॥१७७॥

स्मृतिविरोधं दर्शयति असाविति। असौ जनः अनुपनीतः अकृतोपनयनसंस्कारः अपि गुरोः सकाशात् वेदान् अधिजगे अधीतवान्। तथाहि स्वभावेन प्रकृत्या एव शुद्धः निर्मलः स्फटिकः संस्कारं शुद्धिं न अपेक्षते। अत्र अनुपनीतस्य वेदाध्ययनं स्मृतिविरुद्धम् उक्तञ्च मनुना नाभिव्याहारयेद् ब्रह्म स्वधानियमनादृते शूद्रेण हि समस्तावद् यावद् वेदे न जायते इति॥ १७८॥

उक्तदोषस्य कदाचिद् गुणत्वमप्याह विरोध इति। एषः उक्तरूपः सकलः समग्रः अपि विरोधः कवेः कौशलात् वर्णनाचातुर्य्येण कदाचित् दोषगणनाम् उत्क्रम्य विहाय गुणवीथीं गुणश्रेणीं विगाहते गुणत्वेन गणनीयो भवतीत्यर्थः॥ १७९॥

तत्र देशविरोधस्य गुणत्वं दर्शयति तस्येति। तस्य राज्ञः

राज्ञां विनाशपिशुनश्चचार खरमारुतः।
धुन्वन् कदम्बरजसा सह सप्तच्छदोद्गमान्॥ १८१॥
दोलाभिप्रेरणत्रस्तवधूजनमुखोद्गतम्।
कामिनां लयवैषम्यं गेयं रागमवर्द्धयत्॥ १८२॥

प्रभावेण महिम्ना तदुद्यानानि तस्य राज्ञः उद्यानानि आर्द्राणि नवानि इत्यर्थः अंशुकानि वस्त्राणि प्रवालानि येषां तेषां सुरशाखिनां देवतरूणाम् आस्पदं स्थानं जज्ञिरे। अत्र मानवोद्यानेषु सुरशाखिसम्भवो देशविरुद्धतया वर्णितोऽपि वर्णनीयस्य राज्ञः प्रभावातिशयं द्योतयतीति चमत्कारव्यञ्जनात् गुणवत्त्वमापद्यते इति फलितार्थः॥ १८०॥

कालविरोधस्य कदाचिद्गुणत्वमुदाहरति राज्ञामिति। राज्ञां प्रतिपक्षभूपानां विनाशपिशुनः विनाशसूचकः पिशुनौ खलसूचकावित्यमरः। खरमारुतः प्रचण्डवायुः सप्तच्छदोद्गमान् धुन्वन् कम्पयन् कदम्बरजसा सह चचार। अत्र युद्धयात्रा सप्तच्छदोद्गमश्च शरत्सु भवति, कदम्बपुष्पाणि तु तदा न जायन्ते वर्षास्वेव तेषां प्रादुर्भावात् तदयं कालविरोधः अकाले फलपुष्पाणि देशविद्रवकारणमिति वचनेन अशुभसूचनात् विजिगीषोः उत्कर्षातिशयव्यञ्जकतया गुण एव, कविकौशलञ्चात्र हेतुरित्यवधेयम्॥ १८१॥

कलाविरोधस्य क्वचिद् गुणत्वमुदाहरति दोलेति। दोलया अभिप्रेरणेन सवेगचालनेन त्रस्ता ये बधूजनाः तेषां मुखेभ्यः उद्गतम् उच्चरितं लयस्य विरामस्य वैषम्यं वैपरीत्यं यत्र तादृशमपि गेयं भयचकितत्वात् लयासङ्गतमपि गानमित्यर्थः कामिनां रागम् अवर्द्धयत्। गानस्य लयशुद्धिरेव रागवर्द्धनीति

ऐन्दवादर्च्चिषः कामी शिशिरं हव्यवाहनम् ।
अबलाविरहक्लेशविह्वलो गणयत्ययम् ॥ १८३ ॥
प्रमेयोऽप्यप्रमेयोऽसि सफलोऽप्यसि निष्फलः ।
एकस्त्वमप्यनेकोऽसि नमस्ते विश्वमूर्त्तये ॥ १८४ ॥
पञ्चानां पाण्डुपुत्राणां पत्नी पाञ्चालपुत्रिका ।

कलानियमः अत्र च तद्वैपरीत्यमिति विरोधः बधूजनान् प्रति कामिनामत्यनुरागव्यञ्जकतया गुण एव, कविकौशलेन अत्र प्रयोजकमिति ज्ञेयम् ॥ १८२ ॥

लोकविरोधस्यापि गुणत्वमुदाहरति ऐन्दवेति । अयं कामी अबलाया विरहेण यः क्लेशः तेन विह्वलः व्याकुलः सन् ऐन्दवात् इन्दुसम्बन्धिनः अर्चिषः किरणात् अपेक्ष्येति यवर्थे पञ्चमी हव्यवाहनम् अग्निं शिशिरं गणयति मन्यते । अत्र हव्यवाहनस्य शिशिरत्वं लोकविरुद्धं तच्च विरहिणां चन्द्रकिरणस्यात्युद्दीपकत्वव्यञ्जनात् गुण एव ॥ १८३ ॥

न्यायविरोधस्य गुणत्वमुदाहरति प्रमेय इति । भगवत्स्तुतिरियम् । प्रमेयः प्रमाणजन्यज्ञानविषयोऽपि अप्रमेयः अज्ञेयः असि, सफलः फलं कार्य्यं विश्वरूपं तत्सहितः अपि निष्फलः फलरहितः कार्य्येषु निर्लेपः असि, त्वम् एकोऽद्वितीयोऽपि अनेकः बहुरूपः असि, अतः विश्वमूर्त्तये ते तुभ्यं नम इत्यन्वयः । प्रमेयत्वाप्रमेयत्वादिकं परस्परविरुद्धं नैकाधारवर्त्तीति नैयायिकी युक्तिः साचात्र विरुद्धतया भासमानापि परमात्मनोऽचिन्त्यत्वं व्यञ्जयन्ती गुणत्वमिहारोहति ॥ १८४ ॥

आगमविरोधस्य गुणत्वमुदाहरति पञ्चानामिति । पाञ्चाल-

सतीनामग्रणीश्चासीद्दैवो हि विधिरीदृशः ॥१८५॥

शब्दार्थालङ्क्रियाश्चित्रमार्गाः सुकरदुष्कराः।
गुणा दोषाश्च काव्यानामिह संक्षिप्य दर्शिताः॥१८६

व्युत्पन्नबुद्धिरमुना विधिदर्शितेन
मार्गेण दोषगुणयोर्वशवर्त्तिनीभिः।
वाग्भिः कृताभिसरणो मदिरेक्षणाभि-
र्धन्यो युवेव रमते लभते च कीर्त्तिम्॥१८७॥

पुत्रिका द्रौपदी पञ्चानां पाण्डुपुत्राणां युधिष्ठिरभीमार्जुन-नकुलसहदेवानां पत्नी अथच सतीनां साध्वीनाम् अग्रणीः श्रेष्ठा च आसीत् हि यतः दैवः देवसम्बन्धी विधिः ईदृशः आगमानधीनः तेषां तस्याश्च देवांशतया शास्त्रोक्तत्वादिति भावः। एकस्या बहुपतित्वं सतीत्वञ्च आगमविरुद्धं तच्चात्र दैवाधीनतया वैचित्र्यमावहद्गुण एवेति ॥ १८५ ॥

ग्रन्थमुपसंहरति शब्देति। इह अस्मिन् काव्यादर्शाख्ये ग्रन्थे शब्दार्थालङ्क्रियाः शब्दालङ्काराः अर्थालङ्काराः सुकरा दुष्कराश्च चित्रालङ्काराणां मार्गा नियमाः तथा काव्यानां गुणा दोषाश्च संक्षिप्य दर्शिताः ॥ १८६ ॥

संक्षिप्तेऽप्यस्मिन् फलसिद्धिर्भवतीत्युपपादयन् ग्रन्थं समापयति व्युत्पन्नेति। व्युत्पन्ना संस्कृता बुद्धिर्यस्य तथोक्तः विशुद्ध-मतिरित्यर्थः धन्यः जनः अमुना विधिदर्शितेन मार्गेण पथा रीत्या इत्यर्थः दोषगुणयोर्वशवर्त्तिनीभिः निर्दोषाभिः सगुणा-भिश्च इत्यर्थः वाग्भिः कृतम् अभिसरणं यस्य तादृशः सुमधुर-काव्यभाषी सन्नित्यर्थः मदिरेक्षणाभिः मदघूर्णितनयनाभिः

इत्याचार्य्यदण्डिनः कृतौ काव्यादर्शे
शब्दालङ्कारदोषविभागो नाम
तृतीयः परिच्छेदः ।
समाप्तश्चायं ग्रन्थः ।

कान्ताभिः कृताभिसरणः युवा इव रमते प्रीतिमनुभव
कीर्त्तिं लभते च इति अन्वयः ॥ १८७ ॥

इति श्रीजीवानन्दविद्यासागरभट्टाचार्य्य[illegible]चिता
काव्यादर्शविवृतिः समाप्ता ।

প্রকাশক—শ্রীজীবানন্দবিদ্যাসাগর বি এ,
২ নং রমানাথ মজুম্‌দারের ষ্ট্রীট্‌, কলিকাতা।
প্রিণ্টর—শ্রীরামনারায়ণ পাল
১৬ নং নূতন পগয়াপটী।

११२ चरकसंहिता (वैद्यक) सम्पूर्ण ६

११३ रसेन्द्रचिन्तामणितथारसरत्नाकर६

११४ भगवद्गीता शाङ्करभाष्य आनन्दगिरिकृतटीका तथा सुबोधिनीसमेत ४

११५ शब्दशक्तिप्रकाशिका (न्याय) ।॥०

११६ मालतीमाधवनाटक सटीक ॥०

११७ भट्टिकाव्य टीकाद्वयसहित २

११८ काव्यप्रकाश अलङ्कार सटीक ४

११९ शाण्डिल्यसूत्र सभाष्य ॥०

१२० हनुमन्नाटक महानाटकसटीक१॥०

१२१ महानाटकम् (हनुमन्नाटकम्) ॥०

१२२ दशरूपकम् (अलङ्कार) १

१२३ चम्पूरामायण सटीक १

१२४ (चम्पूरामायणम्) भोजचम्पू ॥०

१२५ मार्कण्डेयपुराणम् ३

१२६ गोलाध्यायः भास्कराचार्य्यकृत ॥०

१२७ गणिताध्यायः भास्कराचार्य्यकृत १

१२८ पञ्चदशी (सटीक) वेदान्त १॥०

१२९ पातञ्जलदर्शन भोजवृत्तिसहित १

१३० शकुन्तलानाटक सटीक १

१३१ शब्दरूपादर्शः ॥०

१३२ वाराहीसंहिता (ज्योतिष) २

१३३ तर्कामृत (जगदीशकृत) न्याय ।०

१३४ द्वात्रिंशत्पुत्तलिकासिंहासन १

१३५ उत्तररामचरितनाटक सटीक १

१३६ शङ्करविजय १॥०

१३७ मृच्छकटिकनाटक सटीक १॥०

१३८ काव्यादर्श सटीक (अलङ्कार) १

१३९ अष्टाङ्गहृदय (वाग्भट) वैद्यक ३

१४० शुक्रनीतिसार सटीक

१४१ गीतगोविन्द काव्य सटीक २

१४२ अग्निपुराणम् १।

१४३ विष्णुपुराणम् सटीक ५

१४४ मीमांसादर्शनशवरभाष्यसहित १२

१४५ अध्यात्मरामायणम् सटीक २

१४६ महानिर्वाणतन्त्रम् सटीक ४

१४७ मीमांसादर्शनस्य अधिकरणमाला माधवाचार्य्यविरचिता ६

१४८ श्रुतबोधः (छन्दोग्रन्थ) सटीक /

१४९ बालरामायणनाटक सटीक ३

१५० लिङ्गपुराणम् ५

१५१ चण्डकौशिकनाटक सटीक ॥०

१५२ चैतन्यचन्द्रोदयनाटक सटीक २

१५३ कलापव्याकरणं वा कातन्त्र २

१५४ कुसुमाञ्जलि सटीक (न्याय) ।०

१५५ सङ्गीतपारिजात[सङ्गीतशास्त्र]१॥०

१५६ साङ्ख्यसार ।०

१५७ नागानन्दनाटक सटीक ॥०

१५८ नागानन्दनाटक मूल ।०

१५९ ब्रह्मवैवर्त्तपुराण सम्पूर्ण १०

१६० वैशेषिकदर्शनम् सभाष्य ३

१६१ कल्किपुराणम् १

१६२ चाणक्यशतकम् सटीक /

१६३ श्रीहर्षचरितबाणभट्टकृतगद्य १

१६४ कर्पूरमञ्जरीनाटिका सटीक ॥०

१६५ चन्द्रालोक प्राचीन अलङ्कार ।०

१६६ लघुकौमुदीव्याकरणम् ॥०

१६७ गरुड़पुराणम् ६

कलिकाता संस्कृतविद्यामन्दिरे बि, ए, उपाधिधारिणः श्रीजीवानन्दविद्यासागर-भट्टाचार्य्यस्य सकाशात् लभ्यानि।